# शब्दानुशासने केचन आर्ष–प्रयोगाः

**डा0 पूनम सिंह**
**एसोसिएट प्रोफेसर**
**संस्कृत विभाग,**
**डी0ए0वी0 पी0जी0 कालेज, वाराणसी।**

**''कृष्णाद्वैपायनं वन्दे पाराशर्यं तपो निधिम्''**

व्याकरण–शस्त्रेणाननुशासिता भाषा असन्दिग्धतात्पर्यवोधने अक्षमा भवति। अतो। भाषाया व्याकरणनियन्त्रितत्त्वमावश्यकम्। अतएव स्थालीपुलाकन्यायेन केचन आर्षप्रयोगाः व्याकरणेन पाणिनीयेन व्युत्पाद्यन्ते।

यथा भागवते

**यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव।**

**पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि।।**

पश्चसन्धौ पुत्रेति, 1/2/2

1. अत्र श्लोके 'पुत्रेति' गुणसन्धिरार्षः, यतोहि–हे पुत्र! इत्यस्य 'दूराद्धूते च' इत्यनेन सम्बोधनान्तपुत्राशब्दस्य प्लुते कृते 'प्लुतप्रगृह्या अचि नियतयम्' इति सूत्रेण 'पुत्र+इति' इत्यत्र प्रकृति भावादत्र 'आदगुणः' इति गुण सन्ध्यभावात् पुत्रेति प्रयोगआर्ष इति।

तत्र व्युत्पाद्यते–

**वाक्यस्यटैः प्लुतो भवति, इतिसिद्धान्ते सति**

अयं पुत्रेति शब्दो वाक्यस्य टि र्नास्ति, श्लोके 'पुत्रेति'–शब्दस्य वाक्यान्तर्गतत्त्वाभावात्, अतो नात्र प्लुतप्राप्तिः, श्लोकसथपदानां योग्यतया

स्वयोग्यान्वयितया अन्वयो भवति, तदा वाक्यं निष्पद्यते, न तु श्लोकपाठकाले, अत; श्लोके प्लुतत्त्वाभाव एव समुचितः। अतएव पुत्र शब्दस्य वाक्यान्तर्विर्त्तित्त्वाभावस्यापि सुवचत्त्वादित्याह–अन्वित्त्वादित्याह–अन्वितार्थप्रकाशिकाकार इति।

अथवा

''गुरोरतृतोऽनन्त्यस्याप्येकैकस्यप्राचाम्'' इति सूत्रे 'प्राचाम्' इति योगविभागसामर्थ्यात् सर्वोऽति प्लुतो विकल्प्यते इत्येतत्पक्षमाश्रित्य अत्र प्लुताभावे 'पुत्रेति' गुणसन्धियुक्तं रुपं साधुभवति।

भागवते–

**2. अहोऽमितयोगमायया, 8/23/8**

'अहो'–निपातस्य ओदन्ततया 'ओत्' इत्यनेन प्रगृह्यसंज्ञायाम् 'प्लुत प्रग्रह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे सति, पूर्वरुपसन्धिरत्र प्रयोगे आर्ष इति।

'ओत्' इतिसूत्रे व्यवस्थितविभाषात्त्वमाश्रित्य प्रगृह्यसंज्ञाया अभावे, प्लुतत्त्वाभावेन, पूर्वरूपसन्धि रुपं साध्वेवेति। ''सम्बुद्धौ शाकल्यस्येतावनार्षे'' इति सूत्रे 'शाकल्यस्य' – इति पदोपादानात्, एच्छित चिभाषात्त्वम्, ऐच्छिकविभाषात्त्वबोधकस्य 'शाकल्यस्य' – इतिपदस्य 'ओत्' इति सूत्रेऽपि सम्बन्ध प्रकल्प्य शब्दाधिकारात् 'ओत्' इति सूत्रे व्यवस्थिताविभाषात्त्वं क्वचिदितिस्वीकारात्।

अथवा

शिष्टप्रयोगानुरोधात्, 'पृषोदरादित्त्वेन' पूर्वरूपसन्धिं कल्पयित्वा 'अहोऽमित' इत्येषः प्रयोग साधुः।

षण्लिङ्गे

**3. ऊष्याम् – 1/14/21**

'ऊषः क्षारमृत्तिका' इति कोषाद् 'ऊष'–शब्दस्य नित्य पुंल्लिङ्गतया, स्त्रीलिङ्ग ङीबन्तः प्रयोग आर्षः। यतोहि स्त्रियामूषी–इति प्रयोगो नैव क्वचिल्लभ्यते।

''न हि कोषोऽवधारणपरः''–इत्युक्तत्त्वात्, 'लिङ्गम्शिष्यं लोकश्रयत्त्वाल्लिङ्गस्य' इति भाघ्रकारोक्तेश्चात्र स्त्रीत्त्वेऽपि न क्वापि विप्रतितपत्तिः।

कि ऊष शब्दाद् ''अर्थ आदिभ्य अच्'' इत्यनेन अचि कृते, वह्वादेराकृतिगणतया ङीषिकृत रूपं युक्तमिति।

पुश्चापि 'अर्धर्चः पुंसि'–इति अर्धर्चादिगणे पठिताः फल–सूच–वस्त्र–प्रभृतयः शब्दा अपि क्वचितपुल्लिङ्गे श्रूयन्ते, व्यवहियन्तेचेत्यतस्तथैवात्रापि स्वीकृत्य समुचितमेव ऊष्यामितिरूपम्।

**4. पत्नयः 4/1/12**

अव पत्नीशब्दात् जसि, यणि, 'पत्न्यः'–इतिप्रयोक्तव्ये 'पत्नयः' इतिगुणघटित; प्रयोग आर्षः। 'पत्नोमाचष्टे' इति विग्रहे पत्नीप्रातिपदिकात् णिचि, इष्ठवद्भावेन टिलोपे, 'पत्नयति' ततः यन्तात् पत्निघातोः (अच इः) इत्यनेन इप्रत्यये, णिलोपे, ह्रस्वेकारान्तः पत्निशब्दो निष्पत्रस्तस्मात् प्रथमाबहुवचने धित्वेन जसि च' इत्यनेन गुणे, अयादेशे, रूपं साधु वोध्यम्।

अथवा

पृषोदरादित्त्वात्समाधेयम्।

**5. एकां दाराम् 7/14/11**

'दारा भूम्नि पुंसि'–इति कोश प्रामाण्यात् 'एकान् दारान्–इति प्रयोक्तव्ये, 'एकां दाराम्'–इत्येकत्व–स्त्रीत्वाविशिश्टः प्रयोग आर्षः।

दीर्यते अनया सा–इति विग्रहे स्त्रीत्त्वविशिष्टे करणे 'दृ'–विदारणे–इत्यस्माद्धातोः ''अकर्त्तारि च कारके.........'' इत्वनेनसूत्रेण घवि, अजन्तलक्षणवृद्धौ, रपरत्त्वे टापि, दारा शब्दो व्युत्पत्रो यौगिक एव न तु योगरूढ़ः।

अमरकोशे तु योगरूढस्य ग्रहणात् पुंस्त्वे बहुत्त्वे, एव अस्य प्रयोगः स्यादितिए 'दारा पुंभूम्नि' इति कोशात्। एवङ्ख यत्र योगरूढ़दारशब्दस्तत्र अमरकोशकृत्रियमः यत्र केवल यौगिको दारा शब्दः तत्र कोशकृत् नियमो न, अतो युक्तं स्त्रीत्वमेकत्त्वश्चास्य शिश्टप्रयोगानुरोधात्।

**6. दिधक्षोः – 2/7/24**

''विशेष्यविशेषणवाचकपदयोः समानविभक्तिकत्वनियमः'' इतिसिद्धान्तमर्यादया, विशेषण्बोधकपदे 'दिक्षोः' इत्यत्र विशेष्यबोधकपद 'रामाय' इतिवत् चतुर्थी विधेयास्यात् 'दिधक्षवे रामाय' – इति, अतो 'दिधक्षोः रामाय' इत्यत्र पच्चमी आर्षी।

अत्रोच्यते, – यद् 'दिधक्षोः' – इति नास्ति विशेषण वाचकपदम्, अपि तु स्वतन्त्रं पदार्थोपास्थापकं पदमस्ति।

अतः ''भीत्रार्थानां भयहेतुः'' – इति पच्चमी उचितैव एवच्चात्र दिधक्षोः रामाद् यद् भयं प्राप्तं, तेन अङ्गे कम्पो यस्येति, अन्वयमुखेनार्थोपस्कारे समुचितमेव रुपम्।

यद्वा चतुर्थ्यर्थे षष्ठी बोध्या, यद्वा षष्ठी, सामान्ये सम्बन्धे बोध्या। तत्रैवमन्वयः, – दिधक्षों; रामस्य दूरे सुह्रन्मथितरोषसुशोणदृष्ट्या, प्राप्ताङ्गवेपः समुद्रः यस्मै रामाय मार्गं ददौए इति।

चतुर्थ्यर्थे षष्ठीकल्पनं गौरवग्रस्तमत; सम्बन्ध–सामान्ये षष्ठीकल्पनं न्याय्यम्।

अथ च पच्चमी कल्पनेऽपि ''सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न''–

इति व्युत्पत्तिर्विरुयध्येत।

स्त्री प्रत्यये।

**7. अयादवीम्–10/50/3**

अविद्यमाना यादवो यस्यां भूमौ, सा इत्यर्थे बुहव्रीहिसमासे, अन्यपदार्थस्यस्त्रीत्वे, अदन्तत्त्वात् टापि, 'अयादवाम्'–इति प्रयोक्तव्ये, 'अयादवीम्' इति प्रयोग आर्षः।

यादवैः शासिता इत्यर्थे ''शेषे'' इत्यनेन शैषिके अणि प्रत्यये, अण्णन्तत्त्वात् स्त्रीत्वे विवक्षिते ''टिड्ढाणञ्......'' इत्यनेन ङीपि 'यादवी' शब्दः सिद्धः, ततो न यादवी ''अयादवी'' ताम् 'अयादवीम='यादवशासनशून्याम्' इत्यर्थे ङीबन्तं रुपंसमुपयुक्तमेवेति।

केचित–'यादवानामियम्'' इति विगृह्य इदमर्थे 'तस्येदम–इत्यनेन अणि प्रत्यये कृते सति व्युत्पादयन्ति, तदरूचिकरम्, यतोहि दइमर्थे अणं ''बृद्धाच्छः'' इत्यनेन छप्रत्ययस्य प्राप्तेः।

अथवा

''स्वाङ्गच्चोपसर्जनात्'' – इतिसूत्रे 'उपसर्जनात्' इति योगं विभज्य, विभक्तेन 'उपसर्जनात्' इत्यनेन योगेन अत्र ङीप् बोध्यः।

समासे

**8. मृगेन्द्र लीलाम् – 7/10/47**

'सविशेषणानां वृत्ति र्न वृत्तस्य च विशेषणयोगो न' इति व्युत्पत्त्या, अत्र प्रयोगे आदिपुरुषस्य मृगेन्द्रलीलापदैकदेशमृगेन्द्रपदेन सहपदार्थेन च अन्वयो अव्युत्पत्रः, एकदेशान्वयस्वीकारेऽपि, असामर्थ्यात् समासो न स्यत्, इतिकृत्वाऽत्रसमासे मृगेन्द्रस्य लीला इत्यर्थपरः प्रयोगः आर्षः।

**9. नित्यदा–10/44/39**

'सर्वैकान्यकिंयत्तदः काले दा' इत्यनेन सूत्रेण सर्व–एक–अन्य–किं–यत्–तद्–इत्येतेभ्यः कालाथेभ्यः सप्ताम्यन्तेभ्योदाप्रा त्ययो विधीयते।

नित्यशब्दस्य सर्वैकादि शब्देभ्यो वहिर्भूततया अन्येन केनापि सूत्रेण दाप्रत्ययषिधानाभावात् 'नित्यदा' इति प्रयोग आर्षः।

नित्यं दीयते = खण्ड्यते या सा नित्यदा बुद्धिः नित्यं खण्ड्यमाना, इत्यर्थः। 'दो अवखण्डने'–इत्यस्माद्धातोः अङ्प्रत्यये स्त्रीत्वे विवक्षिते, टापि, ततो नित्यदाचासौ, उद्विग्नधीः इतिकर्मधारयसमासे, 'नित्यदोद्विग्नधीः' इत्यर्थपरतया व्याख्याने रुपं साधु।

**10. ईमहि–10/37/23**

'ईङ् गतौ' इत्यस्माद् धातो र्लटि लकारे, 'ईयामहे' लङि लकारे 'ऐयामहि' इति वा प्रयोक्तव्ये, 'ईमहि' इति प्रयोग आर्षः।

'ईङ गतौ' इति दैवादिकधातो र्लङि लकारे रुपं बोध्यम्। ''गणकार्यमनित्यम्''–इति परिभाषया न श्यन्निति, आडागमाभावोऽपि ''आगमशास्त्रमनित्यम्'' इति परिभाषया साध्यः।

लङ्लकारप्रयोगस्तु, निरतिशयितभक्तिद्योतनाय, – तथाहि–भक्तो भक्तिप्राचुर्य्येण नितरां त्वरया एव शरण–त्वेन भगवन्तं प्राप्तुमभिलष्यति, अत एव भक्तेन उच्यते, यदहं झटिति शरणं गतोऽस्मि, इत्येवमर्थ–योजनाया रूपं साधु।

अथवा

'इट–किट–कटी' इत्यत्र प्रश्लिष्टो य 'ई' रुपोधातुः, स एवात्र बोध्यः। अत्र पक्षेऽपि 'गणकार्यमनितयम्' इतिकृत्वा शप् न, अपित्सार्वधातुकस्य ङित्त्वेन गुणोऽपि न

भवति, 'आगमशास्त्रमनित्यम्' इतिपरिभाषया नात्र आडागमः इतिकृत्वा लङ् लकारे रूपं युक्तमेवसाधु।

अथवा

ई = महालक्ष्मीः मही = पृथिवी, अनयोः समाहार इति समाहारद्वन्द्वे, नपुंसकह्रस्वे, ईमहि इति द्वितीयाविभक्तयन्तं समस्तं सुबन्तश्ञ पदं युक्तमेव।

एवश्ञ श्लोकस्थं विशेषणविशोषितं भगवन्तं, तथा च महालक्ष्मीं, पृथ्वीश्च शरणत्वेनाहं (व्रजेम) इति शेषोऽत्र पक्षे बोध्यः।

सन्नन्ते।

**11. रिरक्षया – 4/14/6**

सन्नन्ताद् 'रिरक्षिष' धातोर्भावे 'अ'–प्रत्यये, स्त्रीत्वे टापि, ततस्तृतीयाविभक्तौ 'रिरक्षिषया' इति प्रयोक्तव्ये इडागमरहितः सकारनलोपघटितश्च 'रिरक्षया' इति प्रयोग आर्षः।

शिष्टप्रयोगप्रामाण्यादेव, पृषोदरादित्त्वादिडभावः सकारलोपश्च, इत्येवं रूपं साधुर्भवति।

उत्तरपदार्भस्यसापेशत्त्वेऽपि वृति र्भवत्येवेति वैधाकरण सिद्धानदत्र (आदिपुरुषस्य) इति षष्टयन्तपदोपातपदार्थस्योतरपदार्थ लीलायां साक्षादन्वमेऽपि (मृगेन्द्रस्म लीला) इति 'मृगेन्द्रलीला' इत्येवं समासवृत्तिर्निर्षाधा भवत्येवेति रुपं साधु।

अतएव ऋद्धय राजमातङ्गः इत्यादि प्रयोगेऽपि सापेक्षोत्तरपदार्थे ऋद्धस्य साक्षादन्वये कृते प्रयोगः साधुः मन्यते शिष्टैरिति।

समासाश्रये

**12. दक्षिणापथराजानः 9/1/41**

'दक्षिणापथस्य राजानः' इतिविग्रहे षष्ठी तत्पुरुषसमासे कृते, 'राजाहस्सखिभ्यष्टच्'–इत्यनेनटचि, टिलोपे, 'दक्षिणापथराजाः' इति प्रयोक्तव्ये, 'दक्षिणापथराजानः' इति प्रयोग आर्षः।

समासान्तविधेरनित्ययता नात्र टच्, रुपं साधु

अथवा

'दक्षिणापथस्यराजानः' इत्यर्थे तत्पुरुषसमासे जाते, 'दक्षिणापथराजाः' इति सिद्धवत्कृत्य, ततो दक्षिणापथराजान् आनयति = प्राणयति, जीवयति, अध्किरोति, यः सः, दक्षिणाथराजान्, ततो प्रथमा–बहुवचने जसि कृते प्रयोगः 'दक्षिणापथराजानः' इति सिद्धः, 'अन् प्राणने' इत्यस्मात् कर्त्तरि क्विपिसाधुरुपमिति।

तद्धिते

**13. वात्सल्यतया, 5/6/2**

भावप्रत्ययान्तशब्दात् पुन र्भावप्रत्ययो न भवति, इति भावार्थकश्यञ्प्रत्ययान्तात् वात्सल्यशब्दात् पुनर्भावार्थकतल्–प्रत्ययविधानं नोपयुज्यते, अतो वात्सल्येन–इति प्रयोक्तव्ये वात्सल्यतया' इति प्रयोग आर्षः।

अत्र ''वत्सल एव वात्सल्यम्'' चतुर्वर्गादित्त्वात् स्वार्थे ष्यञ्, न तु भावार्थे। ततो ''वात्सल्यस्य भावः' इत्यर्थे तल् प्रत्यये, लोकात् स्त्रीत्वे टापि, ततस्तृतीया–विभक्तयुत्पत्तौ, 'वात्सल्यतया' इति रुपं साधुयुक्तश्ञेति।

अथवा

'भावप्रत्ययान्तात् भाव प्रत्ययो न' इति प्रायोवादः। यतोहि 'घटत्वत्त्व' इत्यादावपि भावप्रत्ययान्तशब्दात् पुनर्भावार्थकत्वप्रत्ययोभवत्येवेति, अर्थबोधे क्लेशः सम्भाव्येत।

**14. चित्रधा – 10/32/1**

'संख्याविधार्थे धा' इत्यनेन सूत्रेण व्यापारप्रकारार्थक–संख्या शब्दात् स्वार्थे धाप्रत्ययो विधीयते, अतः चित्रशब्दस्य संख्यात्त्वाभावात् 'वित्रधा' शब्द आर्षः।

'बहुगणवतुडतिसंख्या' इति सूत्रे बहुगणशब्दयोश्चित्रशब्दोपलक्षणतया उपादानेन संख्या संज्ञा चित्रशब्दस्यापि बोध्या।

अतः चित्रशब्दस्य संख्याशब्दत्त्वात् धाप्रत्ययविधानं चित्रशब्दात् समुचितमेवेति रुपं साधु।

अथवा

तक्षू–त्वक्षू–इत्यादयोधातवो यथा ऊदितः, तथैव रक्षू–धातुरपि ऊदितः कल्प्यते शिष्टप्रयोगानुरोधत्। तस्यैव कल्पितस्येदं रुपमतः (स्वरतिसूतिसूयतिधूञूदितो वा) इत्यनेन वैकल्पिक इड् भवति, अतः इडभावपक्षे रुपमिदमत्र बोध्यम्। पृषोदरादित्त्वात् षकारलोपश्च करणीयः।

अथवा

'लोकारिरक्षया'–इतिसमस्ते पदे, लोकस्य अरिरक्षया इति षष्ठीतत्पुरुषसमासे, पृषोदरादित्त्वात् सवर्णदीर्घ प्रबाध्य पररुपे कृते रूपं बोध्यम्, एवञ्च अरेः रक्षा, इत्यर्थे पञ्चमीतत्पुरुषसमासो बोध्यः। अर्यवधिंक रक्षणं लोकस्येति व्याख्याने प्रयोगः साधुः।

लकारार्थे

**15. दुह्यन्ति–1/14/19**

दुह् धातोः कर्मकर्त्तरि लट्लकारे, 'न दुहस्नुनमां......' इत्यनेन यक्–निषेधे, कर्मवद्भवेनात्मनेपदे च कृते वहुवचने 'दुहते' इति प्रयोक्तव्ये 'दुह्यन्ति' इति प्रयोग आर्षः।

कर्मकर्त्तरि नायं प्रयोगः क्रियाकृतवैलक्षण्याभावात्। अत; कर्त्तरि एवायं प्रयोगः यदि कर्त्तरि प्रयोगस्तर्हि 'दुहति' इत्येवं रूपेण भवितव्यम्।

'गणकार्यमनित्यम्'–इत्यनया परिभाषया दुह्धातोः अदादित्वप्रयुक्तशब्लुगभावे, दैवादिकत्त्वात् श्यन् बोध्यः, न तु यक्, इतिरुपं साधु।

कृदन्ते

**16. प्रेक्षयित्वा–3/23/43**

'प्रेक्ष्य'–इति ल्यबन्ते प्रयोक्तव्ये 'प्रेक्षयित्वा' इति प्रयोग आर्षः।

'प्र'–इति उपसर्गप्रतिरुपकमव्ययपदं पृथक्, 'ईक्षयित्वा'–इति पृथक् क्रियाबोधकं कृदन्ते पदमितिकृत्वा समासाभावात् न ल्यप् रूपं साधु।

अथवा

प्रति = पूरयतीति प्र, हे प्र! = हे राजन्। इतिकृत्वा 'प्र' – इति पृथक् सम्बोधनान्तं पदं न तु अव्ययसंज्ञकम्, अतो न ल्यपः प्रवृत्तिः, रूपं साधु।

**17. त्रायता–7/8/42**

'त्रैङ् पालने' – इत्यस्य धातोर्ङित्वेन आत्मनेपदित्त्वात् शानचि, मुगागमे च कृते 'त्रायमाणेन'–इति प्रयोक्तव्ये, 'त्रायता' इति प्रयोग आर्षः।

'त्रायते'–इति त्राः कर्तरि अणि, (आतोयुक्......) इति युकि, त्राय इति, ततः त्राय इवाचरम्तांति इतिसाधु।

त्राणं त्रा भावे विचि, तत्र यतते असौ 'त्रायत्' क्विपि सिद्धः, तेन 'त्रायता' = रक्षणे = त्राणे यत्नशीलेनेत्यर्थे रुपं युक्तमेवसाधु।

छन्दोभङ्गभियाशब्दवैरुप्ये

**18. कषाणकण्डूः – 2/7/13**

'अत्र कषण–कण्डूः' इतिप्रयोक्तव्ये 'कषाणकण्डूः' इतिदीर्घाकारयुक्तः प्रयोग आर्षः। छन्दोभङ्गभिया छन्दोऽनुरोधेन दीर्घकारघटितः प्रयोगः कृत;, परं सोऽसाधुः।

कष् धातो र्लिटः कानच्। कानचः छन्दोविषयत्त्वेऽपि कवयो नाद्रियन्ते छान्दसत्त्वं तस्य, अतएव सिद्धान्तकौमुद्यामुक्तं ''कवयस्तु बहुलं प्रयुञ्जते'' उदाहृतं च तत्रैव, ''तं तस्थिवांसं नगरोपकण्ठे'' ''अधिजग्मुषे'' इत्यादि कालिदासवाक्येषु, तत्ववोधिन्यां गतानुगतिकया, इत्युक्तम्। तथा च कवीनां सम्प्रदाय इत्यायातम्। अतएव ''लिटः कानज्वा'' इत्यत्र सूत्रे छन्दसीति न अनुवर्त्तते, इति मन्यन्ते कवयः।

तथा च यस्य गोत्रं विधारयतो निद्रैव क्षणः उत्सवो भूत्, अद्रिपरिवर्त्तेन च स्वं पृष्ठं कषाणस्य कण्डूरभूत्–इति वाक्ययोजनायां न काऽपि विप्रतिपत्तिः। रुपं साधु।

अथवा

कषणं = कषः 'घञर्थे कः' इति कप्रत्यये, ततः कषमानयतीति विग्रहे कर्मण्यणि कृते रुपं साधु। 'अन् प्राणने' इतिधातोरिति।

**19. भिन्न नवः – 7/11/24**

समासान्तानामनित्यतया कपोऽभावेऽपि (गोस्त्रियोरुपसर्जनस्य इति सूत्रे 'स्त्रीति'– स्त्रयर्थबोधक ङीबादि–टावादि–ऊङादीनां च ग्रहणात् ''नौः'' इत्यत्र ह्रस्वत्वाप्राप्त्या 'भिन्ननावः' इति प्रयोक्तव्ये, 'भिन्न नवः' इति ह्रस्वघटितः प्रयोगः कृतः, छन्दोभङ्गभिया। परं प्रयोगस्तु आर्षः।

चित्रगुरित्यत्र न गोशब्दस्य ह्रस्वत्वे कृते गुशब्दः, किन्तु गुशब्दो अपूर्व एव गोशब्दस्य प्रसङ्गे प्रयुज्यते यथा, तथैव ''नौ''–शब्दवन्नुशब्दोऽप्यस्ति, तदर्थक एवेति।

शब्दनित्यवादेनेदमुक्तं समाधानम्' अत एव 'सूनुना' 'सूनावा' इत्यादयः प्रयोगाः नपुंसके सिद्धाः।

अयच्च शब्दनित्यत्ववादो मुनित्रयसम्मतः। 'सिद्धेशब्दार्थसम्बन्धे' इत्यत्र भाष्यवार्त्तिककारयोः सम्मतिः। 'सर्वे सर्व पदादेशाः'–इति पाणिनेरपि सम्मतिर्विज्ञाता भवतीति। रुपं साधु।

**20. जिजीषवः–10/68/43**

सन्नन्तात् जीव् धातोः कर्तरि 'उ' – प्रत्यये, प्रथमाया बहुवचने ''जिजीविषवः''– इतिप्रयोक्तव्ये, ''जिजीषवः'' – इतिप्रयोग आर्षः।

भ्वादिगणस्याकृतिगणत्त्वात् 'जिञ्' जीवने धातुः कल्प्येत, कल्पितस्यैतस्यजिञ्'– धातोः सनिप्रत्यये, तदन्तात् कर्तरि 'उ'–प्रत्यये प्रथमाबहुवचने रूपं साधु।

श्रीधरस्वामिनस्तु 'जिजीविषवः' इति पठन्ति, अक्षराधिक्यं च सोढव्यमिति व्याचष्टे। यद्यपि केचन अखिपन्ति, यत्

**यान्युब्जहार माहेशाद् व्यासो व्याकरणार्णवात्।**

**तानि किं पदरत्नानि मान्ति पाणिनिगोष्पदे।।**

तदापि ऊन् प्रति निवेछते, यत् परिच्छिवे गर्मरपावे = पाणिनीय व्याकरणे, समग्रसमृद्र

**'काव्य–शाख–चिनोदेन...'**

**सन्दर्भगन्थाः –**

1. ल0 सि0 कौ0
2. सि0 कौ0
3. प्रौढमनोत्या
4. शरेन्दुशेखर श0 शेखर
5. परिभाषेन्दु शेखर परि, शेखर
6. व्यु. वाद
7. शान्ति वाद
8. का0 वृत्ति
9. प्र0 कौ0
10. भागवत्
11. अन्वि. प्रकाश
12. श्री घरि

# शव्द्प्रतिपत्तिजनकं व्याकरणम्

प्रकाश कुमार त्रिपाठी

उपक्रमः -

विश्वस्य निखिलाास्वपि प्रत्नासु भाषासु देववाणी संस्कृतभाषा उच्चैस्तमां विराजते। अस्यां भाषायां हि भारतीयसंस्कृतेः, धर्मस्य, आचरस्य, इतिहासस्य दर्शनविज्ञानानाम् अष्टादशपुराणप्रभृतीनां ज्ञानं सन्निहितं विद्यते। या भाषा समृद्धं साहित्यं शील्पज्ञानं निरवच्छिन्नप्रज्ञाप्रवाहमादत्ते। ऋक्-वेदे बाक्निबन्धनं विश्वमिति प्रपञ्चितम्। तथाहि- अहमेव वात इव प्रवामि, भुवनानि विश्वा[१]। वाक्यपदीये भत्तृहरिणा समुल्लिखितं यत्-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिवज्ञानं सर्वं शब्देन भासते।[२]

अत्र सर्वमेव ज्ञानं शब्दमयत्वात् भाषामन्तरा ज्ञानप्रकाशप्रक्रिया नितरामसम्भवा इति। भ्वादिगणीय 'भाष्-व्यक्तायां वाचि'' धातोः निष्पन्नोऽयं भाषाशब्दः, तेन भाष्यते अभिव्यज्यते वाग् रुपेण इति भाषा। काव्यालङ्कारकृता भामहेन भाषापरिभाषा इत्थं प्रपञ्चिता सत्-

इयन्तःइदृशाशब्दा ईदृगर्थाभिधायिनः।
व्यवहाराय लोकस्य प्रागित्थं समयः कृतः।।[३]

सर्वशक्तिमयी सर्वव्यापिनीमनोभावप्रकाशिनी भाषाज्ञानविज्ञानधर्म दर्शनाचारविमण्डिता सती आत्मनि रमते इति। तथा च शतपथब्राह्मणे वागेव प्रजापतिः।[४] भाषा हि सक्तुमिव तितउ द्वारा यथा शुद्धं क्रियते तथा मनसा वाचं इति ऋग्वेदः ब्रवीति -

''सक्तुमिव तितउना पुनन्तो यत्रधीरा मनसा वाचमक्रत।''[५]

शतपथब्राह्मणेऽपि भाषा विश्वरुपा इति वक्तुम् –
''वागवै विराट् इति उल्लिखितः। ''[६]

**प्रयोगविज्ञाने भाषा -**

शब्दानां ज्ञाने सौकर्य तथा च तेषां शब्दना प्रयोगार्हता च आवश्यकी। तदर्थं पदविधिव्यवस्था विद्यते। लोकव्यवहारनिमित्तं 'समर्थपदविधि'[७] इति सूत्रं यथार्थम्। यत्र सामर्थ्याश्रितं पदविधिरुपं कार्यमपरिहार्यम्। महाभाष्ये शब्दानामनुशासननिमित्तम् ''अथ शब्दानुशासनम्''[८] इति पंक्तिः संदृश्यते। महाभाष्ये एवं प्रकटितं यत् शब्दानां केवलं न ज्ञाने धर्मः, नाऽपि प्रयोगे। तदर्थ वात्तिकमुपन्यस्तम्- ''शास्त्रपूर्बक प्रयोगे अभ्युदयस्ततुल्यं वेदशब्देन''[९]। अत्र उच्यते शास्त्रपुर्वकं यः शब्दान् प्रयुङ्क्ते स एव अभ्युदयस्य अधिकारी भवति। पदप्रयोगविज्ञाने माङ्गलिकशब्दानां व्यवहारः शास्त्रसम्मतः तदेव ब्रह्मसूत्रभाष्ये व्याख्यातम्।

''ऊँ कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा

कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।"[१०]

यास्केन लोकव्यवहारवोधकं भाषाशब्दं स्वनिरुक्ते प्रत्यपादि। यथा- 'भाषायामन्वध्यायञ्च'।[११]

पाणिनिना अपि अष्टाध्याय्यां भाषाशब्दम् अधिकृत्य सूत्रं व्यरचि। "प्रथमायाश्च द्विर्बचने भाषायाम्"।[१२] तत्र प्रयोगविज्ञानमिह भाषाभित्तिक-प्रायोगिक-कौशलम् अथवा व्यवहारिकं ज्ञानं इति वोध्यम्। विज्ञानं नाम विविधज्ञानं विज्ञानम्। विशिष्टज्ञानं विज्ञानम् इति व्युत्पत्तिः दृश्यते भगवद्गीतायाम्

"सर्वभुतेषु येनैकं भावमव्ययमीक्षते।

अविभक्तं बिभक्तेषु तज्ज्ञानं विद्धि सात्विकम्।।"[१३]

अमरकोषे मुख्यविषयं विहाय शील्पशास्त्रादिज्ञानं विज्ञानमुच्यते यथा- मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शील्पशास्त्रयोः।[१४] पूर्णाङ्गबोधनिमित्तं स्वस्याभिव्यक्तेः परिप्रकाशार्थं पदप्रयोगः नितरामावश्यकत्वात् प्रयोगज्ञानम् अपेक्षीतम्। यद्यपि वर्णपदवाक्येषु व्यवहारिकशक्तेः विद्यमानत्वेऽपि तत्त्वतः तेषु पारमार्थिकतया नास्ति कश्चित् अवयवः। अतः भर्तृहरिः कथयति-

" पदेन वर्णाः विद्यन्ते वाक्येष्ववयवा न च

वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।"[१५]

वर्णानां पदानां वाक्यनाम् अनित्वत्वेपि तेषां सम्बन्धःप्रयोग विज्ञाने अपरिहार्यः।

**सृष्टिहेतुः शब्दः**

निगमागमादिभिरपि तेनैव नित्यशब्देन जगदुत्पत्तिर्गीयते। अथाहि- "शम्भुरिति व्याहरन्, भूमिमसृजत् इति"[१६]। "भूरिति वै प्रजापतिः, आत्मानमजनयत्"[१७] इति। मनुरपि मन्यते- सर्वेषां तु सनामानि कर्माणि च पृथक् पृथक्।[१८] वेदशब्देभ्यः एवादौ पृथक् संस्थाश्च निर्ममे। इति। अद्यावधि नैकाः भाषाः व्यवहृताः तिष्टन्ति। भाषाविज्ञानं तासां तसासं भाषाणां स्वरुपं प्रमुख तया विश्लेषयति। व्याकरणं भाषाः नियमयति। तथापि भाषायाः स्वरुपं सर्वत्र एकमेव मुख्यस्वरुपं विविच्यते अधस्थात् सर्वोत्कृष्टाज्योतिः- सदसदबोधयित्री भाषा ज्योतिः मानवहृदयस्य अन्धकारं दूरीकृत्य ज्ञानलोकं प्रददाति। तां विना सविकल्पकं ज्ञानं न भवति। यदुच्यते प्रसिद्धभाषाविज्ञानिना आचार्यप्रवरेण भर्तृहरिणा-

" वाग्रुपता चेन्निष्क्रामे दबोधस्त शाश्वती

न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिणी।"[१९]

"अत्यन्तासत्यस्यापि ह्यर्थे ज्ञानशब्दं करोति।" उक्तञ्च दण्डिना

"इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्

यदि ....... ज्यतिरासंसारं न दीप्यते।"[२०]

सर्वव्यापिनी सर्वशक्तिमयी च-व्यक्तिविशेषतो विश्वं यावत् समस्तो व्यवहारो भाषायामेव भवति। ज्ञानविज्ञानयोः, धर्मदर्शनयोः, आचारविचारयोः, हेयोपादेयविवेकस्य च आचारभूता भाषैव। सर्वशक्तिमयी भाषा नवीनां सृष्टिं रचयति।

**उपसंहारः-**भाषाद्वारा एव विश्वस्य सर्वाणि कर्माणि क्रियन्ते। यथोक्तम्- ''वाग्वै विराट्''।[२१] ''वाग्वै विश्वकर्माणि।''[२२] वाग्वै प्रजापतिः ''।[२३]

''अहमेव वात इव प्रवामि, आरभ्यमाणा भुवनानि विश्वा''।[२४]

तथाच- ''इति कर्तव्यता लोके सर्वा शब्दव्यपाश्रया।''[२५]

जन्मना वाक्शक्तिः लब्धा। किन्तु शब्दार्थयो सम्वन्धः समजायतः अनुशिष्यते। पितृभ्यां शिक्षिताभाषा पैतृकसम्मत्तिः कथायितुं न शक्या। वने त्यक्तो बालकः किमपि कथयितुं न पारयति अतः जन्मसिद्धा।

महाभाष्ये कथितं - ''लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः।'' यदि शब्दनां नित्यत्वे लोक एव प्रमाणं तर्हि पाणिण्यादिव्याकरणशास्त्रेण किं प्रयोजनम्? इति प्रश्नमुत्तरयता वर्त्तिककारेण ''लोकतोऽर्थङ्क्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः'' इति प्रतिपादितम्। धर्मनियमपदे त्रिविधा व्युत्पत्तिः प्रदर्शिता -

(१) धर्माय- प्रत्यवायपरिहाराय नियमः- साधुशब्दैरेवार्थः प्रतिपादनीयः नासाधुशब्दैरित्यैवंरुपः

(२) धर्मार्थः नियमः- इत्यत्र साधुभिर्भाषितव्यम्- इत्येवं नियमस्य धर्मार्थत्वान्नियमोऽपि धर्मपदेनौच्यते। एवञ्चात्र कर्मधारयः।

(३) धर्मप्रयोजनो नियमो धर्मनियम- इति तृतीयव्याख्याने प्रयोजनशब्दः कर्माणि ल्युडन्तः- प्रयुज्यते इति प्रयोज्यार्थकततया धर्म प्रयोजकः नियमः प्रयोज्य इत्यर्थः। स च धर्म 'अपूर्व' नाम्ना मीमांसादौ प्रसिद्धः।

शब्दप्रतिपत्तिःबुद्धिगम्या भवति। भाषा तत्र माध्यमभूता, व्याकरणम् तु साधुत्वं सृजति। तस्मात् शाव्दवोधवैशद्याय साधुशब्दज्ञानाय च भाषा तथा व्याकरणम् प्रयोजनत्वेत वरीवर्त्तते इति।

पादटीका:

(१) ऋ.वे १०-१२०-८ (१५) बा.प.ब्र-७३
(२) वा.प १-१२२ (१६) तै.उ-२/२/४/२
(३) का.अ ६/३ (१७) श.ब्रा-२/१/४/१३
(४) श.व्रा ५.१.५.६ (१८) म.स्मृ.-१/२९

(५) ऋ.वे १०.७१.२
(६) शत ३.५.१.३४
(७) पा.सू२.१.१
(८) म.भा.पस्पश
(९) म.भा.वा
(१०) व्र.सू.भा.भा -१
(११) नि-१/४
(१२) पा.सू-७-२-८-८
(१३) भ.गी-अध्याय-१८-२०
(१४) अ.को-५-६
(१९) वा.प-१/१२५
(२०) का.द.१/४
(२१) श.ब्रा-३/५/१/३४
(२२) श.ब्रा-८/१/२/९
(२३) श.ब्रा-५/१/५/६
(२४) ऋ.-१०/१२५/८
(२५) वा.प.-१/१२२

**Ph.D Scholar(Sanskrit)**
**Maharaja Sriram Chandra**
**Bhanja Deo University**
**Takatpur, Baripada, Mayurbhanj**

# प्रत्यक्षप्रमा प्रत्यक्षप्रमाणानाम् मीमांसा

डॉ0 अनिलानन्दः(असिस्टेन्ट प्रोफेगर) वेदान्त
श्री रंगलक्ष्मी आदर्श संस्कृत महाविद्यालय, वृन्दावन, मथुरा

इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् इति नैयायिकाः। वेदान्तिनां मते तु नेदं प्रत्यक्षलक्षणं भवितुम् अर्हति तथा सति स्मृत्यनुमित्योः अपि मनोरूपेन्द्रियजन्यत्वेन प्रत्यक्षत्व प्रसंगात्। ननु मानसप्रत्यक्षे मनः इन्द्रियत्वावच्छिन्नरूपेण कारणम्, स्मृत्यनुमित्योस्तु मनस्त्वरूपेण इति नातिव्याप्तिः इति चेत्। उच्यते–एवं सति स्मृत्यनुमित्योः अतिव्याप्तिः निवृत्ता भवेत् सत्यम् परन्तु यैः मनसः इन्द्रियत्वं न स्वीक्रियते, तेषां मते लक्षणम् इदं सुखदुःयादिमानसप्रत्यक्षे अव्याप्तं भवेत् सुखदुःखादिप्रत्यक्षाणां इन्द्रियाजन्यत्वात्, केवलमनोजन्यत्वात् च। अपि च ईश्वरस्य इन्द्रियाभावत् लक्षणम् इदं ईश्वरप्रत्यक्षे अपि अव्याप्तं स्यात्।

विषयेण सह साक्षात्सम्बन्धे सत्येव प्रत्यक्षज्ञानम् उदेति इति विषयम् अवलम्ब्य एव प्रत्यक्षलक्षणं करणीयम् इति केचन वदन्ति। तेषां मते 'विषयजन्यज्ञानं प्रत्यक्षम्'१। तदपि न संगतम्, मनोविशेष्यकानुमितेः प्रत्यक्षत्वप्रसंगत्। तथा हि 'मनः इन्द्रियं प्रत्यक्षज्ञानकरणत्वात् चक्षुरादिवत्' इति अनुमाने मनसः चक्षत्वेन विषयत्वम् अपि। एवं च मनो विशेष्यकानुमितेः मनोरूपविषयजन्यत्वेन तत्र उक्त प्रत्यक्षलक्षणम् अतिव्याप्तम्। सुखादिप्रत्यक्षे च लक्षणमिदम् अव्याप्तम्। तथा हि सुखादिकं, सुखाद्याकारावृत्तिश्च युगपत् उदेति इति वेदान्तिभिः स्वीकारात् सुखाद्याकारा वृत्तिः न सुखरूप विषयजन्या, युगपदुत्पन्नयोः वस्तुनोर्मध्ये जन्यजनकभावात्। अपि च विषयजन्य ज्ञानस्य प्रत्यक्षत्वे विषयस्यैव प्रत्यक्षजनकत्वम् इति वक्तव्यम्। तत्र च प्रत्यक्षजनकतायाः किम् अवच्छेदकम् इति प्रश्नः। न तावत् विषयत्वं तज्जनकतायाः अवच्छेदकम् इति वक्तव्यम्, अनुमित्यादिज्ञानज्ञेयेसु विषयेषु अपि विषयत्वरूपधर्मस्य विद्यमानत्वात्। प्रत्यक्षज्ञानविषयत्वं प्रत्यक्षातिरिक्तज्ञानविषयेषु न वर्त्तते, प्रत्यक्षज्ञानविषयेषु तु वर्त्तते इति तदेव प्रत्यक्षजनकतायाः अवच्छेदम् इत्यपि न वक्तव्यम्। प्रत्यक्षज्ञानाववोधार्थं प्रत्यक्षविषयत्वं ज्ञातव्यम्। प्रत्यक्षविषयत्वाववोधार्थं च प्रत्यक्षज्ञानम् अपेक्षणीयम् इति परस्पराश्रयदोषप्रसंगत्१। एवं विषयं अवलम्ब्य प्रत्यक्षलक्षणनिरूपणं न सम्भवति।

ज्ञानम् अवलम्ब्य प्रत्यक्षलक्षणनिरूपणम् अपि असम्भवि। तथाहि ज्ञानाजन्यज्ञानत्वं साक्षात् त्वम् इति केचित्, यत् ज्ञानं ज्ञानान्तरेण न जन्यं तत् प्रत्यक्षम् इत्यर्थः अनुमित्यादिज्ञानानि प्राक्तनं ज्ञानान्तरम् अपेक्ष्य उत्पद्यन्ते एव उत्पद्यते इति ज्ञानं न प्रत्यक्षस्य कारणम् इति प्रत्यक्षस्य ज्ञानाजन्यत्वम्, तदपि न समीचीनम्, दण्डी पुरुषः इति प्रत्यक्षस्य दण्डज्ञानजन्यत्वात् तत्र लक्षणम् इदम् नान्वेति। ननु एवं सति ज्ञानाकरणकज्ञानत्वं प्रत्यक्षत्वं भवतु। यस्य ज्ञानस्य ज्ञानान्तरं करणं न भवति तत् प्रत्यक्षम्। अनुमितौ व्याप्तिज्ञानं करणम्, उपमितौ सादृश्यज्ञानं करणम् शब्दवोधे पदज्ञानं करणम्, अर्थापत्तौ अनुपपत्तिज्ञानं करणम्, अनुपलब्धौ प्रतियोगिज्ञानं करणम्, प्रत्यक्षे तु विषयेन्द्रियसंयोगः एव करणं न तु किमपि ज्ञानम् इति ज्ञानाकरणकज्ञानत्वं प्रत्यक्षे एव संगतम्। न चेदं लक्षणं दण्डीपुरुषः इति प्रत्यक्षज्ञाने अव्याप्तम्, दण्डज्ञानस्य दण्डीपुरुषः इति प्रत्यक्षज्ञाने साधारणकारणत्वे अपि करणत्वाभावात् इति चेत्। नैतदपि समोचोनम् स्मृतौ अतिव्याप्तेः। स्मृतौ हि संस्कार एव करणम्, संस्कारश्च न ज्ञानम् इति स्मृतेरपि ज्ञानाकरणकज्ञानत्वात् तत्र लक्षणम् इदम् अतिव्याप्तम्। ननु संस्कारस्य पूर्वानुभवजन्यत्वात् संस्कारं द्वारोकृत्य पूर्वानुभवः एव स्मृतौ करणम् इति स्मृतेः ज्ञानकरणकत्वात् तत्र नातिव्याप्तिः इति चेत्। तर्हि प्रत्यभिज्ञायाम् अपि संस्कारं द्वारीकृत्य पूर्वानुभवः करणत्वेन स्वीकारणीयः इति तत्र नेद लक्षणं संगतं भवेत्। एवं ज्ञानम् अवलम्ब्य प्रत्यक्षलक्षणनिरूपणम् अपि न सम्भवति।

धर्मराजाध्वरीन्द्राणां मते ज्ञानत्वं प्रत्यक्षत्वम्। प्रत्यक्षप्रमा चात्र चैतन्यमेव। तथा च श्रुतिः 'यत् साक्षादपरोक्षात् ब्रह्म' इति२। अद्वैतिनां मते ज्ञानं स्वप्रकाशं स्वतः प्रमाणं च इति ज्ञानस्य अपरीक्षत्वं प्रत्यक्षत्वं वा स्वाभाविकम् एव। ज्ञानम् अस्ति चेत्, प्रमाणान्तरनैरपेक्ष्येण स्वतः एव आपरोक्ष्येण ज्ञायते। तदेव ज्ञानं प्रत्यक्षज्ञानम्।

ननु ज्ञानत्वं प्रत्यक्षत्वं चेत् अनुमानादीनामपि ज्ञानत्वात् प्रत्यक्षत्वापत्तिरिति चेत्। सत्यम्, अनुमानादीनामपि ज्ञानांशे प्रत्यक्षत्वम् अस्त्येव, विषयांशे तु प्रत्यक्षत्वं नास्तोति तत्र तत्र नातिव्याप्तिः। 'पर्वतो वह्निमान् इत्यादौ अपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात्'। अत्रायं भावः–विशिष्टज्ञानस्य तावत् अंशद्वयमस्तिज्ञानांशः विषयांशश्चेति तत्र ज्ञानांशे विषयांशः अध्यस्तः। स्वप्रकाशः ज्ञानांशश्च विषयांशं प्रकाशयति। अतः ज्ञानस्य प्रत्यक्षेण तत्र अध्यस्तानां घटादिविषयामपि प्रत्यक्षं भवति। तत्र ज्ञानांशः नित्यः स्वप्रकाशश्च इति तत्र चक्षुरादिकरणानाम् अपेक्षा नास्ति। कल्पिते विषयांशे तु चक्षुरादानाम् उपायोगिता अस्ति इति विषयांशप्रत्यक्षे चक्षुरादीनां करणत्वात् तेषां प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम् इति प्रत्यक्षप्रमाणसंज्ञा। प्रत्यक्षघटज्ञानविषयः घटः चक्षुरादीन्द्रियाणां गोचरीभूतः इति घटज्ञानं प्रत्यक्षम्, अनुमेयवह्निज्ञानविषयः वह्निस्तु न चक्षुरादिगोचरीभूतः इति तत्र वह्निज्ञानं न प्रत्यक्षम्।

अतः विषयस्य प्रत्यक्षतां परोक्षतां च ज्ञाने आरोप्य गौणत्वेनैव ज्ञानस्य प्रत्यक्षत्वं परोक्षत्वं च उच्यते। ज्ञानं तु सदैव प्रत्यक्षं स्वप्रकाशं च। प्रत्यक्षप्रमायाम् इन्द्रियाणां करणत्वं च जन्यघटादिप्रत्यक्षविषयम्। ज्ञानस्य तु नित्यत्वात् न तत्र करणापेक्षा अस्ति। अत्र स्वप्रकाशं ज्ञानमेव मुख्यं प्रत्यक्षं, घटादिप्रत्यक्षं तु गौणत्वेनैव प्रत्यक्षम्। अस्मिन् गौणप्रत्यक्षे तु इन्द्रियस्य करणत्वात् 'इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्' इति लक्षणं वक्तुं शक्यते।

ननु तथापि विषयप्रत्यक्षे यः ज्ञानांश सोऽपि अखण्ढज्ञानस्यैव सखण्डः प्रकाशः इति नित्यत्वात् तत्र चक्षुरादिकरणानां कः उपयोगः? न हि ज्ञानं चक्षुरादिना गृह्यते, अपि तु विषयः एव। अपि च, तस्मिन् ऐन्द्रियकज्ञाने यः घटादिविषयांश, तस्य जडत्वात् ज्ञानभिन्नत्वात् तस्मिन् विषयांशे प्रमाकरणं प्रमाणम् इति ज्ञानावलम्बिनः प्रमाणस्य लक्षणं कथं संगच्छते? उच्यते, स्वरूपचैतन्यस्य अखण्डत्वे अपि घटाकिकम् अवलम्ब्य यत् चैतन्यं प्रकाशते तत् सखण्डं जन्यं च, न नित्यम्। तच्च परिच्छिन्नं ज्ञानं चक्षुरादीन्द्रियैः जन्यते इति घटादिविषयकं विशेषज्ञानम् इन्द्रियजन्यमेव। ननु जडम् इन्द्रियं कथं स्वप्रकाशस्य ज्ञानस्य कारणं भवति? उच्यते–अत्र ज्ञानम् अन्तःकरणवृत्तिः। तथाहि चक्षुरादीन्द्रियद्वारा वहिः निर्गच्छत् अन्तःकरणं विषयदेशं गत्वा विषयाकारेण परिणमते। अयं अन्तःकरणस्य विषयरूपेण परिणामः वृत्तिः इत्युच्यते। सा च वृत्तिः इन्द्रियजन्या, इन्द्रियविषयोः संयोगानन्तरं तस्याः उत्पादात्। तया वृत्त्या घटादिविषयकम् आवरणं दुरीकृत्य विषयः इन्द्रियगोचरः क्रियते। इयम् एव घटस्य प्रत्यक्षता। तथा च विषयेन्द्रिययोः संयोगवशात् अन्तःकरणवृत्तिः उदेति इति इन्द्रियजन्या वृत्तिः, वृत्तिजन्यं च ज्ञानम्। ननु एवंसति इन्द्रियाणं प्रत्यक्षे करणत्वं प्रमाणत्वं वा नास्ति, करणस्य अव्यवधानेन व्यापारोत्तरक्षणावच्छेदेन वा कार्यजनकत्वनियभात् इन्द्रियाणां तु व्यवधानेन प्रमाजनकत्वाद् इति चेत्? उच्यते–अत्र वृत्तेः उदये लये च घटादिज्ञानस्य उदयः लयश्च इति वृत्तिरपि गौणत्वेन ज्ञानपदवाच्या। ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः तदुक्तं विवरणे–'अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्' इति। सा च वृत्तिः इन्द्रियजन्या, इति गौणत्वेन ज्ञानपदवाच्यां वृत्ति प्रति गौणत्वेनैव इन्द्रियाणां करणत्वम्। वस्तुतः इन्द्रियं न घटादिकज्ञानकरणम्, घटादिज्ञानस्य अन्तःकरणवृत्तिजन्यत्वात् एवं च जड़घटादि विषयांशे चक्षुरादीन्द्रियाणां करणत्वे अपि तेषां 'प्रमाकरणं प्रमाणम्' इत्येवं प्रमाणसंज्ञाभिधानयोग्यत्वं नास्ति।

**प्रत्यक्षत्व–प्रयोजकम्—** भामती प्रस्थान–विवरण–प्रस्थानयोः मतभेदः–

प्रत्यक्षे तावत् अंशद्वयं वर्त्तते–इदं घटज्ञानम् इति ज्ञानांशः, अयं घटः इति विषयांशश्चेति। तयोर्मध्ये आद्यं ज्ञानगतप्रत्यक्षम्, द्वितीयं विषयगतप्रत्यक्षम्। तत्र इदं प्रत्यक्षज्ञानम् इति प्रत्यक्षत्वव्यवहारे च कः हेतुः प्रयोजकः वा इति प्रश्नस्य समाधानविषये भामतीपन्थिनां विवरणपन्थिनां च मध्ये मतभेदः अस्ति।

भामतीपन्थिनः मानाधीना मेयसिद्धिः इति न्यायमतम् अनुसृत्य प्रत्यक्षप्रमाणम् अवलम्ब्य प्रत्यक्षज्ञानद्वारा प्रत्यक्षविषयं प्रतिपादयन्ति। तथा च प्रत्यक्षप्रमाणजन्यं ज्ञानं प्रत्यक्षज्ञानम्, एतादृशप्रत्यक्षज्ञानस्य विषयत्वं च विषयगतप्रत्यक्षत्वम् इति तेषां मतम्। प्रमाणप्रत्यक्षतानिवन्धना ज्ञानप्रत्यक्षता, ज्ञानप्रत्यक्षतानिवन्धना च विषयप्रत्यक्षता इत्यर्थः। विवरणपन्थिनस्तु वैपरीत्येन विषयस्य प्रत्यक्षत्वम् आदौ प्रतिपाद्य तदवलम्ब्य प्रत्यक्षज्ञानं निरूपयन्ति, तद्द्वारा च प्रत्यक्षप्रमाणम् अवधारयन्ति। तथा च साक्षात् अपरोक्षविषयस्यैव विषयगतप्रत्यक्षत्वम्, प्रत्यक्षविषयम् अवलम्ब्य यत् ज्ञानम् उदेति तत् प्रत्यक्षज्ञानम्, एतादृशप्रत्यक्षज्ञानस्य साक्षात्साधनं च प्रत्यक्षप्रमाणम् इति तेषां मतम्। विषयप्रत्यक्षतानिवन्धना ज्ञानप्रत्यक्षता, ज्ञानप्रत्यक्षतानिवन्धना च प्रमाणप्रत्यक्षता इत्यर्थः।

भामतीपन्थिनां मते प्रत्यक्षज्ञानस्य स्वरूपम् अनवधार्य विषयप्रत्यक्षता निरूपयितुं न शक्यते इति विषयप्रत्यक्षम् अवलम्ब्य प्रत्यक्षज्ञानस्वरूपनिर्धारणं न सम्भवति। परं तु विषयगतप्रत्यक्षस्य स्वरूपम् अनवधार्यापि स्वातन्त्र्येण ज्ञानगतप्रत्यक्षनिरूपणं सम्भवति इति प्रत्यक्षज्ञानस्वरूपमेव आदौ निर्णेयम्, तदनन्तरं च विषयगतप्रत्यक्षं निर्धारणीयम् इति तेषां मतम्। एवं च एतेषां मते वस्तुतः ज्ञानगतप्रत्यक्षमेव प्रत्यक्षम् इत्यायाति। विवरणपन्थिनां मते तु विषयगतप्रत्यक्षम् अनवधार्य ज्ञानगतप्रत्यक्षनिर्धारणं न सम्भवतीति ज्ञानगतप्रत्यक्षम् अवलम्ब्य विषयगतप्रत्यक्ष निर्धारणं न युक्तम्। परं तु प्रत्यक्षज्ञाननिरूपणं विनैव स्वातन्त्र्येण विषयगतप्रत्यक्षनिरूपणं सम्भवतीति विषयगतप्रत्यक्षम् एव आदौ निर्धारणीयम्, तदनन्तरं च ज्ञानगतप्रत्यक्षं निर्धारणीयम् इति तेषां मतम्। एवं च एतन्मते वस्तुतः विषयगतप्रत्यक्षम् एव प्रत्यक्षम् इति फलति।

प्रत्यक्षस्वरूपनिर्धारणे भामतीपन्थिनां विवरणपन्थिनां च योऽयं मतभेदः, तत्र इदं मूलकारणम्–भामतीपंथिनां मते कारणविशेषनिबन्धनः एव ज्ञानस्य अपरोक्षत्वव्यवहारः। प्रमाणस्वरूपानुरूपं हि प्रमाणगम्यस्य प्रमेयस्य वा स्वरूपं भवति। प्रमाणं यादृशं प्रमेयमपि तादृशं भवेत्, न हि कदापि कारणस्वभावविरुद्धं कार्यं भवति इत्यर्थः। तथा च प्रत्यक्षप्रमाणम् अवलम्ब्य यत् ज्ञानम् उदेति तत् प्रत्यक्षज्ञानम्, तस्य प्रत्यक्षज्ञानस्य विषयश्च प्रत्यक्षविषयः इत्यवधेयम्। परोक्षप्रमाणात् उत्पन्नं ज्ञानं परोक्षम् एव भवति, न तु कदापि प्रत्यक्षम्। एवं च वेदान्तशास्त्रश्रवणादिभ्यः यत् ब्रह्मज्ञानम् उदेति तस्य परोक्षशब्दप्रमाणजन्यत्वात् परोक्षत्वम् एव। परब्रह्मविषये निरन्तरनिदिध्यासनादिना तु अन्ते एतत् ब्रह्मज्ञानं प्रत्यक्षात्मकं भवति इति भामतीपन्थिनः।

विवरणपन्थिनस्तु नैतत् स्वीकुर्वन्ति। तेषां मते ज्ञानस्य अपरोक्षत्वव्यवहारः न करणविशेषनिबन्धनः, अति तु विषयविशेषनिवन्धनः। विषयस्य प्रत्यक्षत्वेनैव तद्गतज्ञानस्य प्रत्यक्षत्वं निर्धारणीक्षम् इत्यर्थः। प्रत्यक्षप्रमाणजन्यज्ञानस्य प्रत्यक्षत्वे स्वीकृते परोक्षेण शब्दप्रमाणेन शास्त्रेण वा उत्पादितस्य ब्रह्मज्ञानस्य परोक्षत्वं भवेत्। ब्रह्मज्ञानस्य परोक्षत्वे च ब्रह्मजिज्ञासायाः मूलोत्पाटनमेव स्यात्, यतः परोक्षेण ब्रह्मज्ञानेन प्रत्यक्षस्य अज्ञानस्य नाशः न सम्भवति इति मोक्षाशा निरर्थिका भवेत्। तथा च तत्त्वमस्यादिवाक्यजन्यज्ञानस्य अपरोक्षत्वं स्वीकारणीयम् इति एतेषां मतम्। एतदपोक्षत्वं व्यवस्थापयितुं च शब्दस्यापि प्रत्यक्षज्ञानजननयोग्यत्वम् आस्थेयम्। एवं च विषयस्य प्रत्यक्षम् एव प्रथमतः निर्धारणीयम्। तथाहि ज्ञेयः विषयः साक्षात्सम्बन्धेन ज्ञातुः ज्ञानगोचरः भवति वा न वा इति तावत् प्रथमं विचारणीयम्। भवति चेत्, विषयगतप्रत्यक्षत्वम् अवधारितं मन्तव्यम्।

तद्विषयम् अवलम्ब्य च यत् ज्ञानम् उदेति तत् ज्ञानगतप्रत्यक्षम्, तस्य प्रत्यक्षज्ञानस्य साधनं च प्रत्यक्षप्रमाणम्। तत्र, विषयस्य प्रत्यक्षज्ञानं प्रत्यक्षप्रमाणजन्यं वा भवतु, अनुमानजन्यं वा भवतु, शब्दजन्यं वा भवतु, न काऽपि हानिः इति विवरणपन्थिनाम् आशयः।

भामतोसम्प्रदायमतम्––

विवरणपन्थिनां मते अपरोक्षार्थसम्बन्धिज्ञानम् इत्यर्थः। भामतीपन्थिनां मते तु नैतत् समीचीनम्, अपरोक्षार्थत्वस्यैव दुर्निरुप्यवात्। अर्थगतापरोक्षत्वस्य निरूपणासम्भवात् तद्विषयकज्ञानस्य अपरोक्षत्वम् अनिर्णीतं स्यात् इत्यर्थः। ननु अपरोक्षज्ञानविषयत्वम् एव विषयगतापरोक्षत्वं भवतु। साक्षात्सम्बन्धेन प्रत्यक्षज्ञानस्य यः विषयः तस्यैव विषयगतप्रत्यक्षत्वं स्वीकार्यम्। तमेव विषयम् अवलम्ब्य यत् ज्ञानम् उदेति तच्च विषयगतप्रत्यक्षं स्यादिति चेत्। न तथा सति प्रत्यक्षज्ञानावबोधार्थं विषयः अपेक्षणीयः, प्रत्यक्षविषयाबोधार्थं च प्रत्यक्षज्ञाम् अपेक्षणीयम् इति इतरेतरदोषप्रसंगत्। चैतन्याभिन्नत्वम् अर्थापरोक्षत्वम् इति चेत्। न, तथा सति प्रत्यक्षाविषयीभूतम् अनुमेयवह्नयादिकम् अपि स्वप्रकाशचैतन्ये अध्यस्तम् इति चैतन्येन सह अभेदात् तेषां प्रत्यक्षत्वातत्तेः। तथाहि वह्नयाद्यवच्छिन्नं चैतन्यं स्वाभाविकचैतन्यं च वस्तुतः अभिन्नम्। एवं च वह्नयाद्यवच्छिन्नचैतन्ये अध्यस्तस्य वह्नेः स्वावच्छिन्नचैतन्येन सह अभेदात् स्वाभाविकचैतन्ये सहापि अभेदः। तथा च व्यवहितवह्नयादेरपि प्रत्यक्षत्वापत्तिः। ननु एवम् "अभिव्यक्तचैतन्याभिन्नत्वम्"१ एव विषयापरोक्षत्वम् इति ब्रूमः। अभिव्यक्तचैतन्येन निवृत्तावरणचैतन्येन वा सह अभिन्नताप्राप्तस्य विषयस्यैव विषयगतापरोक्षत्वम् इत्यर्थः। तथाहि व्यवहितवह्यादिविषयेषु इन्द्रियसन्निकर्षाभावात् अन्तःकरणवृत्त्यभावः, तदभावे च आवरणनिवृत्त्यभावः इति व्यवहितविषयगतभासकचैतन्यं द्रष्टिर न प्रकाशते। एवं च अप्रकाशितेन अज्ञानावृतेन वा चैतन्येन सह व्यवहितवह्यादीनाम् आध्यासिके अभेदे सत्यपि अभिव्यक्तत्वाभावात् न तेषां प्रत्यक्षत्वापत्तिः इति चेत्। नैतदपि युक्तम्। तथाहि अभिव्यक्तचैतन्येन सह यः अभेदः उल्लिखितः, तस्य वास्तविकत्वे विवक्षिते सति व्यवहितविषयस्य प्रत्यक्षत्वप्रसंगः न निवार्यते। यतः चक्षुरादिव्यापारेण अभिव्यक्तं यत् पर्वतचैतव्यं तेन सह अनुमेय–वह्निचैतन्यस्य वह्निचैतन्ये अध्यस्तस्य वह्नेश्च वास्तविकः अभेदः अस्तीति अनुमेयवह्नेः प्रत्यक्षत्वापत्तिः। ननु चैतन्यस्य वस्तुतः अभेदे सत्यपि स अभेदः न सर्वदा अस्माकं ज्ञानगोचरः भवति, अनुमेयवह्नेः अनुमेयवह्निचैतन्यस्य च पर्वतचैतन्यात् भेदः एव अस्माभिः दृश्यते। यदा च इयं भेददृष्टिः तिरोहिता भवति अभेदश्चप्रकाशितः भवति तदैव चैतन्यप्रत्यक्षेण सहः विषयस्य प्रत्यक्षमपि भवति इति चेत्। मेवं स्यात्, सुखादिप्रत्यक्षेषु अव्याप्तेः। तथाहि यत्र सुखदुःखादयः अन्तःकरणधर्माः संसर्गाध्यासेन आत्मनि आरोप्यन्ते तत्र संसगध्यासविषयीभूतैः सुखदुःखादिभिः सह आत्मनः अभेदः न स्फुरितः इति तेषाम् अपरोक्षत्वम् अनुपपन्नं भवेत्।

ननु "निवृत्तभेदोपाधिक चैतन्याभेदशालित्वम्१"–एव अर्थनिष्ठापरोक्षत्वम् इति अस्तु। तथाहि अन्तःकरणवृत्तेः विषयेन सह एकदेशस्थिततत्वात् उपाधिद्वयेन अवच्छिन्नस्य चैतन्यद्वयस्य अभिन्नत्वं स्वीक्रियते। एवं च वृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोः अभेदात् विषयाचच्छिन्नः चैतन्ये अध्यस्तस्य विषयस्यापि स्वाधिष्ठानचैतन्याभेदात् मूलचैतन्येन यह अभेदः भवेत्। सुखादिप्रत्यक्षे च सुखाकारवृत्त्यवच्छिन्नचैतन्यं सुखावच्छिन्नचैतन्येन अभिन्नम् इति सुखास्यापि वस्तुतः चैतन्याभिन्नत्वम् इति नाव्याप्तिः इति चेत्। एतदपि न युक्तम्। सर्वोपाधिसम्पर्कशून्यचैतन्यस्य अभेदे विवक्षिते सति अहं ब्रह्मास्मि इति वेदान्तवेद्यस्य चरमात्मसाक्षात्कारस्यापि अपरोक्षपदवाच्यत्वं न स्यात्। अविद्यायाः आत्मसाक्षात्कारनिवर्तनीयत्वे अपि अविद्योपाधिवर्तमानकाले एव तादृशम् आत्मसाक्षात्कारम् उत्पाद्य अविद्या विलीयते इति चरमसाक्षात्कारदशायाम् अविद्यायाः भेदोपाधेः विद्यमानत्वात् चैतन्यस्य अपरोक्षता न स्यात् इत्यर्थः। आध्यासिकज्ञानानां प्रत्यक्षत्वं तु दुरापहतम्। एवं च विषयप्रत्यक्षम् अवलम्ब्य ज्ञानप्रत्यक्षनिरूपणं न सम्भवतीति आदौ ज्ञानगतप्रत्यक्षं निरूपणीयम् इति भामतीपन्थितः।

किं तर्हि भामतीपन्थिनां मते ज्ञानगतप्रत्यक्षम् इति चेत्। उच्यते–ज्ञानाजन्यज्ञानत्वं ज्ञानापरोक्षम् इति। यत् ज्ञानं ज्ञानान्तरेण न जन्यते तत् प्रत्यक्षम् इत्यर्थः। लक्षणमिदं चाक्षुषादिप्रत्यक्षे अन्तःकरणवृत्त्यवच्छिन्नचैतन्ये नित्याभिव्यक्तसाक्षिचैतन्ये च समन्वितं भवति। अनुमित्यादीनां तु ज्ञानजन्यत्वात् तत्र तत्र अस्य लक्षणस्य नातिव्याप्तिः। ननु दण्डोपुरुषः इत्यत्र लक्षणमिदम् अव्याप्तम्। तथाहि विशिष्टज्ञानात् प्राक् विशेषणज्ञानम् आवश्यकीयम् इति विशिष्टप्रत्यक्षं विशेषणज्ञानजन्यम्। एवं च दण्डी पुरुषः इत्यत्र दण्डज्ञानं विना दण्डिज्ञान न भवति इति चेत्। उच्यते–तत्र प्रथम 'ज्ञान' पदेन प्रत्यक्षज्ञानाविषयोभूतं वस्तु अवलम्ब्य यत् ज्ञानम् उत्पद्यते तदेव बोध्यम्। अतः 'ज्ञानजन्यत्वं नाम प्रत्यक्षज्ञानविषयातिरिक्तविषयविषयकज्ञानाजन्यत्वम् इति बोध्यम्।

अतः एव 'स्वाविषय–विषयक–ज्ञानाजन्यज्ञानत्वं ज्ञानापरोक्ष्यम्१ इति उक्तं परिमले। लक्ष्यस्य प्रत्यक्षज्ञानस्य यः अविषयः, तादृशं विषयम् अवलम्ब्य यत् ज्ञानम् उदेति, तादृशेन ज्ञानेन न उत्पन्नं यत् ज्ञानं तत् प्रत्यक्षज्ञानम् इत्यर्थः। प्रकृते तु दण्डस्य प्रत्यक्षज्ञानविषयत्वेन, दण्डज्ञानजन्य–दण्डिज्ञानस्य स्वविषयविषयक–ज्ञानजन्यत्वात् स्वाविषय–विषयक–ज्ञानाजन्य–ज्ञानत्वम् अस्तीति प्रत्यक्षलक्षणसंगतिः। ननु प्रत्यक्षज्ञानकर्तारम् उद्दिश्य 'अस्य इदं ज्ञानं भवतु' इत्याकारिका ईश्वरेच्छा अस्मदीयानां ज्ञानानां कारणम् इति स्वीकारणीयम्। तथा च घटपदादिज्ञानानाम् उत्पत्तौ 'अस्य इदं ज्ञानं भवतु' इत्याकारकम् ईश्वरीयज्ञानम् अस्तीति घटपदादिप्रत्यक्षम् अपि तादृशेश्वरज्ञानजन्यं स्यात्। घटपटादिः प्रत्यक्षविषयस्तु नेश्वरज्ञानजन्य स्यात्। तथा च प्रत्यक्षज्ञानस्य स्वाविषयविषयकेश्वरीय–ज्ञानजन्यत्वात् सर्वत्र अव्याप्तिः इति चेत्। उच्यते–एवं सति तदव्याप्तिवारणाय लक्षणधतप्रथम ज्ञाने स्वसमानाधिकरणत्वं विशेषणं देयम्२। तथा च स्वाविषयविषयकस्वसमानाधिकरण–ज्ञानाजन्य–ज्ञानत्वम् अपरोक्षत्वम् इति फलितम्।

पूर्वाक्तम् ईश्वरीयज्ञानं तु न प्रमातुः स्वसमानाधिकरणम् इति न तत्र अव्याप्तिः। एवं ज्ञानगतप्रत्यक्षे निरूपिते सति तज्ज्ञानजन्यव्यवहारयोग्यत्वम् एव अर्थगतापरोक्षत्वम् इति निर्धार्यते। तथा चोक्तं ब्रह्मविद्याभरणे–"एवम् अपरोक्षज्ञानलक्षणव्यवस्थितौ तज्जन्यव्यवहारयोग्यत्वम् अर्थापरोक्ष्यम् इति तन्निर्वचनं द्रष्टव्यम्३" इति।

विवरणसम्प्रदायमतम्––

विवरणपन्थिभिस्तु करणस्य अपरोक्षज्ञानजननयोग्यत्वे एव तत्करणजन्यज्ञानस्य प्रत्यक्षत्वम् इति भामतीसम्प्रदायमतं न स्वीक्रियते, तथा सति प्रत्यक्षज्ञानजननयोग्यमनोजन्यायाम् अनुमितौ अतिव्याप्तेः। एवं करणम् अवलम्ब्य ज्ञानगतप्रत्यक्षत्वस्य निरूपणासम्भवात् विषयम् अवलम्ब्यैव ज्ञानगतप्रत्यक्षं निरूपणीयम्, ज्ञानगतप्रत्यक्षनिरूपणानन्तरं च तादृशज्ञानव्यवहारयोग्यत्वमेव विषयगतप्रत्यक्षत्वम् इति भामतीपन्थिभिः यदुक्तं तत्तु हेयम् इति विवरणपन्थिनः।

यदुक्तं–स्वाविषयविषयज्ञानाजन्यज्ञानत्वमेव ज्ञानगतप्रत्यक्षत्वमिति, तत् न स्वीकार्यम्, अयम! अस्मात् परः, अयमस्मात् अपरः इत्यादि कालिकपरत्वापरत्वस्थलुषु अव्याप्तेः। तथाहि बहुतर–सूर्यपरिस्पन्द–विशिष्टत्वम् एव परत्वम्, अल्पतर–सूर्य–परिस्पन्द–विशिष्टत्वमेव अपरत्वम्। अत्र परत्वापरत्वज्ञानं हि एतादृशप्रत्यक्षस्य जनकम्। तच्च परत्वापरत्वं प्रत्यक्षाविषयोभूतं सूर्यपरिस्पन्दम् अपेक्ष्य एव उत्पद्यते इति प्रत्यक्षाविषयोभूतसूर्य–परिस्पन्द–विषयकज्ञानसापेक्षमेव परत्वापरत्वज्ञानम् इति तादृशज्ञानाजन्यत्वं परत्वापरत्वप्रत्यक्षे नास्तीति अव्याप्तिः अपरिहार्या। एवं द्वित्वादिप्रत्यक्षस्थले अपि अव्याप्तिः अपरिहार्या। तथाहि अयमेकः अयमेकः इत्याद्यपेक्षाबुद्धिः द्वित्वादिज्ञानानाम् उत्पादिका भविष्यति। ततश्च द्वित्वप्रत्यक्षं प्रति तादृशापेक्षाबुद्धिः कारणम् इति वक्तव्यम्। तत्र द्वित्वं प्रत्यक्षविषयीभूतम्, अपेक्षाबुद्धिस्तु प्रत्क्षाविषयीभूता। एवं द्वित्वस्य प्रत्यक्षाविषयीभूतापेक्षाबुद्धिजन्यत्वात् स्वाविषय–विषयक–ज्ञानाजन्यत्वं द्वित्वादिप्रत्यक्षे न सम्भवति इति तत्राव्याप्तिः२। अतः भामतीसम्मतरीतिम् अनुसृत्य ज्ञानगतापरोक्षत्वनिर्वचनम्, तद्द्वारा च

विषयगतप्रत्यक्षनिरूपणम् असमीचीनम् इति मन्यन्ते विवरणपन्थिनः। यच्च भामतीकारादिभिः उक्तं–प्रत्यक्षज्ञानस्य स्परूपम् अनवधार्य विषयप्रत्यक्षनिरूपणं न सम्भवतीति तत् न। तथाहि अद्वैतिनां मते साक्षी सर्वजनप्रत्यक्षः, अहंज्ञानस्य सदैव अनावृतत्वात्। तेन अनावृतसाक्षिचैतन्येन सह अभिन्नत्वेन प्रकाशितः विषयः एव प्रत्यक्षविषयः। घटप्रभृतयः यदा साक्षिचैतन्ये अध्यस्ताः सन्तः साक्षिचैतन्येन सह अभिन्नत्वेन भासन्ते तदा प्रत्यक्षगम्याः भवन्ति। अनुमेयानां वह्न्यादीनां तु इन्द्रियगोचरत्वाभावात् वह्न्यादिभासकचैतन्यानाम् अज्ञानावरणं न निरस्तम् इति न तत्रातिव्याप्तिः।

विवरणपन्थिनां मते विषयस्य अपरोक्षत्वयोग्यत्वमेव तद्ग्राहकज्ञानापरोक्षत्वस्य नियामकम्। एतन्यते विषयगतप्रत्यक्षत्वनिरूपणप्रसंग भामतीपन्थिभिः ये दोषाः उद्भाविताः, ते न युक्तिसहाः। तथाहि 'अभिव्यक्तचैतन्याभिन्नतया भासमानत्वम् अर्थापरोक्षम्'१। अभिव्यक्त चैतन्येन सह अभिन्नत्वेन भासमानत्वमेव विषयगतापरोक्षत्वम् इत्यर्थः। विवरणमते ब्रह्म एव अज्ञानस्य आश्रयः विषयश्च, अन्तःकरणप्रतिविम्बितचैतन्यं च जीवः। स च जीवः यद्यपि स्वाभाविकः अभेदसम्बन्धः नास्ति। एवं च जीव चैतन्य विषययोर्मध्ये सम्बन्धस्थापनार्थ अन्तःकरणं चक्षुरादिद्वारा विषयं प्राप्य तदाकारेण परिणमते। तदा च जीवचैतन्यं तेन अन्तःकरणपरिणामेन सम्बन्धीकृतं विषयं प्रकाशयति। 'विषयस्यापरोक्षता संविदभेदाद् वा, विषयस्याव्यवधानतया स्वसम्विज्जनकत्वाद् वा प्रमाणकरणेन्द्रिय–सम्प्रयुक्तत्वाद् वा भवति''२ इति विवरणकाराः। अस्य अयमभिप्रायः विषयस्य अपरोक्षस्वभावत्वे सति तादृशविषयावभासकं ज्ञानम् अपरोक्षज्ञानं भवेत्, यद्वा ज्ञानकरणस्य प्रत्यक्षज्ञानजननयोग्यत्वे सति तत्कारणजन्यं ज्ञानं अपरोक्षं भवेत्। सर्वथा हि विषयस्यापरोक्षत्वस्वभावत्वमेव अपरोक्षज्ञानस्य नियामकम् इति।

ननु अपरोक्षस्वभावत्वं चैतन्यस्यैव; विषयस्य तु जड़त्वात् तस्य अपरोक्षस्वभावत्वं न सम्भवति। तथा च विषयस्य अपरोक्षत्वं कथमिति चेत्। उच्यते–विषयस्य अपरोक्षस्वभावाभावेऽपि अपरोक्षसंविदा अपरोक्षसंविदा सह अभिन्नत्वेन तस्य अपरोक्षत्वम्। चैतन्येवन सह विषयस्य अभिन्नत्वं अपरोक्षत्वम् इत्युक्ते व्यवहितघटादीनामपि अपरोक्षत्वप्रसक्तिः, तेषामपि चैतन्येन सह अभिन्नत्वात्। तस्मात् अभिव्यक्तचैतन्येन सह अभिन्नत्वमेव अपरोक्षत्वम् इत्युच्यते। व्यवहित–घटादीनां वस्तुतः चैतन्येन सह अभिन्नत्वे अपि तत्तदाकाराकारितान्तःकरणवृत्त्यवच्छिन्न–चैतन्येन सह अभिन्नत्वाभावः इति अभिव्यक्तचैतन्येन सह अभिन्नत्वाभावात् न तेषाम् अपरोक्षत्वम्। ननु 'अहं सुखी' इत्यादिप्रत्यक्षस्थले आत्मनि सुखस्य संसार्गाध्यासः स्वीक्रियते। संसार्गाध्यासे च आरोपितविषयस्य अधिष्ठानेन सह अभेदः नास्ति इति सुखस्य चैतन्येन सह अभेदाभावात् अपरोक्षत्वाभावप्रसंगइति अव्याप्तिः इति चेत्। उच्यते साधारण्येन चैतन्ये सुखादीनां संसर्गाध्यासे स्वीकृते अपि 'मम सुखं स्फुरति' इत्याद्यनुभवबलात् सुखादिकमपि प्रकाशमानत्वेन उपलभ्यते। प्रकाशमानत्वेन उपलब्धेश्च चैतन्ये सुखादीनां तादात्म्याध्यासोऽपि स्वीक्रियते। तदुक्तं तेषाम् अहन्त्वाकारेण चैतन्यस्य संसर्गाधिष्ठानत्वे अपि स्फुरणात्मना तादात्म्याध्यासोपपत्तेः''१ इति ब्रह्मविद्याभरणे। एवं सुखादीनां चैतन्येन सह अभेदः सम्भवतीति न तत्र अव्याप्तिः।

अभिव्यक्तचैतन्येन सह अनुमेय वह्न्यादीनां अभिन्नत्वेन न भासते इति तत्र तत्र लक्षणस्य नातिव्याप्तिः। लक्षणगत 'भासमानत्वम् इत्यस्य भासमानयोग्यत्वम्' इत्येवार्थः विवक्षितः इति चाक्षुषप्रत्यक्षायोग्यानां गन्धादीनां न चाक्षुषप्रत्यक्षत्वापत्तिः, न च प्रत्यक्षायोग्येषु धर्माधर्मादिविषयेषु प्रत्यक्षलक्षणस्य अतिव्याप्तिः।

धर्मराजाध्वरीन्द्रैस्तु मतद्वयमपि अंशतः समादृत्य भामतीसम्प्रदायमतानुसारेण ज्ञानगतप्रत्यक्षं, परं तु प्रत्यक्षज्ञानविषयस्यैव विषयगतप्रत्यक्षत्वम् इति भामतीसम्प्रदायमतं परित्यज्य विवरणमतानुसारेण विषयगतप्रत्यक्षं निरूपितम्। इत्यलं विस्तरेण।

# राजा नल विरचित 'पाकदर्पणम्' में वर्णित आहारशुचिता

डॉ. समय सिंह मीना
सहायक आचार्य संस्कृत
राजकीय कला महाविद्यालय
कोटा (राज.)


## शोध–सार :–

भारतीय पाककला चिकित्सकीय सिद्धान्तों और गुणों पर आधारित है। इस सम्बन्ध में हमारे विद्वानों ने अपनी प्रज्ञा से समुत्पन्न विचारों को, ज्ञान–विज्ञान को प्राणीमात्र के कल्याण की कामना से ग्रन्थों में उपनिबद्ध किया। पाकशास्त्र के क्षेत्र में निषदाधिपति महाराजा नल द्वारा विरचित 'पाकदर्पणम्' निश्चित ही यह एक अद्भुत ग्रन्थ है। राजा नल विरचित यह ग्रन्थ ग्यारह प्रकरणों में बँटा हुआ है। इसमें कुल 751 पद्य (कुछ संस्करणों में 760) हैं। जिनमें पाकनिर्माणप्रकार, भोजन के प्रकार, भोजन पकाने वाले के गुण, परोसने वाले के लक्षण, अन्न सम्बन्धी दोष, ऋतुओं के अनुसार भक्ष्य, भोज्य, चोष्य, लेह्य, पेय आदि पंचविध भोजन बनाने की विधि, उनके प्रभावों का बहुत ही सूक्ष्म और सरल भाषा में विवेचन किया गया है। मानव–जीवन में शुद्ध अन्न को सेवन का बड़ा महत्त्व है। उत्तम, निरोगी और स्वस्थ जीवन के लिए शुद्ध आहार की महती आवश्यकता है। बृहस्पति जी कहते हैं कि 'सब प्रकार की शुद्धि में अन्नशुद्धि सर्वश्रेष्ठ है– सर्वेषामेव शौचानामन्नशौचं विशिष्यते।' ऐसा इसलिए कहा गया कि अन्न से जैसे शरीर, मन और प्रज्ञा का निर्माण होता है, वैसे ही अन्न के स्थूलरूप से पुरीष (मल) व इसके सूक्ष्म भाग से मन तैयार होता है। वृद्धचाणक्य विरचित नीतिशास्त्र का वचन है कि ''जैसे दीप अन्धकार का भक्षण करता है और कज्जल उत्पन्न करता है, वैसे ही मनुष्य जिस प्रकार का अन्न सेवन करता है, उसी प्रकार की अपत्य (संतान) को जन्म देता है–

दीपो भक्षयति ध्वान्तं कज्जलं च प्रसूयते।
यदन्नं भक्षयेन्नित्यं जायते तादृशी प्रजा।।''


**संकेताक्षर** :– वैद्यक, पाकशास्त्र, पाककला, आहारविज्ञान, अन्नगत, शास्त्रनिर्दिष्ट, विकारोत्पादक, प्रमादादिवश, आसृत, पिच्छिल, अशुचि, क्वथित, शुष्क, दग्ध, विरूप तथा विपरीत।

## शोध–पत्र :–

साहित्य समाज का दर्पण होता है। समाज जिस प्रकार का होता है, वह उसी भाँति साहित्य में प्रतिबिम्बित होता है। समाज के रूप–रंग, वृद्धि–ह्रास, उत्थान–पतन, समृद्धि–दुरवस्था के निश्चित ज्ञान का प्रधान साधन तत्कालीन साहित्य होता है। इसी प्रकार साहित्य संस्कृति का वाहक होता है। संस्कृति की आत्मा साहित्य के भीतर से अपनी मधुर झाँकी दिखलाया करती है। संस्कृति के उचित प्रसार तथा प्रचार का सर्वश्रेष्ठ साधन साहित्य ही है। साहित्य सामाजिक भावना तथा सामाजिक विचार की विशुद्ध अभिव्यक्ति होने के कारण यदि समाज का मुकुर है, तो सांस्कृतिक आचार तथा विचार के प्रकृष्ट प्रचारक के रूप में संस्कृति के सन्देश को जनता के हृदय तक पहुँचाने के कारण संस्कृति का वाहन होता है।

मुग्धावस्थायाः अर्धसम्पत्तिः सुषुप्तिमरणयोः इत्यद्वैतवेदान्तराद्धान्तः। तथाहि सूत्रमाह बादरायणः "मुग्धेऽर्धसम्पत्तिः परिशेषात्" इति। अत्र परिशेषाद् इति हेत्वार्थप्रदर्शनाय। आचार्यशङ्करैः सम्यग्तया सूत्रस्य व्याखानं कृतम्। प्रसिद्धाः तिस्रः अवस्थाः जीवस्य जागरितं स्वप्नं सुषुप्तमिति। किञ्च चतुर्थावस्थापि लोके श्रुता

---

3 तस्मादर्धसंपत्तिः कर्मशेषे सति प्राणोष्माणौ पुनरागच्छतः स्वप्नप्रयुक्तेन तु न प्राणोष्माणौ प्रत्यावर्तेते इति स्थितम्। भाष्कराचार्यकृतब्रह्मसूत्रभाष्ये।

4 मुग्धे मूर्च्छिते मुशलाद्यभिहिते पुरुषे या तस्यावस्था सार्धसम्पत्तिः। मरणस्थानस्यार्धं सम्पद्यते मुग्धः।-वेदान्तकौस्तुभप्रभा।

5 सूक्ष्मप्राणदेहसम्बन्धेनावस्थितिर्मूर्च्छेतिविवेकः। वेदान्तकौस्तुभप्रभा।

अपसृतिरिति। यदि पूर्वपक्षिभिः आक्षिप्यते एषा मुग्धावस्था पृथक्काचिदवस्था तदपि न विमतमेव। यतो हि एतावता अस्माभिः श्रुतौ स्मृतौ कुत्रापि नैव श्रुतं यद् पञ्चम्यवस्था नाम काचिद् प्रसिद्धा अस्ति। अतः आचार्यैः क्रमेण निराक्रियते अवस्थाचतुष्टस्य।

**जाग्रद्**

ननु जाग्रदवस्थायामन्तर्भावो भवतु। भगवता भाष्यकृता प्रोक्तं मुग्धस्य जाग्रति अन्तर्भावो न भवति। जाग्रद् नाम यत्र इन्द्रियैः विषयस्य ग्रहणमर्थस्योपलब्धिः भवति सा अवास्था।[6] जाग्रत्काले त्रिपुटीज्ञानं वर्तते। परन्तु जाग्रदवस्थायां मुग्धो न हीन्द्रियैर्विषयानीक्षते। किञ्च अर्थस्यापि अग्रहणं दृश्यते। कैश्चिद् आक्षिप्यते यथा इषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान्विषयानीक्षते तथा मूर्च्छितस्यापि मुसलसंपातादिजनितदुःखानुभवमनस्तया जाग्रदपि नान्यान्विषयानीक्षते इति। परन्तु तथापि न जाग्रन्मोहयोः साम्यत्वम् मुग्धस्य न भवति अचेतयमानत्वान्मुग्धस्य। किञ्च उभयोः अनुभवविरोधोऽपि प्रत्यक्षीकृत एव। तद्यथा इषुकारो हि व्यापृतमना वदतीषुमेवाहमेतावन्तकालमुपलभामानोऽभूवमिति परन्तु मुग्धः लब्धसंज्ञो सन् ब्रवीत्यन्धे तमस्यहमेतावन्तकालं प्रक्षिप्तोऽभूवं न किञ्चिन्मया चेतितमिति। अपि च दृश्यते हि मुसलसंपातादिजनितमुग्धस्य शरीरः धरण्यां पतति। परन्तु जाग्रत्काले एकविषयासक्तचेतसोऽपि दण्डायमानः तिष्ठति न तस्य पतनं भवति। अतः न जाग्रत्मोहयोः साम्यं भवति। तस्मात् मुग्धावस्थायाः न जाग्रति अन्तर्भावः भवति।

**स्वप्नावस्था**

जाग्रत्काले मा भवत्वन्तर्भावः किन्न स्वप्नावस्थायामपि न भवेद् मुग्धस्य स्थितिः? जाग्रत्काले दृश्यमानाः विषयसंस्काराः मनसि तिष्ठन्ति। बाह्येन्द्रियाणानामुपरमे सति मनसि एव जाग्रवत् भाषते तत् स्वप्न इत्यच्यते[7]। अतः स्वप्नकाले अन्तःकरणवृत्तिर्भवति, ततः ज्ञानं [8]भवति। परन्तु मुग्धस्य निःसञ्ज्ञकत्वाद् न स्वापेऽन्तर्भावः।

---

6 इन्द्रियैरर्थोपलब्धिजागरितम्-रामकृष्णटीका पञ्चदशी।

7 करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नः -रामकृष्णाचार्यटीका पञ्चदशी।

8 इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नवस्था। वेदान्तपरिभाषा विषयपरिच्छेदः।

अतः मुग्धस्य बोधो न भवति यत् स कुत्र वर्तते। परन्तु स्वप्नस्थस्य तु ज्ञानं तस्मिन्नकाले भवति। तथाहि उत्थितः सन् वदति अहं हिमालये आसं, राजा अभूवमित्यादि। परन्तु मोहस्तु न किञ्चिद् मया वेदितमिति वदति। अतः मोहस्तु स्वापेतर एव।

**सुषुप्तिः**

मा भूत् जाग्रत्स्वापयोः अन्तर्भावः किन्न सुषुप्तावन्तर्गतः न स्याद् भूयसः साम्यदर्शनाद्। सुषुप्तावपि बाह्येन्द्रियाणामन्तरिन्द्रियामुपरमे सति जीवः गाढनिद्रां प्रति गच्छति। तत्र पुनः सस्वरूपेण तिष्ठति तत्सुषुप्तम् इति। अत्र अविद्याविषयीभूतान्तःकरणं बीजरूपेण तिष्ठति[9]। अतः किमपि कामना न भवति सुषुप्ततस्य[10]। अतः सुषुप्तिरेव मूर्च्छाविशेषविज्ञानाभावाविशेषाद्। किञ्च यदुच्छ्वासकम्पनादिकं भवति तत्तु सुषुप्तेरवान्तर्भेदाः भवन्ति। तद्यथा कश्चित्सुप्तोत्थितः आह सुखमहमस्वाप्सं लघुनि मे गात्राणि,प्रसन्नं मे मनः इति, कश्चित्पुनर्दुःखमहमस्वाप्सं गुरुणि मे गात्राणि, भ्रमत्यनवस्थितं मे मनः इति। अतः न चैतावता सुषुप्तिर्भिद्यते मुग्धात्। भामतीकारेण उच्यते विकारन्तेऽपि मूर्च्छा न सुषुप्तेर्भिद्यते। यद्यपि मोहसुषुप्तयोः साम्यं दरीदृश्यते विशेषविज्ञानोपशमत्वाद् तथापि तयोः नैक्यम्। अपि च यदि कैश्चिदुच्यते ज्ञानाभावसाम्येन सुषुप्तमुग्धयोरभेदः तर्हि स्वप्नजागरितयोरपि विशेषविज्ञानसाम्याद्भेदः स्याद्। अपि च सुषुप्तस्य यत्सत्सम्पन्नत्वं दृश्यते तत्तु तस्यामवस्थायामुपाधिरहित्वेन उच्यते। अतः उपाध्यभावश्च मुग्धस्यापि तथैव दृश्यते[11]। परन्तु तथा न भवति, तयोस्तु बाह्येन्द्रियव्यापारभावाभावाभ्यां तु भेदः दृश्यते तथैव सुषुप्तमोहयोरपि प्रयोजनकारण- लक्षणभेदाच्च भेदस्तु वर्तते एव। आदौ तावद् तयोः प्रयोजनभेदप्रदर्शते। श्रमस्य उपशमाय ब्रह्मणा साकं सत्सम्पत्तिः भवति सुषुप्तस्य। किन्तु शरीरत्यागार्थं हि ब्रह्मणा साकं सम्पत्तिः भवति मोहस्य। तथाहि भामतीकाराः जगदुः "श्रमापनुत्त्यर्था हि ब्रह्मणा संपत्तिः सुषुप्तम्। शरीरत्यागार्था हि ब्रह्मणा संपत्तिर्मोह" इति। अत्र भामतीकारैः युक्तिः प्रदर्शिता यत् यद्यपि

---

9 सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्था। वेदान्तपरिभाषा।

10 न तत्र कञ्चन कामं कामयते-माण्डुक्योपनिषद्।

11 यत्सुषुप्तं प्रति सत्सम्पन्नत्वं श्रुतं तदुपाध्यभावाभिप्रायेण उपाध्यभावश्च मुग्धस्यापि सम इति। रत्नप्रभाकारः

सत्यपि मोहे न मरणं, तथाप्यसति मोहे न मरणमिति मरणार्थौ हि मोहः। किञ्च मुसलसंपातादिनिमित्ताद्यघातकारणान्मुग्धावस्था भवति। परन्तु बहुश्रमादिनिमित्तकारणात्वाद् स्वापावस्था भवति। अपि च मुखनेत्रादिविकारलक्षणत्वाद् मोहस्य प्रसन्नवदनत्वादिलक्षभेदाच्च सुषुप्तस्य च भेदः स्पष्टः। तद्यथा मुग्धस्य शरीरकम्पनादिकं दृश्यते, मुखमपि भयानकं भवति, नेत्रे विस्फारिते भवतः। परन्तु सुषुप्तस्य प्रसन्नमुखं दृश्यते, अपि च निमीलिते अस्य नेत्रे भवतः, शरीरकम्पनादिकं नैव दृश्यते। किञ्च मोहकाले कदाचिद् चिरमपि नोच्छ्वसिति, स्वापकाले तु सर्वदा उच्छ्वासादिकं भवति। सुषुप्तौ स्थितस्य मुखे किञ्चिज्जलं निक्षिप्यते चेद् सुप्तस्य उत्थानं भवति। परन्तु मुग्धस्य तु मुद्गरपातेनापि उत्थानासम्भवः दृश्यते। अतः तयोः नैक्यम्। तस्माद् मुग्धस्य सुषुप्तौ नान्तर्भावः इति स्फुटम्।

**अपसृतिः**

मा भवतु प्रसिद्धासु त्रिष्वस्थास्वन्तर्भावः। परन्तु चतुर्थ्यवस्था अपसृतिः प्रसिद्धा लोके, तत्रैव अन्तर्भवतु। यतो हि मरणसमयेऽपि शरीरस्य कम्पनादिकं दृश्यते। मुखस्य भयानकादिलक्षणं परीलक्ष्यते। कदाचित् नेत्रेऽपि विस्फारिते भवतः। उच्छ्वासादिकमपि न भवति। अतः मुग्धमरणावस्थयोः साम्यं वर्तते। तस्मात् मुग्धस्य मरणेऽन्तर्भावः नास्ति विप्रतिपत्तिः।शङ्कराचार्यैरपि तदपि निराकृतं वैलक्षण्यप्रदर्शनमुखेन। मुग्धो न मृतः कारणं हि मुग्धस्य शरीरे प्राणवायूष्णता च दृश्येते। किञ्च नासिकाप्रदेशे हस्तं स्थाप्यते चेदनुभूयते प्रोणोऽस्ति। किञ्च लोकेऽपि मुग्धस्य परीक्षा क्रियते अयं मृतो न वा प्राणोष्माभ्याम्। यदि प्राणोष्माणोः अस्तित्वं नानुभूयते तर्हि मृतोऽयमिति वदति। मृतस्यास्य शरीरस्य दहनाय अरण्यं नयन्ति। यदि प्राणोष्माणोः ज्ञानं भवति तर्हि चिकित्सार्थं नयन्ति जनाः। मूर्च्छितस्य पुनः उत्थानं दृश्यतेऽतो न मृत इति। अत्र शङ्कराचार्येण सम्यग् वक्रोक्तिः वर्तते। तद्यथा नहि यमं गतः यमराष्ट्राद् प्रत्यागच्छति। तन्नाम यः एकवारं मरणं प्राप्तवान् स कदापि न पुनरुज्जीवति अतः मुग्धस्य न मरणेऽन्तर्भावः।

**पञ्चम्यवस्था**

यदि कोऽपि एवं कथयति मुग्धस्य प्रसिद्धासु त्रिषु नान्तर्भवतु,परन्तु पृथक्काप्यवस्था भवतु। तदपि न भवति यतो हि पञ्चमी काप्यवस्था एतावता श्रुतिषु स्मृतिषु प्रसिद्धा न दृश्यते। अतः पृथग्त्वेन गणयितुमशक्यत्वाद् प्रमाणाभावाद् न पञ्चम्यवस्थाविशिष्टः मुग्ध इति।

**सिद्धान्तः**

आचार्यबादरायणमते तु मुग्धस्य अर्धसम्पत्तिः इत्येव। मुग्धस्यार्धसम्पत्तिः कथं तच्छङ्करेण स्पष्टतया निगदितम्। अत्र पूर्वचपक्षिभिः आक्षिप्यते यत् सुषुप्तस्य कृते श्रुतयः ब्रुवन्ति यत् सत्सम्पन्नं[12] सुकृतं[13] दुष्कृतं मृत्युं दुःखादिकं न भवति। उपाध्युपशमात् तथैव मुग्धस्य उपाध्युपशमात् कृत्स्नसम्पपत्तिरेव भवतु अर्धसंम्पत्तिः कुतः? तदा उच्यते आचार्येण यत् न ब्रूमो मुग्धेऽर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति। मुग्धस्य अर्धसंम्पत्तिस्तु सुषुप्तस्य अर्धेण निःसज्ञकत्वादिना धर्मेण कम्पनादिना मरणधर्मेण इति। अत्र भामताकारेण प्रोक्तं यत् साम्यवैषम्याभ्यामर्धत्वमिति। कुतः, परिशेषादिति। प्रसक्तस्य प्रतिषेधे अन्यत्राप्रसङ्गात् शिष्यमाने वस्तुनि यः सम्प्रत्ययः सः परिशेषः इति। मोहस्तु द्वारीकारणं मरणस्य। यदा कर्मक्षयः सम्पूर्णो न भवति तदा पुनः जीवति। कर्मशेषो भवति चेद् न पुनरुज्जीवति। तस्मादर्धसंपत्तिः एव ब्रह्मविदः इच्छन्ति। अतः अर्धसंम्पत्त्यभुपगमाच्च न पञ्चमी गण्यते इत्यनवद्यम्।

**आयुर्वेदादिमतम्**

शङ्कराचार्येण न्यगादि यत् लोकायुर्वेदयोः मूर्छा प्रसिद्धा अस्ति। आयुर्वेदादिमतानुसारं मूर्छा अपस्मारनामकस्य निदानस्थानस्य कारणेषु अन्यतमा। आयुर्वेदादिमते अपस्मारो नाम रोगविशेषोऽङ्गविकृत्यप्युच्यते। अपस्मर्य्यते पूर्ववृत्तं विस्मर्य्यते अनेन इति अपस्मारः। चरकसंहितायां तु

12 सता स्योम्य तदा संपन्नो भवति।(छा ६.८.१)

13 न मृत्युर्न शोको न सुकृतं न दुष्कृतम्(छा ८.४.१)

अपस्मारः पुनः स्मृतिबुद्धिसत्त्वसंप्लवद्बीभत्सचेष्टमावस्थिकं तमःप्रवेशमाचक्ष- ते। मूर्च्छायाः फलमपस्मारः। तथाहि दृश्यते शास्त्रे-

हृतकम्पः शून्यता खेदो ध्यानं मूर्च्छा प्रमूढता।

निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यश्च।।इति।।

चत्वारोऽपस्मारा भवन्ति वातपित्तकफसन्निपातनिमित्ताः चेति। अतः वातजनितात् पित्तरसजनितात् कफजनितात् सन्निपातजनितात् अपस्मारो भवति। सन्निपातः नाम सम्बन्धजनितात् इति। अपि च मुसलघातादिजनितमुग्धस्त्वत्र वातजनितपक्षे आगच्छति। यतो हि मुसलादिप्रहारेण शरीरे प्राणवायोः रोधो भवति। तत मूर्च्छा भवति। तत अपस्मारः जायते। कफादिः शरीरे अधिकं भवति चेद् ततः मुर्छा भवति। तथैव पित्तादिनां ज्ञेयम्। अत मूर्च्छा भवति कारणमपस्मारः तस्य कार्यम् इति।

**उपसंहारः**

मन्मते तु मूर्च्छायाः सुषुप्तिमरणयोः अर्धसम्पत्तिरेव। अद्वैतवेदान्तमते एव मुग्धस्य सुषुप्तिमरणयोः अर्धप्राप्तिः इति स्वीक्रियते चेदेव दोषाः भवन्ति। यतो हि शङ्कराचार्यैः स्पष्टतया दर्शितं यत् साम्यवैषम्यभ्यामेव अर्धसम्पत्तिर्भवति। येषु सम्प्रदायेषु मुग्धस्य मरणायार्धसंपत्तिः स्वीकृता तेषां प्रश्नोऽयं यत् यद्यपि मुग्धस्य द्वारीकारणं मरणं प्रति तथापि सुप्तेन साकमपि बहुनि साम्यानि दृश्यन्ते। अत केवलं मरणरूपाधर्मादिना साकमर्धसम्पत्तिरिति नोचितम्। पुनः मोहस्य सर्वदा कम्पनादिकं भवति इत्यपि नास्ति। यतो हि पित्तकफादिनिमित्तं यदि भवति मोहस्तदा तु कम्पनादिकं तथा न दृश्यते। पुनः सन्नितातजनितात् मोहस्य तु एकत्र स्थिरता एव दृश्यते। मूलसलादिप्रहाराघातादिनिमित्तान्मोहस्य तु कम्पनादिकं भवति। सर्वदा तु मोहस्य निसंज्ञत्वादिधर्मसाम्याद् साम्यत्वं वर्तते एव। अतः केवलमरणायार्धसम्पत्तिः इति न संगच्छते। अतः आचार्यशङ्करैःयत् प्रोक्तं तदेव बहुतरयुक्तम्। शिवम्।

– समाप्तम्.--

**उपयुक्तग्रन्थसूची**


1. अग्निवेशः, *चरक संहिता :* (आयुर्वेददीपिका,विद्योतिनी टीकोपेता), गङ्गासहाय पाण्डेय, चौखाम्भा संस्कृत संस्थान, वाराणसी, २०६३।
2. भट्टः, केशवकाश्मीरि. *वेदान्तकौस्तुभप्रभा :* ड विजयनारायणमिश्रः. सम्पूर्णानन्दसंस्कृतविश्वविद्यायलयः, वारणसी, १९९२।
3. वल्लभाचार्यः. *श्रीमदणुभाष्यम्:* (भाष्यप्रकाशः टीकोपेतः), रत्नगोपालभट्टः. कृष्णदास अकादमी, वाराणसी, २००२।
4. भास्कराचार्यः. *ब्रह्मसूत्रभाष्यम् :* विन्ध्येश्वरीप्रसाद द्विवेदी. राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, २००६।
5. विद्यारण्यः. *पञ्चदशी :* (रामकृष्णकृतव्याख्योपेता), नारायणराम आचार्यः, चौखाम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००८।
6. श्रीधर्मराजाध्वरीन्द्रः, *वेदान्तपरिभाषा :* (प्रकाश हिन्दीव्याख्योपेता),श्रीगजानन शास्त्री मुससगांकर,चौखाम्बा विद्याभवन, वाराणसी, २०१०।
7. ब्रह्मसूत्रशाङ्करभाष्यम्, (भामती कल्पतरु परिमल टिकासहितम्), के एल्, जोशी, परिमल पब्लिकेशन्स, दिल्ली, २००७।
8. रामानुजाचार्यः, *श्रीभाष्यम् :* ललितकृष्ण गोस्वामी, चौखाम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०००।



Name-Santu Kumar Pan

Assistant professor &

Head Of The Sanskrit Depertment

Bejoy Narayan Mahavidyalaya

Ph N0-7074187574

Mail Id- santukumrapan@gmail.com

# अष्टाध्यायीरचनावैशिष्ट्यम्
# (INDEPTH APPRECIATION OF AṢṬĀDHYĀYĪ STRUCTURE)

सुलग्ना लेंका

**आमुखम्-** शब्दानुशासनपरम्परायां पाणिनेरष्टाध्यायी मूर्धन्यमधिरोहति । गोपथब्राह्मणे[१] पाणिनीयव्याकरणप्रयुक्तानामनेकेषां शब्दानां परिभाषिकत्वेन विन्यासः परिलक्ष्यते । तथाहि- "ॐ कारं पृच्छामः, को धातुः, किं प्रातिपदिकम्, किं नामाख्यातम्, किं लिङ्गम्, किं वचनम्, का विभक्तिः, कः प्रत्ययः, कः स्वर उपसर्गो निपातः, किं वैयाकरणम्, को विकारो, को विकारी, कति मात्राः, कति वर्णः,कत्यक्षरः.. .. .. "। निरुक्ते[२]- "नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा इति प्रकटितम् । अस्याशयस्तु-नाम- आख्यात- उपसर्ग-निपातनिवन्धनं व्याकरणमिति" । महाभाष्ये[३]-"पुरा कल्पे एतदासीत् संस्कारोत्तरकालं ब्राह्मणाः व्याकरणं स्माधीयते"। वैदिककाले ब्राह्मणाः संस्कारात् परं निष्कारणतया व्याकरणमेव पठन्ति स्म । "पुर्वापरप्रथम.. .."[४]सूत्रे भाष्ये "सर्ववेदपारिषदं हीदं शास्त्रमिति" निगदितम् । यद्यपि ऐन्द्र-शैव- भेदेन व्याकरणसम्प्रदायः द्विविध आसीत् । ऐन्द्रव्याकरणं सविस्तृतत्वात् अद्यत्वे अप्रयुक्तत्वात् शैवव्याकरणस्य प्रामुख्यं लक्ष्यते । यस्य प्रतिनिधित्वं पाणिनिरेव विदधाति । ख्रीष्टपूर्वपंचमशतके[५] प्रादुर्भूतः पाणिनिः वैज्ञानिकरीत्या संक्षिप्तसूत्रशैल्या अष्टाध्यायीं विरच्य विदूषां समवाये सततं सुप्रशस्य इति निश्चप्रचम् ।

**सारसंक्षिप्तिका (Abstract) –**

अष्टाध्यायीरचनावैचित्र्य निबन्धस्य वर्णनासन्दर्भे मया पाणिनिप्रदर्शित विविधविषयाणामवतारणं यथामति समुपन्यस्ता विद्यते। तत्र शब्दानां विश्लेषणप्रक्रिया माध्यमेन ज्ञानवैशद्याय साधुशब्दानामन्वाख्यानमेव व्याकरणस्य प्राथम्यं प्रामुख्यं च स्वीक्रियते। एवञ्च लोपागमवर्णविकारस्तथा पदविभागप्रभृतयः साधुशब्दानुशासने साधनानि भवन्ति। तदर्थम् अष्टाध्यायी त्रिधा विभज्यते।यथा- प्रथमपर्याये अष्टाध्याय्यां प्रथमद्वोतीयाध्याययोः पाणिनिना वाक्यान्वाख्याननियमे पदविभागः विहितः। द्वितीयपर्याये तृतीयाध्यायतः पंचमाध्यायपर्यन्तं पदानां प्रकृतिप्रत्ययविभाजनं संपादितम्। ततः तृतीयपर्याये षष्ठसप्तमाध्याययोः आगमादेशविधानपूर्वकं तत्सन्निविष्टप्रकृतिप्रत्ययसंयोगे पदनिमित्तं जातम्। अष्टमाध्याये अर्थात् अध्यायस्यास्य द्वितीयपादादारभ्य चतुर्थपादं यावत् त्रिपादीनाम्ना अभिधीयते। अत्र मया निबन्धस्य सारसंक्षिप्तिका वक्ष्यमाणरीत्या समुपन्यस्यते,यथा-

| | |
|---|---|
| १)अष्टाध्यायीसूत्रक्रमः | *The order of Aṣṭādhyāyī rules* |
| २)सूत्रव्याख्यानविधिः | *Style of analysis of rules* |
| ३)संक्षिप्ता सूत्रशैली | *Concise form of aphorism.* |
| ४)वैज्ञानिकपद्धतिः | *Scientific method* |
| ५)त्रिमुनिव्याकरणम् | *Triad ascetic rule* |
| ६)निबन्धस्य प्रासंगिकता | *Relevance of Article* |
| ७)निबन्धस्यावदानम् | *Contribution of Article* |
| ८)उपसंहारः | *Conclusion* |


**१ .अष्टाध्यायीसूत्रक्रमः-**

**क)प्रत्याहारः** - तत्र प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अनेन इति प्रत्याहारः, यस्तु ध्वनिस्फोटगम्यवर्णानुक्रमं विधत्ते । वाक्यपदीये भर्तृहरिणा उक्तम्[६]-"वर्णस्य ग्रहणे हेतुः प्राकृतः ध्वनिरुच्यते" । महाभाष्ये लक्ष्यते[७]-

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
अल्पः महान् च केषांचित् उभयं तत् स्वभावतः ।।

अस्य अयं निष्कर्षः - यस्य उच्चारणेन अर्थवोधः भवति स एव स्फोटः । शब्दस्य सम्वन्धद्वयरूपेण ध्वनिः स्फोटश्च स्तः । तत्र ध्वनिः व्यञ्जकः, स्फोटस्तु व्यङ्ग्यः । ध्वनिः पुनः द्विधा विभक्तः- प्राकृतः, वैकृतः । भाष्यकारेण ध्वनिशब्देन वैकृतध्वनेः ग्रहणं कृतम् । तथाहि वैकृतध्वनिमवलम्व्य वर्णपदवाक्यज्ञानं सुकरं जायते ।

तत्र पदवाक्यविचारहेतुभूतवर्णक्रमः पाणिनीयधारायां स्थानानुसारेण क्रमिकतया अइउऋलृएओऐऔ पाठः स्वीकृतः । एतादृश वर्णसमाम्नायज्ञानाय शिवसूत्राणां सन्निवेशः विहितः, यस्य आधारेण "आदिरन्त्येन सहेता" सूत्रमुपजीव्य प्रत्याहारव्यवस्था अष्टाध्यायीसूत्रक्रमबोधाय यथार्था ।

**ख)गणपाठः-** गणपाठे गणानां विभागद्वयं विधीयते । एकस्तु सर्वादिगण अपरस्तु आकृतिगणः । सर्वादिगणे यावन्तः शब्दाः पठिताः तेषां गणानामेव गणे अन्तर्भावः, आकृतिगणे तु शब्दसंख्या अनिश्चिता । "अजाद्यतष्टाप्[८]" अत्र अजादिगण आकृतिगणत्वेन गृहीतः । पाणिनिकृतगणपाठोपरि काऽपि प्राचीनव्याख्या न तथा उपलभ्यते, केवलं यज्ञेश्वरभट्टकृत "गणरत्नावली" व्याख्या दृश्यते ।

**ग)अनबन्धः-**महाभाष्यकारेण वर्णानामुपदेशः अनुबन्धकरणार्थमुद्दिष्ट[९] इति निगदितम् । तत्र लोकप्रसिद्धमातृकापाठेनैव वर्णज्ञानसंभवात् माहेश्वरः वर्णसमाम्नायः किमर्थम् । तत्र लाघवेन शास्त्रप्रवृत्तिनिमित्तं प्रत्याहारविधानाय अनुवन्धानां प्रयोजनम्, तथा च वर्णानामुपदेशं विना अनुवन्धज्ञानमपि दुष्करम् । नागेशेन अनुवन्धविषये पंचपरिभाषाः समुपन्यस्ताः, यथा-१.अनेकान्ता अनुवन्धा २.एकान्ताः ३.नानुवन्धकृतमनेकाल्त्वम् ४.नानुवन्धकृतमनेजन्तत्वम् ५.नानुवन्धकृतमसारूप्यम् ।

**घ)अनुवृत्तिः-** अनु पश्चात् वर्त्तते इति अनुवृत्तिः, वक्ष्यमाणसूत्रेषु कार्यनिष्पादनाय लघुना उपायेन सूत्राणि आकलयितुं पाणिनिना अनुवृत्तिविधिः समुपाश्रिता, तथाहि- "अर्थवदधातुरप्रत्यय प्रातिपदिकम्"[१०] सूत्रात् प्रातिपदिकम् पदस्यानुवर्त्तनं विधाय "कृत्तद्धितसमासाश्च"[११] इति उत्तरसूत्रे कृत्तद्धितसमासानां प्रातिपदिकसंज्ञा सुकरा ।

**ङ)संज्ञा-**सम्यक् ज्ञायते अनया इति संज्ञा । भाष्यकारेण-"संज्ञाधिकारः संज्ञासंप्रत्ययार्थः"

वृद्धयाादीनां शब्दानां संज्ञाज्ञाननिमित्तं संज्ञा कर्त्तव्या, तथाहि संज्ञाकरणे संज्ञासंज्ञिनोः सन्देहनिवृत्तिनिमित्तं च संज्ञा आवश्यकी, यथा- अदेङ् गुणः, अत्र गुणसंज्ञायां कृतायाम् अत्-एङ्- अएओ इति त्रयाणां संज्ञित्वेन व्यवहारः । पाणिनिकृत अष्टाध्यायीग्रन्थे चत्वारिंशदधिकद्विशतपरिमितानि (२४०) संज्ञासूत्राणि विद्यन्ते ।

**च)परिभाषा-**तत्र अनियमे नियमकारिणी परिभाषा , परितः भाषते इति परिभाषा । व्याकरणशास्त्रे पदप्रयोगविज्ञाननिमित्तं प्रक्रियानिर्वहणाय सूत्राणां प्रयोजनम् । किन्तु परिभाषासूत्राणां तु स्वतन्त्रं प्रयोजनम् । अर्थात् विधिसूत्राणां प्रवर्त्तनाय परिभाषासूत्राणां नितरामावश्यकता, अष्टाध्याय्यां प्रायतः विंशत्यधिकपरिभाषासूत्राणां सन्निवेशः पाणिनिना संपादितः ।

तत्र पाणिनिना अष्टाध्यायीव्याकरणे प्रायतः द्वाविंशत्यधिकं परिभाषासूत्रं समुपन्यस्तम्।तेषां परिगणनं नीचैः प्रदत्तम्।

| | |
|---|---|
| १.इको गुणवृद्धी | २.न धातुलोप आर्धधातुके |
| ३.आद्यन्तौ टकितौ | ४.मिदचोऽन्त्यात् परः |
| ५.एच इग्घ्रस्वादेशे | ६.षष्ठी स्थानेयोगा |
| ७.स्थानेऽन्तरतमः | ८.उरण् रपरः |
| ९.अलोऽन्त्यस्य | १०.ङिच्च |
| ११.आदेः परस्य | १२.अनेकाल् शित् सर्वस्य |
| १३.प्रत्ययलोपे प्रत्ययलक्षणम् | १४. न लुमताङ्गस्य |
| १५.तस्मिन्निति निर्दिष्टे पूर्वस्य | १६.तस्मादित्युत्तरस्य |
| १७.अचश्च | १८.यथासंख्यमनुदेशः समानाम् |
| १९.स्वरितेनाधिकारः | २०.विप्रतिषेधे परं कार्यम् |
| २१.समर्थः पदविधिः | २२.वाऽसरूपोऽस्त्रियाम् |

परिभाषासम्वन्धे श्रीमतः नागेशभट्टेन परिभाषेन्दुशेखर इति पुस्तकं विरचितम्। यत्र प्रकरणत्रयं दृश्यते। तत्र प्रथमप्रकरणे व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् इत्यस्मात् आरभ्य एकदेशविकृतमनन्यवत् इति यावत् सप्तत्रिंशत् (३७)परिभाषाः सन्ति। एतत् प्रकरणं शास्त्रत्वसंपादनोद्देशप्रकरणम् उच्यते। द्वितीयप्रकरणे पूर्वापरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इत्यस्मात् उभयनिर्देशे पंचमीनिर्देशो बलीयान् यावत् चतुर्त्रिंशत् (३४)परिभाषाः सन्ति। एतत्तु बाधवीजप्रकरणरूपेण परिगण्यते। तृतीयप्रकरणे प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इत्यास्मात् अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः इति यावत् द्विषष्टिः(६२)

परिभाषाः विद्यन्ते, एतत् प्रकरणं शास्त्रशेषप्रकरणं कथ्यते। परिभाषेन्दुशेखरे समुदायेन त्रिंत्रिंशद्युत्तरं एकशतम्(१३३) परिभाषाः विद्यन्ते। एतासु काश्चन परिभाषा प्राचीनवैयाकरणशास्त्रे वचनरूपेण पठिताः सन्ति एवञ्च कतिपय परिभाषाः पाणिनिव्याकरणानुसारं ज्ञापकसिद्धाः न्यायसिद्धाश्च सन्ति। ज्ञापकसिद्धपरिभाषाद्वारा कस्यापि सूत्रस्य सूत्रांशस्य वा ज्ञापनं विधीयते, तथापि अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् वाधते इयं परिभाषा प्रत्ययोत्तरपदयोश्च इति सूत्रेण ज्ञापिता अस्ति। न्यायसिद्धपरिभाषाणां तात्पर्यं भवति- या परिभाषा लौकिकात् अथवा शास्त्रीयन्यायात् सिद्ध्यति, यथा-यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते परिभाषा तु लौकिकन्यायात् सिद्धा, अत्र देवदत्तशब्दस्य अङ्गाधिक्ये जाते तद् विशिष्ट नाम अङ्गाधिकविशिष्टमनुष्यस्य देवदत्तशब्देन ग्रहणं भवति। अनया रीत्या न्यायसिद्धपारिभाषासु एकदेशविकृतमनन्यवत्, व्यपदेशिवदेकस्मिन्, असिद्धं वहिरङ्गमन्तरङ्गे, येनाप्राप्ते यो विधिरारभ्यते स तस्य वाधको भवति इत्यादयः परिभाषाः परिगण्यन्ते। तत्र वाचनिकी परिभाषा द्विविधा भवति, प्रथमतः सूत्रसिद्धवाचनिकी, द्वितीयतः स्वतन्त्र वाचनिकी। तत्र सूत्रसिद्धवाचनिकिपरिभाषासु निर्दिश्यमानस्यादेशाः भवन्तीति परिभाषा आयाति।निर्दिश्यमानस्यादेशाः भवन्ति, षष्ठीस्थाने योगा इति सूत्रस्यावृत्तिं विधाय सिद्धिः क्रियते। तस्मात् इयं परिभाषा स्वतन्त्रवाचनिकी न भूत्वा अपि वचनरूपेण पठितसूत्रेण सिद्धत्वात् सूत्रसिद्धवाचनिकी कथ्यते। नागेशभट्टेन नव्यन्यायसूत्रशैलीमुपाश्रित्य परिभाषाणां विवेचनं कृतम् ।अष्टाध्याय्यां सूत्राणां प्रवृत्तिः तथा याथार्थ्य प्रतिपादनाय पाणिनिना परिभाषानिरूपणं संपादितम्।

एवं रीत्या पाणिनिना अष्टाध्याय्यां प्रथमाध्याये संज्ञा-परिभाषा-लादेशानाम्, द्वितीयाध्याये समास-कारक-विभक्तीनाम्, तृतीयाध्याये प्रत्यय-सनन्तादिधातुसंज्ञा, विकरण कृत्-तिङादीनाम्, चतुर्थाध्याये स्वादि-स्त्रीप्रत्ययानाम्, पंचमे तद्धितादीनाम्, षष्ठे संप्रसारण-प्रकृतिभाव-स्वरसूत्राणाम्, सप्तमाध्याये अधिकार-आदेश-ह्रस्वविधीनाम्, अष्टमाध्याये असिद्ध- निष्ठा-रुत्व-णत्वादीनां समुपस्थापनं विहितम् ।

**२.सूत्रव्याख्यानविधिः-** सूत्रव्याख्याने पदच्छेद-पदार्थ-समस्तपदविग्रह-वाक्ययोजना-वाक्याध्याहारप्रभृतिविषयाणां विवरणमपरिहार्यम् । एतादृशव्याख्यानविधौ भाष्यवार्त्तिकयोरवदानं महार्हम् । व्याकरणे सामग्रिकतया पंचवृत्तयः परिलक्ष्यन्ते, यथा-कृत्-तद्धित-समास-एकदेश-धातुरूप इति ।वृत्तिस्तथा भाष्यमध्ये पार्थक्यं भवति-वृत्तिः नाम परार्थाभिधानम्, भाष्यं तु सूत्रार्थसमन्वयपूर्वकं विशदविवरणम् ।

**३.संक्षिप्ता सूत्रशैली-** अष्टाध्यायीव्याकरणे संक्षिप्ता सूत्रशैली एका विशिष्टा पद्धतिः । सूत्राणां संक्षेपप्रक्रियानिमित्तं पाणिनिना एकादेशः, प्रकृतिभावः,पूर्वरूपम्, पररूपम्, आगमः, आदेशः, अनुवृत्तिः, अधिकारप्रभृतीनां समाश्रयणमनुसृतम् । पाणिनिना लौकिकशब्दसहितं वैदिकशब्दानां कृते सूत्राणां सन्निवेशः यथायथं विहितम् । तत्र 'रामैः' प्रभृति सिद्ध्यर्थं "अतो भिस ऐस" सूत्रं विद्यते, 'देवेभिः' इति वैदिकरूपसिद्ध्यर्थं च "वहुलं छन्दसि" सूत्रमस्ति ।तथैव पाणिनिना प्रत्ययानां विभागद्वयं विहितं,यथा-
सर्वनामस्थानम्,असर्वनामस्थानम् । तथाहि अङ्गानामपि भागद्वयं यथा-भ तथा पदम् । तथैव धातुविहितलकाराणां विभागद्वयं, यथा-सार्वधातुकम्,आर्धधातुकम् च । अनया रीत्या पाणिनेः सूत्रशैली महनीया ।

**4.वैज्ञानिकपद्धतिः-**विषयविशेषसम्वन्धे सर्वेषां सूत्राणामेकस्मिन् प्रकरणे व्यवस्थापनम्, यथा- "उपदेशेऽजनुनासिक इत्"[१२], "न विभक्तौ तुस्माः"[१३], "षः प्रत्ययस्य"[१४], "लशक्वतद्धिते"[१५], "हलन्त्यम्"[१६], "आदिर्ञिटुडवः "[१७], "चुटु" [१८], "तस्य लोपः "[१९] ।

महामुनिपाणिनिः अष्टाध्यायीव्याकरणं वैज्ञानिकपद्धत्या प्रणीतवान्।यत्र वाक्यविभाजन-अन्वाख्यानं तथा पदविभाजन-अन्वाख्यानं शब्दविदां शब्दवोधाय पर्यवेशितम्। अतः यावत् पर्यन्तं वाक्यात् पदविबागः न निष्पद्यते तावत् पर्यन्तं प्रकृतिप्रत्ययविभागः कल्पयितुं न शक्यते। तदर्थं पाणिनिना प्रथमाध्याये पदसमूहस्य संकलनं कृतमस्ति। पदानां संकलनं संज्ञाज्ञानस्य अपरिहार्यत्वात् प्रथमाध्याये संज्ञासन्निवेशं निरीक्ष्य एष अध्यायः संज्ञाध्यायत्वेन सुविदित। आ कडारादेकासंज्ञा(पा.सू-१-४-१) इति सूत्रे भाष्यकारेण संज्ञाधिकारश्चायमिति वचनमुपपादितम्। अचोऽन्यादि टि (पा.सू-१-१-६४), अलोऽन्त्यात् पूर्व उपधा(पा.सू-१-१-६५) इति टिसंज्ञकस्तथा उपधासंज्ञकसूत्राभ्यां शब्दसंज्ञात्वात् अर्थसंज्ञापूर्वात् एतेषां विरचनाभावस्य कारणं भवति-एतत् संज्ञाद्वयस्य सम्वन्धः आदेश-लोपाभ्यां सार्धं विद्यते।

तथाहि प्रथमाध्याये द्वितीयपादे अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (पा.सू-१-२-४५) तथा कृत्तद्धितसमासाश्च(पा.सू-१-१-४६) इति सूत्राभ्यां प्रातिपदिकसंज्ञाविधानं कृतम्। तत्र प्रातिपदिकसंज्ञाविमर्शसहितं स्वरूपाणामेकशेष एकविभक्तौ(पा.सू-१-२-६४) इति सूत्रविरचनात् वुध्यते यत् प्रातिपदिकस्य एकशेष भवतीति पाणिनेः सिद्धान्तः। तथैव प्रथमाधाये तृतीयपादे विप्रतिषेधे विचारदृष्ट्या

प्रथमतया आत्मनेपदस्य विवरणमनन्तरं परस्मैपदस्य निरूपणं विहितम्। चतुर्थपादे कारके (पा.सू-१-४-२३)इति अधिकारसूत्र सन्निवेशपूर्वकं विप्रतिषेधे परमिति नियमानुसारं कारकप्रकरणं सन्निवेशितम्।तथाहि पतञ्जलिना प्रोक्तम्- अपादानमुत्तराणि कारकाणि वाधन्ते तदर्थं प्रथमत: ध्युवमपायेऽपादानम् (१-४-२४)इति सूत्रमुपस्थाप्य अनन्तरं संप्रदानम्, करणम्, अधिकरणम्, कर्म, तथा कर्तृकारक विधायकानि सूत्राणि उपन्यस्तानि सन्ति।

द्वितीयाध्याये वाक्यस्य द्वैविध्यम् अर्थात् व्यासवाक्यम्, समस्तवाक्यम् (समासवाक्यम्) उपस्थापितम्। अत्र समासवाक्यस्यार्थ: भवति- समुदायशक्तिसंपन्न: पदसमुदाय:। अत्र समासोपयोगित्वात् प्रथमत: व्यासवाक्यानां निरूपणं कृतमस्ति। द्वितीयाध्यायस्य तृतीयपादे शब्दज्ञानमनन्तरमर्थज्ञानाय विभक्तिनिर्द्देश: प्रक्रमेण विहित:, यथा-द्वितीया, चतुर्थी, तृतीया, पंचमी. सप्तमी,प्रथमा तथा षष्ठी इति।

तृतीयाध्याये प्रकृतिप्रत्ययस्यार्थयो: प्रत्ययार्थस्यैव प्राधान्यमिति नियमानुसारं तृतीयाध्यायादारभ्य पंचमाध्यायं यावत् प्रत्ययविधानं कृतम्। व्याकरणस्य संक्षिप्तानुशीलनं प्रमुकलक्षत्वात् पाणिनिना संक्षिप्तत्वात् तृतीयप्रकरणस्य निरूपणमादौ कृतम्। अनन्तरं कृत्प्रकरणं विनिर्द्दिष्टम्।एवञ्च चतुर्थाध्याये तद्धितप्रकरणे अर्थज्ञानापेक्षया अवधिज्ञानं वलवत्तरम्। तदर्थं पाणिनिना अध्यायेऽस्मिन् द्वितीयपादादारभ्य तृतीयपादं यावत् शैषिकप्रत्ययानां विधानं कृतमस्ति। तत्र पंचमाध्याये प्रत्ययाधिकारस्तथा अपवादप्रत्ययभिन्न ठक्, यत्प्रभृति प्रत्ययानां निरूपणं कृतम्। तत्र आदेशागमयो: पृथक् विदानात् ज्ञायते-आदेशशक्त्यपेक्षया आगमशक्ति: वलीयसी इति।

तत्र षष्ठाध्याये प्रथमपादे स्वरप्रकरणमुपस्थापितम्। तत्र सप्तमाध्याये प्रथमत: प्रत्ययादेश: विद्यते। अनन्तरं विभक्त्यादेश: विनिर्द्दिष्ट:। अत्र सिच् प्रकरणानन्तरम् इडागमप्रकरणस्य निरूपणं कृतम्।इडागमसम्वन्धे नियमद्वयं परिलक्ष्यते, यथा- इडागमनिषेधप्रकरणम् तथा इडागमप्रकरणमिति। यद्यपि सर्वत्र विधिसूत्रात् परं निषेधसूत्राणां विधानं सुसंगतं तथापिपाणिनिना वैपरीत्यरीत्या आदौ निषेधप्रकरणं प्रारव्ध:।

अष्टमाध्यायस्य प्रथमपादे पदानां द्वित्वविधानं दृश्यते। तत् पूर्वं सप्तमाध्यायं यावत् वाक्यात् पदविभाग: तथा प्रकृतिप्रत्ययसन्निधानात् पदसंघटनप्रक्रिया पाणिनिना सन्निवेशिता। अष्टमाध्यायस्य द्वितीयपादात् ग्रन्थं समाप्तिं यावत् नाम चतुर्थपदं यावत् त्रिपादी पदेन असिद्धज्ञानं प्रतिपादितं विद्यते। त्रिपाद्यां पूर्वशास्त्रदृष्ट्या परशास्त्राणाम् असिद्धकारणं प्रकरणेऽस्मिन् सूत्राणि सक्रममुपन्यस्तमस्ति। अनन्तरं स्वरसिद्धिनिमित्तम् उदात्तानुदात्तस्य स्वरित: (पा.सू-८-४-६६) सूत्रादारभ्य अ अ (पा.सू-८-४-६८)इति सूत्रशेषपर्यन्तं सूत्रद्वयं प्रवर्त्तितम्।

पाणिनिप्रणीताष्टाध्यायी परिशीलनात् दृश्यते वैयाकरणदृष्ट्या शब्द: नित्य:, अपरेषां मते शब्द: अनित्य: । तथाहि सिद्धे शब्दार्थसम्वन्धे इति वार्त्तिकाधारेण महाभाष्यादवगम्यते शब्दार्थौ नित्यौ, तयो: समन्वन्धश्च नित्य:। तदर्थं महाभाष्ये-कथं पुनरिदं भगवत: पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्। व्याकरणस्य शब्दानुशासनसम्वन्धे भर्त्तृहरिणा कथितम्-

तस्मादकृतकं शास्त्रं स्मृतिं च सनिवन्धनाम्।<br>
आश्रित्यारभ्यते शिष्टै: शब्दानामनुशासनम्।।

कैयट: प्रदीपव्याख्याने कथयति-लोके स्वार्थे प्रयुज्यमानानां शब्दानां साधुत्वमात्रम्, अनेन शास्त्रेण अन्वाख्यायते, न तु अर्थे नियोग: क्रियते।(प्रदीप:-अ-५/१/९०) अत्र अयं निष्कर्ष: पाणिनिशब्दानुशासनप्रक्रियया प्रयुज्यमानशब्दानां साधुत्वविषयवोध: जायते।साधुशब्दानामन्वाख्याननिमित्तं पानिनिना अष्टाध्याया प्रणीताम्। महाभाष्यकारेणापि –शिष्टपरिज्ञानार्थाष्टाध्यायी । पाणिनि: शब्दानां स्मर्त्ता न तु कर्त्ता। अत: प्रयोगार्हपदानां व्यवहारनिमित्तमन्वाख्यानं प्रतिपादितम्। पाणिनिपरम्परायाम् असाधुशब्दप्रयोग: लोकसिद्ध: एवञ्च असाधुशब्दसाधुशब्दयो: समानार्थकत्वं विद्यते। महाभाष्यकार: कथयति- समानायामर्थावगतौ शब्देनापशब्देन च धर्मनियम: क्रियते, अर्थात् साधुशब्दस्तथा असाधुशब्द: यद्यपि समानार्थं वोधयति तथापि धर्माय अभ्युदयाय वा साधुशब्दप्रयोग एव विधातव्य: । महाभाष्यस्य पस्पशाह्निके – एकस्य शब्दस्य वहव अपभ्रंशा:, तद् यथा गौ: इत्यस्य गावी, गोणी, गोता, गोपतिलका । अस्मात् ज्ञायते पाणिनिसमये अपशब्दानां प्रयोग: भवतिस्म। परन्तु धर्मदृष्ट्या साधुशब्दानामन्वाख्यानमेव पाणिनिना समाश्रितम्।

अनया रीत्या अष्टाध्याय्यां यादृशी लाघवपद्धति: वैज्ञानिकरीत्या पाणिनिना संगुम्फिता, तत्तु व्याकरणान्तरे नैव परिलक्ष्यते ।

**5.त्रिमुनिव्याकरणम्-**पाणिनिव्याकरणे सूत्रकार: पाणिनि:, वार्त्तिककार: कात्यायन:, भाष्यकार: पतञ्जलिरिति त्रय एव प्रमुखं प्रमाणम् । एते महर्षय: त्रिमुनिरूपेण पाणिनिव्याकरणपरंपरायां विश्वविश्रुता: सन्ति । पाणिने: पूर्वतनानि व्याकरणानि वहुसमयव्ययसाध्यानि आसन्,

परन्तु पाणिनिप्रणीतं लघुभूतमष्टाध्यायीव्याकरणं सर्वजनादृतं सुप्रशस्यं च । पाणिनीयव्याकरणस्य वैशिष्ट्यं प्रख्यापयितुं महाभाष्ये दृश्यते-कथं तर्हि इमे शब्दाः प्रतिपत्तव्याः इत्याशंक्य किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्त्यम् । येन अल्पेन यत्नेन महतः महतः शब्दौघान् प्रतिपद्येरन् इत्युक्तम् । तत्र अष्टाध्याय्याः वेदांगत्वात् वैदिकपाठे न तत्र योगविभागाः सन्ति । वार्त्तिककारकृता योगविभागाः प्रमाणत्वेन तत् पाठे स्वीक्रियन्ते । तथाहि-"अचोञ्णिति" इति सूत्रे योगविभागः सखिव्यञ्जनार्थः । वार्त्तिककृता उच्यते यत्-अत्र सख्यर्थः व्यञ्जनाद्यर्थः योगविभागः कर्त्तव्यः । "आदैच् घेः" अत्र औत्वे योगविभागः अर्थात् औत्वे योगविभागः कर्त्तव्यः । वार्त्तिककृता प्रदर्शितः योगविभागः लोके आश्रीयते, परन्तु भाष्यकारप्रदर्शिताः सूत्रभेदाः योगविभागाः लोके न आश्रीयन्ते । तथाहि "अदसो मात्" (१-१-१२) सूत्रभाष्ये- अथवा योगविभागः करिष्यते अदसः, अदस इत्यादयः प्रगृह्यसंज्ञाः भवन्ति । एतादृशः योगविभागःलोके नाश्रितः, एवञ्च "इकोगुणवृद्धी" (१-१-३)सूत्रे भाष्ये मृज्यर्थमितिचेत् योगविभागात् सिद्धम् , किन्तु एतादृशयोगविभागस्य लोकेऽनाश्रयणम् ।

मुनित्रयप्रवर्त्तितं पाणिनीयव्याकरणं स्वयं चकास्ति, भाषायाः महत्वं वर्द्धापयति च ।अतः पाणिनेः सूत्रात्मकव्याकरणस्य महिमा ,कात्यायनमुनेः वार्त्तिकानां गरिमा तथा भाषासौष्ठवपरिपूर्णमहाभाष्यस्य मधुरिमा साकल्येन त्रिमुनिव्याकरणस्य महत्वं महनीयत्वं च प्रतनोति ।

**६.निबन्धस्य प्रासंगिकता-** व्याकरणं नाम शब्दस्वरूपविज्ञानम् । शब्दस्य चतुर्धा प्रवृत्तिः सर्वसम्मता । भाष्यकृता ऋलृक् सूत्रे भाष्ये जाति- व्यक्ति-गुण-क्रियारूपेण शब्दानां चतुष्टयी प्रवृत्तिः गृहीता । पाणिनिकृता अष्टाध्यायी मंगलार्थं प्रयुक्तं वृद्धिशब्दं गृहीत्वा वृद्धिरादैच् इत्यस्मात् आरभ्य पूर्णांगविषयसमूहैः यथायथं समुपन्यस्ता । अष्टाध्यायीवर्णितचतुस्सहस्रसूत्रेषु वर्णपदसमुपेतं सूत्रसंघातं सर्वं यथार्थमिति विवक्षया महाभाष्यकारः कथयति-न एकेन वर्णेन अनर्थकेन भवितव्यम्, किमु इयता सूत्रेण इति ।

**७.निबन्धस्यावदानम्-**मया रूपायितेऽस्मिन् निबन्धे समासेन विस्तरभयात् पाणिनिप्रणीताष्टाध्याय्याः रचनावैशिष्ट्यं समुपपादितम् । सर्ववेदपारिषदं हीदं शास्त्रं विविधेषु विषयेषु स्वकीयं महत्वं समुद्घोष्य जगतितले सर्वातिशायी विद्यते । अष्टाध्याय्यां सूत्रपाठः, धातुपाठः, गणपाठः सम्यक्तया सुव्यवस्थिताः सन्ति । सकलशब्दमूलभूतधातुपाठस्तु दशगणैः विभक्तः सन् सार्वधातुकप्रत्ययानां निमित्तं व्यवह्रियते । आर्धधातुकप्रत्ययानां कृते दशगणानां तात्पर्यं नैव परिलक्ष्यते । गणानुसारमत्र शप्प्रभृति विकरणानां व्यवस्थापना अस्ति । अष्टाध्यायीरीत्या धातौ प्रातिपदिके वा कस्यापि प्रत्ययस्य संयोगवेलायामंगकार्यपूर्वात् पंच-उपांगानां विचारः क्रियते । तानि पंचोपांगानि यथा-प्रत्ययादेश- विकरण- धात्वादेश- अतिदेश- द्वित्वाभ्यासः कार्यः ।

**उपसंहारः-** पाणिनिः स्वप्रणीताष्टाध्यायीव्याकरणे शब्दानुशासनस्य सर्वेषामवयवानां विवरणं पूर्णतया वर्णितवान्। भारतीयव्याकरणपरंपरायां भाषाविदां सिद्धान्ते शब्दस्य चतुर्विधवर्गीकरणं गृहीतम् ।यथा-नाम-आख्यात-उपसर्ग-निपातेति । महाभाष्यकारेण[२०] चत्वारि पदजातानि नामाख्यातोपसर्गनिपातश्च इत्युक्तम् ।पाणिनिना नामशब्दानां त्रिविधविभागः स्वीकृतः, यथा-यौगिक-योगरूढ-रूढेति । एवञ्च पक्षान्तरे शब्दानां वर्गीकरणं चतुर्धा अप्युपलभ्यते,यथा-जातिशब्दः,गुणशब्दः,क्रियाशब्दः,यदृच्छाशब्देति । यद्यपि यदृच्छाशब्दः संस्कृतभाषाया अंगभूतः नास्ति, तस्मात् शब्दानां त्रिविधत्वमपि स्वीक्रियते । ऋलृक् सूत्रे भाष्ये महाभाष्यकारः कथयति[२१]- त्रयी च शब्दानां प्रवृत्तिः- जातिशब्दाः,गुणशब्दाः,क्रियाशब्दा इति, न सन्ति यदृच्छाशब्दाः ।

अष्टाध्यायीव्याकरणे माहेश्वरवर्णसमाम्नायादारभ्य संज्ञापरिभाषासहितम् अच्-हल्–स्वादिसन्धीनां प्रतिपादनं जातम् । अनन्तरं सुवन्त-अव्यय-स्त्रीप्रत्यय-कारकविभक्ति- निर्णयस्तथा लम्वायमान तद्धितप्रकरणस्य विमर्शः संक्षिप्तसूत्रशैल्या उपपादिताः । तत्र धातुपाठ- तिङन्तप्रकरण- लकारार्थप्रभृतिदशप्रक्रियासहितं कृदन्तप्रकरणं तथा उणादिप्रत्ययान्तशब्दानां विवरणं यथायथं सन्निवेशितं विद्यते । विपश्चितां शाब्दिकानां सिद्धान्तदृष्ट्या अष्टाध्यायीरचना -वैशिष्ट्यं व्याकरणजगति सर्वान् अतिशेते ।

**पादटीकाः**

१.गोपथब्राह्मणः-पू-१/२४ २.निरुक्तम्-१३/२ ३.म.भा.पस्पश्
४.पा.सू-२-१-५८ ५.पाणिनिकालीन भारतवर्ष, अध्याय-८
६. वा.प-३-१-७८ ७.म.भा-१-१-७० ८. पा.सू- ४-१-४
९.म.भा.प्रत्याहाराह्निकम् १०. पा.सू- १-२-४५ ११.पा.सू-१-२-४६
१२.पा.सू-१-३-२ १३.पा.सू-१-३-४ १४.पा.सू-१-३-६
१५.पा.सू-१-३-८ १६.पा.सू-१-३-३ १७.पा.सू-१-३-५
१८.पा.सू-१-३-७ १९.पा.सू-१-३-९ २०. म.भा-अ.११
२१.ऋलृक् प्रत्याहार सूत्रभाष्यम्

**Ph.D Scholar**
**(Sanskrit)**
**MSCBD University**
**Baripada, Mayurbhanj**

# व्याकरणसिद्धान्तसुधानिधिदिशा प्राक्कडारात्समास इति सूत्रे प्राग्ग्रहणप्रयोजनविचारः

पङ्कजराउलः

छोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलुरमठः

Ph- 9123676066, Email- raulpankaj2013@gmail.com

## भूमिका

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**

**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥**[1]

इत्येवं भर्तृहरिवचनेन 'मुखं व्याकरणं स्मृतम्'[2] इति शिक्षादिवचनैश्च षड्वेदाङ्गेषु व्याकरणमेव वेदपुरुषस्य प्रधानभूतम् अङ्गं भवति। तत्र ऐन्द्रचान्द्रादिषु नवविधेषु व्याकरणेषु अद्यावधि प्रसिद्धत्वेन महत्त्वपदमलङ्करोति पाणिनीयं व्याकरणम्। अस्य च नामान्तरं त्रिमुनिव्याकरणमिति। पाणिनिकात्यायनपतञ्जलिभिः त्रिभिः मुनिभिः प्रवर्तितमित्यतः त्रिमुनिव्याकरणमिति प्रसिद्धिः। तत्रादौ महर्षिणा पाणिनिना सूत्रात्मकः अष्टाध्यायीग्रन्थः व्यरचि। पाणिनीयसूत्रेषु अवशिष्टविषयाणां बोधार्थं पाणिनिसूत्रांशपूरकत्वेन आचार्यः कात्यायनः वार्तिकानि रचयामास। परमेतावता न हि जनसामान्यः सवार्तिकं पाणिनीयम् अध्येतुं समर्थोऽभूदिति कारणात् महर्षिः पतञ्जलिः सूत्रवार्तिकोभयव्याखानपरकं महाभाष्यम् इति ग्रन्थरत्नं व्यरचयत्। महाभाष्यं हि पाणिनीयव्याकरणे प्रामाणिकग्रन्थत्वेन समादृयते। सर्वशास्त्रबीजहेतुभूतं महाभाष्यं न केवलं व्याकरणशास्त्रस्य अपि तु समेषामपि शास्त्राणामुपकारकं भवति। एतादृशस्य महतः ग्रन्थस्य गूढतत्त्वानां स्पष्टप्रतीत्यर्थं समये समये नैकानि व्याख्यानानि विलिखितानि। उपलब्धासु भाष्यव्याख्यासु भर्तृहरेः 'दीपिका' कैयटस्य 'प्रदीपः' नागेशभट्टस्य 'उद्योतः' चेति तिस्त्र व्याख्या विद्वत्समाजे मुख्यतया प्रतिष्ठिता वर्तन्ते। तदुत्तरकाले ये व्याख्याग्रन्था विरचिताः तासु लक्ष्मीधरसूनुना सर्वतन्त्रस्वतन्त्रप्रज्ञेन श्रीमता विश्वेश्वरसूरिणा विरचितो

---

[1]वाक्यपदीयम् १.११।

[2]पाणिनीयशिक्षा, का- ४२।

'व्याकरणसिद्धान्तसुधानिधिः' अन्यतमो वर्तते। ग्रन्थेऽस्मिन् विश्वेश्वराचार्येण अष्टाध्यायीक्रममनुसृत्य सूत्राणां भाष्यव्याख्यानं विहितम्। भाष्यव्याख्यासु इयमतिविस्तृता व्याख्या वर्तते। मीमांसकनैयायिकादिमतानां खण्डनपुरःसरं वैयाकरणसिद्धान्तोपस्थापने ग्रन्थस्य माहात्म्यं सातिशयो दरीदृश्यते। सिद्धान्तसुधानिधिग्रन्थे भाष्यानुसारं प्रपञ्चितं प्राक्कडारात्समास (२.१.३) इति सूत्रे प्राग्ग्रहणस्य प्रयोजनमत्र प्रबन्धे आलोच्यते।

## प्राक्कडारात्समास इति सूत्रस्यार्थः

अष्टाध्याय्यां द्वितीयाध्यायस्य प्रथमपादस्य तृतीयं सूत्रमिदम्। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति- प्राक् इति अव्ययपदं, कडारात् इति पञ्चम्यन्तं पदं, समासः इति च प्रथमान्तं पदम्। षड्विधेषु पाणिनीयसूत्रेषु इदम् अधिकारसूत्रं वर्तते। कडाराः कर्मधारये (२.२.३८) इत्यतः प्राक् समास इत्यधिक्रियते इति अस्य सूत्रस्य सामान्यार्थः। अर्थात् अष्टाध्याय्यां प्राक्कडारात्समास इत्यतः आरभ्य कडाराः कर्मधारये इत्यस्मात् सूत्रात् पूर्वपर्यन्तं विद्यमानेषु सूत्रेषु समास इति पदस्य अधिकारो वर्तते।

## प्राग्ग्रहणप्रयोजनविचारः

प्राक्कडारात्समास इति सूत्रे कडारात्समास इत्येवोच्यमाने कडारात् प्राक् समासोऽधिक्रियते इत्यर्थसिद्धौ पुनः प्राग्ग्रहणं किमर्थमिति चेदुच्यते आवृत्त्या पूर्वं समाससंज्ञा, ततोऽव्ययीभावादिसंज्ञेति संज्ञान्तरव्यापकत्वसिद्ध्यर्थम्। अर्थात् कडारात् इति पञ्चम्यन्तनिर्देशेन प्रागित्यर्थस्य उपस्थितावपि यत् प्राक्शब्दः प्रयुक्तः तेन तस्य आवृत्तिः भवति, एतेन इतः अग्रे याः अव्ययीभावादिसंज्ञाः विधास्यन्ते तेषु समाससंज्ञायाः अन्तर्भावोऽपि भवति। अन्यथा पर्यायेणैव संज्ञाद्वयं स्यात् उपसर्गकर्मप्रवचनीयसंज्ञावत्। प्र, परा, अनु इत्यादिप्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च भवन्ति किन्तु कर्मप्रवचनीयाः (१.४.८३) इत्यधिकारे ये प्रादयः आगच्छन्ति तेषां कर्मप्रवचनीयसंज्ञैव भवति न तु गतिसंज्ञा उपसर्गसंज्ञा वा। अत एव अनुर्लक्षणे (१.४.८४) इति सूत्रवृत्तौ लिखितं 'गत्युपसर्गसंज्ञापवादः' इति। इत्थं स्पष्टं यत् प्रादीनां यदा कर्मप्रवचनीयसंज्ञा भवति तदा उपसर्गसंज्ञा न प्राप्नोति। एवं यदि प्रकृतसूत्रे प्राग्ग्रहणं न क्रियते तदा अव्ययीभावादिसंज्ञानाम् अनवकाशत्वात् ताः

समाससंज्ञां बाधेरन्। एतेन समाससंज्ञा अव्ययीभावादिसंज्ञाश्च पर्यायेणैव प्राप्नुवन्ति न तु अव्ययीभावादिसंज्ञान्तरविषये समाससंज्ञाया अन्तर्भाव इति।

## प्रयोजननिराकरणम्

पूर्वपक्षिभिः तत्र आक्षिप्यते यद् समाससंज्ञाया अनवकाशत्वात् प्राग्वचनाभावेऽपि समासवचनात् समावेशो भविष्यतीति। अर्थात् अव्ययीभावतत्पुरुषादिसंज्ञाप्रदेशं व्यतिरिच्य समाससंज्ञा अनवकाशा वर्तते, अतः अस्मिन् सूत्रे समासपदसामर्थ्यादेव अव्ययीभावादिभिः समासस्य समावेशो भविष्यतीत्याशयः।

## प्रयोजनसाधनम्

तत्र समाधानमुच्यते- समाससंज्ञा तु सावकाशा वर्तते। विस्पष्टपटुः इत्यादिस्थले तदवकाश इति। विस्पष्टं पटुः इति विगृह्य सह सुपा (२.१.४) इति सूत्रेण अत्र समासः सञ्जातः। विस्पष्टादयो ह्यत्र प्रवृत्तिनिमित्तस्य पाटवादेर्विशेषणानि सन्ति। पटुरादिभिश्च शब्दैः गुणवद् द्रव्यमधीयते इत्यसामानाधिकरण्यम्, अतः नास्ति कर्मधारयः। एवं विचित्रं पटुः विचित्रपटुः, व्यक्तं पटुः व्यक्तपटुः इत्यादिस्थलेऽपि सह सुपा इत्यनेन समाससिद्धेः समासः सावकाशो वर्तते। अतः समासस्य अव्ययीभावादिसंज्ञाभिः समावेशार्थं प्राग्ग्रहणं कर्तव्यम्।

## प्रयोजननिराकरणम्

विस्पष्टपटुरित्यादौ सह सुपा इति सूत्रस्य सावकाशत्वप्रतिपादनपरकं प्राग्ग्रहणस्य प्रयोजनं यदुक्तं तत्र पूर्वपक्षिणः सह सुपा इत्यस्य सावकाशत्वमस्वीकुर्वन्तः आहुः- **'न च विस्पष्टपटुरित्यादौ तदवकाश इति वाच्यम्'**[3]। तथा हि विस्पष्टादीनि गुणवचनेषु (६.२.२४) इति सूत्रेण गुणवचनेषु उत्तरपदेषु विस्पष्टादीनां पूर्वपदानां प्रकृतिस्वरत्वं विधीयते। एषा हि आचार्यस्य शैली लक्ष्यते यत् येनैवावयवकार्यं भवति तेनैव समुदायकार्यमपि भवति। येन विस्पष्टादीनि इति सूत्रेण अवयवकार्यं स्वरः क्रियते तेनैव समुदायकार्यं समासोऽपि भविष्यति वृद्धकुमारीवरन्यायेन। वृद्धकुमारी इन्द्रेणोक्ता **"वरं वृणीष्व इति"**, सा वरमवृणीत **"पुत्राः मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्"** इति। ननु यावदस्याः

[3] व्याकरणसिद्धान्तसुधानिधिः,२.१.३, पृ-९१४।

पतिर्नभवति कुतः पुत्राः, कुतो गावः, धान्यम्। तत्र एकेनैव वाक्येन पतिः पुत्राः गावो धान्यं च सर्वं सङ्गृहीतं भवति। एवं विस्पष्टपटुरित्यादावपि विस्पष्टादीनि गुणवचनेषु (६.२.२४) इत्यनेन पूर्वपदस्वरविज्ञानात् ज्ञापकात् समाससिद्धेः सह सुपा (२.१.४) इत्यस्य अप्रवृत्तिरिति समासः अनवकाशः। अतः समासवचनात् समावेशो भविष्यति, नास्ति प्राग्ग्रहणप्रयोजनम्। अत एव पठन्ति-

**कः समास इति प्रश्ने विस्पष्टपटुगोचरे।**

**समासमात्रं ये ब्रूयुर्विस्पष्टपटवो हि ते॥**[4]

## प्रयोजनसाधनसमाधानान्तरम्

काकतालीयम् अजाकृपाणीयम् इत्यादौ सह सुपा (२.१.४) इत्यनेन समास इति समासस्य चरितार्थत्वेन अव्ययीभावादिस्थले तत्समावेशार्थं प्राग्वचनमिति। काकताल इति शब्दात् समासाच्च तद्विषयाद् (५.३.१०६) इति सूत्रेण इवार्थे एव छप्रत्ययेन काकतालीयम् इति शब्दः सिध्यति। काकतालमिव इति काकतालीयम् इत्याशयः। अत्र काकताल इति समस्तपदात् समासाच्च तद्विषयाद् इत्यनेन भूतसमासानुवादेन प्रत्ययविधानात् इवार्थस्यान्यपदार्थत्वेऽपि मत्वर्थे बहुव्रीहिविधानात् प्रकृते उपमानशब्दस्योपमेयवृत्तित्वाद् अन्यपदार्थाभावाद् बहुव्रीहेरसम्भवात् सह सुपा इत्यनेनैवात्र समासः कार्यः। तत्र काकतालीयम् इति शब्दे द्वौ इवार्थौ वर्तेते। एकः समासार्थः द्वितीयश्च प्रत्ययार्थः। काकस्यागमनमिव देवदत्तस्यागमनं तालस्य पतनमिव दस्योरुपनिपात इति प्रथमः इवार्थः, तत्र समासः। ततश्च पतता तालेन यथा काकस्य वधः तथा दस्युना देवदत्तस्य इति द्वितीय इवार्थः, तत्र छप्रत्ययः। तदाह-

**यच्चौराणामस्य च समागमो यश्च तैर्वधोऽस्य कृतः।**

**उपनतमेतदकस्माद्दासीद्वा काकतालीयम्॥**[5]

## प्रयोजननिराकरणम्

[4] व्याकरणसिद्धान्तसुधानिधिः,२.१.३, पृ-९१४।

[5] व्याकरणसिद्धान्तसुधानिधिः ,२.१.३, पृ-९१५।

उपर्युक्तं द्वितीयं समाधानं पूर्वपक्षिभिः खण्ड्यते- **'न च काकतालीय अजाकृपाणीयमित्यत्रावकाशः'**[6] इति। तन्मते अत्रापि समासाच्च तद्विषयाद् (५.३.१०६) इत्यनेन इवार्थविषयकसमासानुवादेन छप्रत्ययविधानबलादेव समाससिद्ध्या सह सुपा इत्यस्य अनुपयोगः। तस्मात् काकतालीयमजाकृपाणीयमित्यादावपि नास्ति समासस्यावकाशः।

## प्रयोजनसाधनसमाधानान्तरं तन्निराकरणं च

यद्युच्यते पुनाराजः पुनर्गवः इत्यत्र अजिति योगविभागेन तत्पुरुषसंज्ञां विनापि रूपसिद्धेः समाससंज्ञा सावकाशेति तदपि मतं खण्ड्यते पूर्वपक्षिभिः। पुनर्गवीति ङीबर्थे टच एव तत्रापेक्षितत्वेन तत्पुरुषसंज्ञाया अवश्यापेक्षणीयतया अव्ययं प्रवृद्धादिभिरिति मयूरव्यंसकादित्वाद्वा तत्पुरुषसंज्ञा एव वक्तव्या। ननु पुनराधेयम् इत्यत्र विशेषकार्यादर्शनात् तत्र समाससंज्ञा सावकाशा इति चेत्तथा न वाच्यमित्युच्यते पूर्वपक्षिभिः। तत्रापि अवश्यं गतिसंज्ञा वक्तव्या गतिकारकोपपदात्कृत् (६.२.१३९) इत्यनेन प्रकृतिस्वरो यथा स्यात्। अतः गतिसंज्ञानुरोधेन पुनश्चनसौ छन्दसि[7] इति वार्तिकेन पुनस् इत्यस्य गतिसंज्ञायां कुगतिप्रादयः (२.२.१८) इति तत्पुरुषसंज्ञैव वक्तव्या। यतोऽनावः (६.१.२१३) इति सूत्रेण अत्प्रत्ययान्तस्य धेयशब्दस्य आद्युदात्तत्वात् पुनराधेयशब्दे एकार उदात्तः। गतिसंज्ञाभावे तु समासान्तोदात्तत्वं स्यात्। ननु तर्हि पुनरुत्स्यूतं वासो देयं, पुनर्निष्कृतो रथ इत्यादौ अवकाश इति। अत्र पुनःशब्दस्य गतिसंज्ञायां सत्यां थाथादिस्वरेण अन्तोदात्तत्वं भवति, असत्यां तु समासस्वरेण इति विशेषाभावाद् गतिसंज्ञाया अभावात् समाससंज्ञा एव मन्यते। तत्र पूर्वपक्षिणः वदन्ति यद् अत्रापि अवश्यं गतिसंज्ञा वक्तव्या। यतो हि असत्यां गतिसंज्ञायां समासान्तोदात्तत्वं स्यात्, गतिसंज्ञायां तु गतिरनन्तरः (६.२.४९) इत्यनन्तरग्रहणसामर्थ्यात् थाथादिस्वरं बाधित्वा उच्छब्दस्य प्रकृतिस्वरो भवति। उदात्तपुनःशब्दस्य तु शेषनिघातं बाधित्वा परत्वाद् गतिर्गतौ (८.१.७०) इति निघातो भवतीति विशेषसत्त्वात् गतिसंज्ञा वक्तव्या। न च पुनश्चनसौ छन्दसि इत्यनेन गतिसंज्ञा सिद्धा इति, भाषायां पुनराधेयादौ स्वरसिद्धये पुनःशब्दस्य गतिसंज्ञा वक्तव्या। छन्दसि स्वरव्यत्ययविधानात् आवश्यकतया न कर्तव्यं, भाषायां तु स्वरसिद्ध्यर्थं अवश्यमेव गतिसंज्ञा वक्तव्या इति भावः।

---

[6] व्याकरणसिद्धान्तसुधानिधिः,२.१.३, पृ- ९१४।

[7] गतिश्चसूत्रस्थवार्तिकम्।

ननु पुनरुत्स्यूतशब्दे उत्-शब्दस्य गतिरनन्तरः (६.२.४९) इत्यनेन प्रकृतिस्वर उदात्तो भवतीत्युक्तं, एतेन अन्येषां पदानां अनुदात्तं पदमेकवर्जम् (६.१.१५८) इत्यनेन अनुदात्तत्वसिद्धेः कथं काठके पुनरुत्स्यूतशब्दोऽन्तोदात्तः पठ्यते इति प्रश्नः। अस्य समाधानं पूर्वपक्षिभिः उच्यते यद् तत्र स्वरव्यत्ययेन प्रवृद्धादेराकृतिगणत्वाद् वा तत्सिद्धिरिति। इत्थं समाससंज्ञाया निरवकाशत्वेन सुत्रे समासग्रहणसामर्थ्यादेव तस्य अव्ययीभावादिभिः समावेशो भविष्यति, अतः प्राग्ग्रहणस्य प्रयोजनं नास्तीति पूर्वपक्षिणामाशयः।

## पूर्वपक्षिमतखण्डनं प्रयोजनसाधनं च

उपर्युक्तप्रकारेण पूर्वपक्षिणा सह सुपा (२.१.४) इत्यस्य निरवकाशत्वे प्रतिपादिते तावतापि एकसंज्ञाधिकारात् समासः पर्याय एव प्राप्नोति न तु समावेशः। समाससंज्ञा अव्ययीभावादिसंज्ञाश्च आकडारादेका संज्ञा (१.४.१) इति सूत्रस्य अधिकारे पठिताः। आकडारादेका संज्ञा इति सूत्रस्यायमर्थः- एतस्मात् सूत्रादारभ्य कडाराः कर्मधारये (२.२.३८) इत्यतः प्राग् एकस्य एकैव संज्ञा स्यादिति। अतः समासस्य अनवकाशत्वस्वीकारेऽपि कडाराः कर्मधारये इत्यतः प्राग् एकस्य एकैव संज्ञा भवतीति वचनान्नास्ति यौगपद्येन सम्भवः, पर्यायः प्रजज्येत। तस्मात् समाससंज्ञाया अव्ययीभावादिभिः समावेशार्थं यौगपद्येन प्राप्त्यर्थ्यं अवश्यं सूत्रे प्राग्वचनं कर्तव्यम् इत्याशयः ग्रन्थकर्तुः।

-------------------

## सहायकग्रन्थाः


1. पतञ्जलिः। २०१४। व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमुल्लसितम्), चतुर्थं खण्डम्। जोशी,भार्गवशास्त्री (संशोधकः)। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

2. विश्वेश्वरसूरिः। व्याकरणसिद्धान्तसुधानिधिः। शर्मा, दधीरामः (सम्पा०)। वाराणसी : चौखम्बा संस्कृत सीरीज।

3. व्यासः, पङ्कजकुमारः । २०११। व्याकरणसिद्धान्तसुधानिधिमर्मप्रकाशः। शतपथी, हरेकृष्णः (सम्पा०)। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्।

4. भट्टोजिदीक्षितः। २०१०। वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता)। शर्मा,परमेश्वरानन्दः(सम्पा०)। वाराणसी : मोतिलाल बनारसीदास।

5. दीक्षितः,पुष्पा। २०१०। अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)। नवदेहली : संस्कृतभारती।

6. भर्तृहरिः। २०१३। वाक्यपदीयम् (ब्रह्मकाण्डम्)। अवस्थी, शिवशङ्करः (सम्पा०)। वाराणसी : चौखम्बा विद्याभवन।

7. पाणिनिः। २००७। पाणिनीयशिक्षा। शिवराजः कौण्डन्यायः (सम्पा०)। वाराणसी : सुरभारती प्रकाशन।

# युवशक्तिप्रोत्साहने गीतामृतम्

डा० धनञ्जयवासुदेवद्विवेदी

सहायकप्रोफेसरः संस्कृतविभागस्य

राँचीस्थस्य डा० श्यामाप्रसादमुखर्जीविश्वविद्यालयस्य

झारखण्डे-834008

ईमेल-dvd1309@gmail.com, dvd74@rediffmail.com

दूरभाष-7992362827, 9931306859, 9431590113

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रसंग्रहैः।**

**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता।।**

**यस्माद्धर्ममयी गीता सर्वज्ञानप्रयोजिका।**

**सर्वशास्त्रमयी गीता तस्माद् गीता विशिष्यते।।**

कृष्णद्वैपायनवेदव्यासप्रणितस्य ज्ञानविज्ञानस्य अनुपमविश्वकोषस्य महाभारतस्य सर्वोत्कृष्टोंशः श्रीमद्भगवद्गीताऽस्ति। भगवतः व्यासस्य प्रसादात् गीतेयं महाभारतस्य भीष्मपर्वणि प्राप्यते। इयं वस्तुतः परब्रह्मणः भगवतः श्रीकृष्णस्य मुखारविन्दात् निःसृता। परमनिःश्रेयससाधिकायाम् अस्यां सप्तशतं श्लोका विराजन्ते। प्रस्थानत्रय्याम् अस्याः स्थानं महत्त्वपूर्णम्।

साम्प्रतम् अस्माभिः 'युवशक्तिप्रोत्साहने गीतामृतम्'-इति विषयमनुसृत्यैव लोकहितार्थं विचार उपस्थातव्यः। विषयः गीतायाः सर्वातिशायिमहत्त्वं निर्दिशति। अस्माकं देशे प्राचीनतमा अपौरुषेयाः चत्वारो वेदाः, आध्यात्मिकचिन्तनस्य विशिष्टाः शताधिकाः उपनिषद्ग्रन्थाः, बहुविधदर्शनशास्त्रग्रन्थाः, विविधधर्मशास्त्रग्रन्थाः, वेदाङ्गानि, पुराणानि, नानाविधाः काव्यग्रन्थाश्च विद्यन्ते। सर्वेषाम् एतेषां महत्त्वं देशे विदेशेष्वपि च प्रख्यातमस्ति। अत एव अस्माकं देशः जगद्गुरुरपि कथ्यते। विद्यमानेषु एतादृशेषु बहुमूल्यग्रन्थेषु श्रीमद्भगवद्गीताया एव सततं गानार्थं, श्रवणार्थम्, अध्ययनार्थं, मननार्थं, निदिध्यासनार्थं, भावनार्थं, कल्पनार्थं, सम्यक् स्वाङ्गीकरणार्थं च विविधशास्त्रमर्मज्ञैः विद्वद्भिः जनाः प्रेर्यन्ते, प्रबोधयन्ते, उपदिश्यन्ते च। तत्कारणमस्ति गीताया लोकोत्तररमणीयता, सद्व्यवहारसमन्वभावना आध्यात्मिकता च। इयं गीता हि सर्वशास्त्राणां सारांशः। सम्पूर्णशास्त्रीयज्ञानस्य निधिः। तथ्यमिदं गीताध्ययनशीलाः सज्जनाः सम्यग् जानन्ति।

गूढातिगूढाध्यात्मज्ञानप्रकाशिकानां सर्वासाम् उपनिषदामपि गीता परमाह्लादमयं नवनीतकं वर्तते। सारांशतः गीता सम्पूर्णम् औपनिषत्कं ज्ञानं दधाति। उपनिषदानन्दः गीतायां स्थाने स्थाने लभ्यते।

गीता मोक्षदायिन्याः गङ्गायाः अपि गरीयसी। शास्त्राणि मन्यन्ते यत् यः कश्चित् गङ्गायां स्नानं करोति स तत्त्वावबोधेन विनाऽपि मोक्षभाग् भवति। सत्यम्। परन्तु स्नानकर्ता प्रथमं तु सुदूरं गच्छति, पुनश्च स केवलं स्वात्मानमेव तारयितुं समर्थः। अन्यान् तारयितुं न तस्य शक्तिः। परन्तु यः गीतायां स्नानं करोति स स्वयं तु भवसागरं तरत्येव, अन्यान् अपि तारयितुं समर्थः सञ्जायते। अथ च गङ्गा भगवतः पादात् निःसृताऽस्ति, परन्तु गीता तु तस्य मुखाद् आविर्भूता विद्यते। गङ्गाप्राप्त्यर्थं दूरे गमनम् अपेक्ष्यते, परन्तु गीता तु गृहे-गृहे समुपलभ्यते। किञ्च इयम् स्वोपासकस्य पार्श्वेऽपि विराजते।सर्वत्र सुलभा एषा-

**गीतायाः पुस्तकं यत्र यत्र पाठः प्रवर्तते।**

**तत्र सर्वाणि तीर्थानि प्रयागादीनि तत्र वै।।**

तस्माद् गीता विशिष्यते।

गीतायां भगवान् कृष्णः स्वयम् उद्घोषयति यत् यः कश्चित् श्रद्धालुः गीतानिर्देशानुसारं कार्यं सम्पादयति नूनं स कर्मबन्धाद् विमुच्यते-

**ये ये मतमिदं नित्यमनुतिष्ठन्ति मानवाः।**

**श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः।।**[1]

अष्टादशाध्याये स पुनः स्फुटं कथयति यत् यो गीताध्ययनं करोति स वस्तुतः ज्ञानयज्ञेन मां प्रीणयति यश्च भक्तानां मध्ये सादरं गीतां श्रावयति गीताशास्त्रस्य च प्रचारं करोति स मनुष्याणां मध्ये मम प्रेष्ठः कार्यकर्ता। भविष्यत्कालेऽपि तस्माद् अन्यः कश्चित् प्रियतरो न भवति।

वेदाध्ययनं कृत्वा अल्पज्ञाः आसक्तिं भजन्ते, स्वर्गीयसुखं वाञ्छन्ति, श्रेयं विहाय प्रेयं अङ्गीकुर्वन्ति, तस्मात्ते मानवजीवनस्य लक्ष्यात् भ्रष्टा भवन्ति। ते सच्चिदानन्दं परमेश्वरं नाप्नुवन्ति। वस्तुतः ते समाधियोग्या एव न भवन्ति-

**भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।**

**व्यवसायात्मिका बुद्धिः समाधौ न विधीयते।।**[2]

गीताध्ययनस्य चमत्कारो विलक्षणः। अस्याः उपासकानां हृदि भवबन्धनकारणभूताः प्रलोभा नोपजायन्ते। मायायाः प्रबलप्रभावाः सर्वत्र लक्ष्यते परन्तु गीतापरायणशीलाः जनाः सततं सावधानाः तिष्ठन्ति। वस्तुतः गीतायाः प्रादुर्भावः एव मोहभञ्जनार्थम् अहंकारापनयनार्थम् अज्ञानान्धकारदूरीकरणार्थं कर्तव्याकर्तव्यस्पष्टीकरणार्थं ज्ञान-कर्म-भक्तियोगप्रकाशार्थं सञ्जातः। युवानम् अर्जुनं निमित्तीकृत्य संसारस्य सर्वेषां मानवानां कल्याणार्थं प्रवृत्तेयं गीता।

युद्धक्षेत्रे युवा अर्जुनः पश्यति यत् यैः सह युद्धं करणीयमस्ति ते सन्ति गुरवः, पितरः, भ्रातरः, स्वजनाः नानासम्बन्धिनश्च। कथं एते हन्तव्याः? स्वजनहननं परमगर्हितम्। अतो मोहाभिभूतस्य स भगवन्तं भणति- 'स्वजनं हि कथं हत्वा सुखिनः स्याम माधव', 'कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन, इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन'। सः कथयति यत् भिक्षाटनं कृत्वा जीवनयापनं वरं न तु गुरुणां हननं कृत्वा रुधिरप्रदिग्धानां भोगानाम् आस्वादनम्। शोकसंविग्नमानसोऽर्जुनः एवं निगद्य सशरं गाण्डीवं विसृज्य तूष्णीमास्थाय रथोपस्थे उपाविशत्।

अर्जुनस्य एतत् कर्म अभ्यर्हितस्य लब्धकीर्तेः वीरस्य कृते परमनिन्दनीयं सुयशप्रणाशकम्, अनार्यजुष्टं स्वर्गापहारकं चासीत्। तस्मात् अत्रत एव भगवान् कृष्णः अर्जुनम् उपदेष्टुमारभते-

**कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।**

**अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन।।**

**क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**

**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।**[3]

अर्थात् हे अर्जुन!एतस्मिन्नवसरे कुत एतद् आर्यैः गर्हितम् आत्मनः पतनकारणम् अपयशो हेतुश्चाधैर्यं तव हृदये समुपस्थितम्? त्वं हि वीरः शत्रूणां हन्ता चासि, क्षुद्रां हृदयस्य दुर्बलतामेतामुत्सृज्य संमोहादिकं च परित्यज्य युद्धाय कृतनिश्चयः समुत्तिष्ठ। त्वया ज्ञातव्यं यत् शास्त्रविहितकार्यकर्मानुष्ठानं सर्वैः करणीयम्। अस्मिन् प्रसङ्गे इदमपि सम्यग् बोद्धव्यं यत् प्राणिनां शरीरे आत्मा एव प्रमुखः। स च नित्यः, अचलः, अप्रमेयः, अजः, शाश्वतः, अव्ययः, अविनाशी, अच्छेद्यः, अदाह्यः, अक्लेद्यः, अशोष्यः, अविकार्यश्च। नासौ कमपि हन्ति न च केनापि हन्यते। भगवान् पुनः कथयति यत् सौभाग्यशालिन एव क्षत्रिया एतादृशं धर्मयुद्धावसरं प्राप्नुवन्ति। स्वर्गप्रदायकम् एतादृशम् अवसरं प्राप्य यदि त्वम् अत्रतः पलायसे तर्हि स्वधर्मं कीर्तिं च हित्वा महत्पापमवाप्स्यसि-संभावितस्य चाकीर्तिः मरणादतिरिच्यते। समत्वबुद्धिमास्थाय एतद्धर्मयुद्धकरणे केवलं लाभा एव लाभाः-

**हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।**

**तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।।**

**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।**

**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।**[4]

अत्रेदं साधु विज्ञेयं यत् परमेश्वरस्य संकेतमवाप्य सर्वाणि कर्माणि प्रकृतिरेव प्रतिपादयति। सा एव कर्त्री। नान्यः कश्चित् प्राणी। अहंकारविमूढात्मा स्वात्मानं कर्तारं मन्यते। स त्वन्धः। वस्तुतः स एव पश्यति यः केवलं प्रकृतिं कर्त्रीं मन्यते

स्वात्मानं चाकर्तारम्। अहंकारं विहाय एकां शुद्धव्यवसायात्मिकां बुद्धिमाश्रित्य आसक्तिं परित्यज्य कर्मफलेच्छां सर्वथा विस्मृत्य ईश्वरार्पणबुद्ध्या च यानि कानि कार्याणि सम्पाद्यन्ते तानि कथमपि बन्धनकारणानि भवितुं नार्हन्ति।

जगदिदं कर्मप्रधानम्। अत एव कथितम्-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**

**मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि।।**[5]

कर्मकरणेऽस्माकं स्वातन्त्र्यं न त्वकर्मणि। अस्यामवस्थायाम् एका जिज्ञासा उदेति यत् केन विधिना कर्म करणीयं येन बन्धनं न भवेत् अपितु मुक्तिः सुलभा स्यात्। अस्य उत्तरमास्ते यत् योगमाश्रित्य यदि कर्माणि क्रियते तर्हि तानि सर्वाणि कर्माणि बन्धनस्य हेतवो न भविष्यन्ति। प्रश्नोऽस्ति-योगः नाम किम्। भगवान् भणति- योगः कर्मसु कौशलम्। अस्य कथनस्यामभिप्रायः यत् शास्त्रानुमोदितानि यानि कर्माणि शास्त्रसम्मतरीत्या साम्यदृष्ट्या च कर्मफलानि परित्यज्य आसक्तिं चापि विहाय सम्पाद्यन्ते तानि कथमपि बन्धनकारणानि न भवन्ति। इदमेव कर्मकौशलम् तदेव च योगः। भगवान् 'समत्वयोगम्' प्रकाशयन् अर्जुनमुपदिशति-

**योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय।**

**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।**[6]

अर्थात् यत्किमपि कर्म कश्चित् कुर्यात् तत् पूर्णं स्यात् अपूर्णं वा कर्ता साफल्यं लभेत असाफल्यं वा सर्वासु अवस्थासु समभावेन भवनं समत्वयोगो निगद्यते। कार्यकरणस्य एषोऽपि विधिः कल्याणकरः। समत्वयोग एव बुद्धियोगः कथ्यते। बुद्धियोगयुक्ता ज्ञानिनः कर्मजं फलं त्यक्त्वा जन्मबन्धविनिर्मुक्ता भूत्वा अनामयं पदं प्राप्नुवन्ति।

योगयुक्तो जनो विविधशुभगुणसंयुक्तो भवति। योगाभ्यासबलात् स विशुद्धात्मा, विजितात्मा, जितेन्द्रियश्च भूत्वा समदर्शी सञ्जायते। स आत्मवत् सर्वभूतेषु पश्यति। स 'सर्वभूतस्थमात्मानम्' 'सर्वभूतानि चात्मनि विलोकयति। इत्थं सर्वभूतात्मभूतात्मा योगी सर्वकर्माणि कुर्वन्नपि न लिप्यते। स स्वकर्माणि ब्रह्मणि आधाय कर्मफलं विहाय आसक्तिं च परित्यज्य आत्मशुद्ध्यर्थं निष्पादयति। तस्मात् स नैष्ठिकीं शान्तिमाप्नोति अम्भसा पद्मपत्रमिव पापेन सर्वथा अस्पृष्टस्तिष्ठति।

श्रीमद्भगवद्गीता दुःखहा योगः प्रतिपादयति। योगोऽयं सर्वदुःखक्षयकरो भवति। गृहस्थाः सन्तु संन्यासिनो वा भवन्तु सर्वेषां कृते सुलभोऽयं योगः। योगकामी सततं सन्तुलितं भोजनं, शयनं, जागरणम्, आहारं, विहारं च करोति। एतद्विपरीतं व्यतिरेकं वा समाचरता जनेन दुःखहा यो नाधिगम्यते-

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**

**न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन।।**

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**

**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।**[7]

यूनां मध्ये शक्तिप्रोत्साहनार्थं आशावादः परमावश्यकः। आशावादः हि आर्यधर्मस्यैकतमद् मुख्यं वैशिष्ट्यम्। आशावादस्यौजःपूर्णभावैरोतप्रोतं हि नः प्राचीनं वाङ्मयम्। गीतायामप्येष प्राचीन आर्याणामादर्श ओतप्रोतः। कथितमस्ति-

**'उद्धरेदात्मनात्मानं नात्मानमवसादयेत्'।**[8]

इत्येवम् आत्मनैवात्मन उद्धरणम्, आत्मग्लानेश्चात्मनो रक्षणम् उपदिशन्ति अपि सा अपरतो भगवतः कृष्णस्य प्रेमरसाप्लुतैः शब्दैः विश्वासमपि ददाति-

**'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणस्यति'।**[9]

**'न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति'।**[10]

**'नेहाभिक्रमनाशो प्रत्यवायो न विद्यते'।**[11]

तात्पर्यमिदमस्ति यत् हे तात अर्जुन, कर्तव्यबुद्ध्या कर्म कुर्वन् कल्याणमार्गानुयायीश्वरभक्तः पथिको नहि कदापि दुर्गतिं गच्छतीति विश्वासं कुरु। कोऽपि सत्प्रयत्नो निष्फलतां गच्छेदिति नैव सम्भवति।

एषा हि कल्याणभावना भोगैश्वर्यप्रसक्तानाम्, इन्द्रियलोलुपानाम्, अवसरानुकूलं स्वकार्यसाधकानामादर्शहीनानां जनानां नैव विषयः। एतत्स्वरूपं तु स एव वेत्तुमलं यस्यैष विश्वासो यत्सत्यभाषणं संयतजीवनम् आपत्तीनामागमनेऽपि स्वकर्तव्यपालनाद् अपराङ्मुखत्वं तस्य स्वभावस्य, तस्य व्यक्तित्वस्य अन्तस्तमस्वरूपस्य आवश्यकतैव। गीताया भक्तेः निष्कामकर्मणश्च मूल एषैव आशामयी श्रद्धामयी च कल्याणभावनावतिष्ठते।

यूनां कृते यज्ञसम्पादनम् अपि आवश्यकम्। सामान्यतया अस्माकं सर्वाणि कर्माणि बन्धनस्वरूपाणि भवन्ति। बन्धनं तु तापत्रयमूलम्। अनेन प्रकारेण, 'पुनरपि जननं पुनरपि मरणम् इति दुःखप्रदायिनी प्रक्रिया निरन्तरं प्रचलिष्यति। एतत्क्रियायाः क्षयः तदैव भविष्यति यदा मनुष्याः सर्वाणि कर्माणि फलेच्छां विहाय यज्ञार्थं सम्पादयिष्यन्ति। अत एव भगवान् अनन्यभक्तम् अर्जुनम् इत्थम् उपदिशति-

**यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।**

**तदर्थं कर्म कौन्तेय युक्तसंगः समाचर।।**[12]

नियमितरूपेण यज्ञनिष्पादनं प्रधानमानवधर्मोऽस्ति। यज्ञं विना मानवजीवनस्य सार्थकता नास्ति। निःश्रेयससिद्धिः यज्ञेनैव भवितुमर्हति।

श्रीमद्भगवद्गीतायां दैवासुरसम्पद्विभागः अत्यन्तमहत्त्वपूर्णः। युवशक्तिप्रोत्सहनाय अस्य विभागस्य महती प्रासङ्गिकता। आदानाय दैवीसम्पद् प्रोक्ता। परिहाराय आसुरी सम्पद् प्रोक्ता। तद्यथा-

**अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः।**

**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।**

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**

**दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।**

**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**

**भवन्ति सम्पदं दैवीमभिजातस्य भारत।।**

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।**

**अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्।।**

**दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।**[13]

गीतासम्मतं ज्ञानं आत्मनः ऐकत्वस्य सम्पूर्णः अनुभवोऽस्ति। ज्ञानस्यास्य अवस्थाद्वयमस्ति। तत्र प्रथमम्-ज्ञानस्यास्य अवस्था अस्ति सर्वभूतेषु आत्मनः दर्शनम्। अत्र 'सर्वभूत' इति शब्दः आधारोऽस्ति। 'आत्मा' च आधेयः। परन्तु केवलम् एतावदन्मात्रमेव ज्ञानं पर्याप्तं नास्ति। अतः ज्ञानस्य द्वितीया अवस्था अपि वर्तते-'आत्मनि' सर्वभूतानां अर्थात् सर्वेषां प्राणिनां दर्शनम्। अत्र 'आत्मा' आधारभूतः सर्वभूतानि च आधेयानि। अर्थात् आत्मनि एव सर्वभूतानां स्थितिः अनुभूयते। एतादृशः ज्ञानी 'सर्वदर्शनः' कथ्यते-

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**

**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।**[14]

अत्रैव पुनः भगवान् कथयति-

**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।**

**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।।**[15]

अथ च-

**आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।**

**सुखं वा यदि वा दुःखं स योगी परमो मतः।।**[16]

अर्थात् सम्यग्दर्शननिष्ठा नरः सर्वेषु आश्रमेषु, देशेषु, वेशेषु, सम्प्रदायादिषु च रञ्चमात्रमपि भेदं न पश्यति। यथा मम सुखम् इष्टं तथैव सर्वप्राणिनाम् अनुकूलम्। यच्च दुःखं मम प्रतिकूलम् अनिष्टं यथा तथा सर्वप्राणिनां दुःखम् अनिष्टं इति एवम् आत्मौपम्येन सुखदुःखे अनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति न कस्यचित् प्रतिकूलम् आचरति।

कः पश्यति? कस्य दृष्टि सफला? कः यथार्थदर्शकः? अत्र भगवान् कथयति-

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।

**विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति।।**

**समं पश्यति सर्वत्र समवस्थितमीश्वरम्।**

**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्।।**

**प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।**

**यः पश्यति तथात्मानमकर्तारं स पश्यति।।**[17]

अत्र इदं सम्यग् अवधारणीयं यत् 'सर्वभूतस्थमात्मानम्' इति दृष्टान्तः अन्यत्रापि जगति द्रष्टुं शक्यते परन्तु 'सर्वभूतानि चात्मनि' इत्यस्य दृष्टान्तं भगवान् गीतायाः एकादशाध्याये स्वीये देवदुर्लभे विराट्रूपे अर्जुनं दर्शितवान् अस्ति। एकस्मिन् एव विराडात्मनि एकत्रैव एकस्य सम्पूर्णं जगत् भगवत्प्रदत्तदिव्यचक्षुसा अर्जुनं सुस्पष्टम् अपश्यत्-

**तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा।**

**अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा।।**[18]

परन्तु एतादृशः ज्ञानिशिरोमणिः सुदुर्लभोऽस्ति-वासुदेवः सर्वमिति स महात्मा सुदुर्लभः।[19]
एतादृशः ज्ञानी सर्वदा सर्वत्र समदर्शी भवति-

**विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।**

**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।**[20]

'पण्डिताः समदर्शिनः' इत्यत्र 'समदर्शिनः' इति शब्दः परममहत्त्वपूर्णोऽस्ति। अत्र 'समवर्तिनः' नास्ति। अनेन इदं सुतरां स्पष्टमस्ति यत् सर्वैः प्राणिभिः सह समानव्यवहारस्य निषेधं करोति। तथ्यमिदं कदापि न विस्मरणीयम्।
पुनश्च यथार्थज्ञानी एव स्थितप्रज्ञः[21] स्थितधीः[22] त्रिगुणातीत[23] ब्रह्मभूतश्च[24] कथ्यते गीतायाम्।

श्रीमद्भगवद्गीतायाः उपदेशं साकल्येन श्रुत्वा अर्जुनस्य हृदयोद्गारः खल्वेषम्-

**नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।**

**स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव।।**[25]

अर्थात् हे अच्युत, भवतः उपदेशेन मम मोहो भ्रमश्च निर्मूलतां गतौ यद्वशाद् हि एतस्योपदेशस्य प्रारम्भे शोकसंविग्नमानसेन अश्रुपूर्णाकुलेक्षेण विषीदता मया सशरं चापं विसृज्य 'न योत्स्ये' इत्येवमुक्तो भवानासीत्। अधुना गतसन्देहोऽहं भवतः वचनं करिष्ये।

अनन्तो वै महिमा गीतायाः। श्रीमद्भगवद्गीतया नहि कस्यापि सम्प्रदायविशेषस्य प्रतिपादनं क्रियते न चापि तया कस्यापि सम्प्रदायस्य खण्डनं तिरस्कारो वा विधीयते। सा वै कर्मविषयकमौलिकसत्यस्य प्रतिपादकं शास्त्रम् अत एव सा सार्वकालिकं सार्वदेशिकं च महत्त्वम् आवहति। मनुष्यस्य धार्मिकप्रवृत्तीः आलोचयन्ती सा तदर्थं सत्यमादर्शमपि प्रदर्शयति।

वस्तुतः श्रीमद्भगवद्गीता कर्मशास्त्रं नीतिशास्त्रं कर्तव्याकर्तव्यशास्त्रं वेति वक्तुं शक्यते। नूनं सास्माकं प्राचीनाया आर्यजातेरेकम् अनर्घसमुज्ज्वलं रत्नम्। न केवलं आर्यधर्मस्य पुनरभ्युत्थानार्थमेव किन्तु समस्तमानवसमाजस्य कल्याणार्थमपि श्रीमद्भगवद्गीतायाः आवश्यकता विद्यते। अपेक्षितमेतद् यद्वयं तस्या वास्तविकं स्वरूपं महत्त्वमुपयोगं चावगच्छन्तस्तद्द्वारा आर्यजनतायां तन्द्रां क्लान्तिं दैन्यं निराशावादम् आलस्यं प्रमादं दम्भं पाषण्डं चापसार्य तेषां स्थाने स्फूर्तेः उत्साहस्य उल्लासस्य आशायाः आत्मसम्मानस्य कर्तव्यपरायणतायाः सत्यनिष्ठायाश्च स्थापनया नवजीवनं संचारयेम। गीताऽस्मदीया। नूनं सास्माकं गौरवस्य गर्वस्य विषयः, परं सममेव तस्याः सार्वदेशिकं सार्वकालिकं च महत्त्वम्। समस्तमानवसमाजस्य कल्याणस्य रहस्यं तस्यां निहितम्। गीताया जीवनप्रदस्य उपदेशस्य सन्देशस्य च, स्वकीयाचरणेन, देशे सर्वत्र प्रसारणमेव नः प्रथमं कर्तव्यम्।

## सन्दर्भसङ्केताः


1. श्रीमद्भगवद्गीतायाम्-3/31
2. तत्रैव-2/44
3. तत्रैव-2/2-3
4. तत्रैव-2/37-38
5. तत्रैव-2/47
6. तत्रैव-2/48
7. तत्रैव-6/16-17
8. तत्रैव-6/5
9. तत्रैव-9/31
10. तत्रैव-6/40
11. तत्रैव-2/40
12. तत्रैव-3/9
13. तत्रैव-16/1-5
14. तत्रैव-6/29
15. तत्रैव-6/30
16. तत्रैव-6/32
17. तत्रैव-13/27-29
18. तत्रैव-11/13
19. तत्रैव-7/16
20. तत्रैव-5/18
21. तत्रैव-2/52
22. तत्रैव-2/56
23. तत्रैव-14/21-22
24. तत्रैव-2/72
25. तत्रैव-18/73

# वेदाङ्गनिरुक्तस्य वैशिष्ट्यम्

डा. दुर्गाशरणरथः
वेदभाष्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
Mob-8686919208

**शोधसारः-**

वेदाङ्गेषु अन्यतमं वेदपुरुषस्य श्रोत्रस्थानियं भवति निरुक्तम् । अतः पाणिनीयशिक्षायामुच्यते-**निरुक्तं श्रोत्रमुच्यते** इति । निरुक्तं निघण्टोर्महत्त्वपूर्णा टीकाऽस्ति । निरुच्यते निश्शेषेण उपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तत् निरुक्तमिति कथ्यते ।। अस्मिन् प्रसङ्गे दुर्गाचार्यस्य कथनमिदमस्ति - **'प्रधानं चेदमितरेभ्यः अङ्गेभ्यश्च अर्थपरिज्ञानाभिनिवेशात्।** निरुक्तं यस्मिन्नाधारे प्रवृत्तं भवति — अर्थात् प्रत्येकं संज्ञापदं धातुना व्युत्पन्नोऽभवत् इत्याधारस्तु नितान्तं वैज्ञानिकमस्ति अस्यैव सम्प्रति नामास्ति **'भाषाविज्ञानम्'** । अस्योन्नतिः पाश्चात्यजगति शतवर्षाभ्यन्तरे अभवत् । त्रिसहस्रवर्षं प्राग् वैदिकाः ऋषयः अस्य शास्त्रस्य सिद्धान्तानां वैज्ञानिकरीत्या निरूपणं कृतवन्तः । भाषाशास्त्रस्य इतिहासे भारतवर्षमेव अस्य मूलोद्गमस्थानमस्ति । निरुक्तस्य आरम्भेऽस्य विषयस्य येषां नियमानां प्रतिपादनं समुपलब्धं भवति, तत्तु विशेषरूपेण महनीयमस्ति। यास्ककृतं निरुक्तन्तु निघण्टुग्रन्थस्य व्याख्याऽस्ति । निघण्ट्वाख्यस्य वैदिककोषस्य भाष्यरूपमस्ति निरुक्ताख्यं वेदाङ्गम् । निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति, परन्तु निरुक्तकारो यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं करोति । अर्थात् निरुक्तनामके ग्रन्थे वैदिकशब्दानाम् अर्थज्ञानस्य प्रक्रिया वर्णिता अस्ति । निघण्टोः पञ्चाध्यायानां विवेचनं स्वकीये निरुक्तग्रन्थे यास्केन द्वादशाध्यायेषु सम्पादितमस्ति । निरुक्तं निरूपयन् सायणाचार्यः ऋग्वेदभाष्यभूमिकायामाह, **अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्** यदि अन्यानि वेदाङ्गानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तं वेदस्य अन्तर्भूतानि तत्त्वानि व्याकुर्वति । अन्यच्च निरुक्तं गद्यशैल्यां निबद्धमस्ति, किन्तु अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्यां निबद्धाः सन्ति । इत्थं निरुक्तेन वेदार्थानामवगमे सौविध्यं भवति ।

**पारिभाषिकशव्दाः** –

निरुक्तम्, निघण्टुः, वृषाकपिं, कात्स्र्न्यम्, समाम्नासिषुः, अनिंदविदे, दुहिता, नैगमः, असूया,दैवतम्, पोस्फुर्यन्ते ।

**उपोद्घातः -**

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।** (पश्पशान्हिके)

इति पश्पशान्हिके भगवता पतञ्जलिना व्यलेखी। विवक्षितेषु षड्वङ्गेषु निरुक्तशास्त्रमिदं मुख्यस्थानमावहति। सर्वादौ निरुक्तशव्दस्यार्थः कः? निर्वचनस्यलक्षणं किम् ? निरुक्तं कतिविधम् ? निरुक्तस्यमुख्यं प्रयोजनं किम् ? कति निरुक्तकाराः? निरुक्ते कति अध्यायाः काण्डानि वा सन्ति ? निरुक्ते प्रतिपाद्यमानाः विषयाः के ? निघण्टुशव्दस्यार्थः कः? निघण्टोः कर्ता कः? निघण्टोः कति भेदाः ? निघण्टौ कति काण्डानि ? निघण्टुनिरुक्तयोः भेदः कः? निघण्टौ वेदेभ्यः कतिशव्दाः संगृहिताः? एवं च निघण्टुनिरुक्तयोः कति टीकाकाराः इत्यादि प्रश्नाः पोस्फुर्यन्ते अस्माकं मानसे, अतःएतेषां समेषां प्रश्नानां समाधानाय शास्त्रोक्तरीत्या प्रमाणपुरस्सरं उपरिष्टात् समालोचयिष्यते।

"**निर्**" उपसर्गपूर्वक "**वच**" धातोः भावे "**क्त**" प्रत्यये निरुक्तशव्दोऽयं निष्पद्यते । **निरुच्यते निःशेषेण उपदिश्यते निर्वचनविधया तत्तदर्थवोधनाय पदजातं यत्र तन्निरुक्तम्।** कठिनवैदिकशव्दानां व्युत्पत्तिबोधकं शास्त्रं निरुक्तमुच्यते ।वैदिकशव्दानां समावेशः (कोशरुपेण) यस्मिन् ग्रन्थे कृतः स निघण्टुः इत्युच्यते।महाभारतस्य मोक्षपर्वणि निघण्टोः रचयिता प्रजापतिः कश्यप इत्युल्लिख्यते-

**वृषो हि भगवान् धर्मःख्यातो लोकेषु भारत।**
**निघण्टुकपदाख्याने विद्धिमां वृषमुत्तमम्।।**
**कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यचे ।**
**तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः ।।** महा.मोक्ष-342.86-87

निघण्टोः व्याख्यानग्रन्थः निरुक्तमस्ति। यास्कमतेन निरुक्तं व्याकरणस्य पूरकशास्त्रमस्ति य़थोक्तं तेन – **तदिदं विद्यास्थानं व्याकरणस्य कात्स्र्न्यम्** इति । नि. व्याकरणे केवलं शव्दानां व्युत्पत्तिरेव निर्धार्यते, किन्तु निरुक्ते व्युत्पत्या सह अर्थस्यापि निर्वचनं कृतमस्ति ।

**निरुक्तस्य मुख्य प्रयोजनम्**

अस्य निरुक्तस्य किं प्रयोजनमिति उच्यते यास्केनैव । **अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते**। किञ्च व्याकरणज्ञानस्य परिपूरणं निरुक्तस्य अध्ययनेनैव भवति। अतः व्याकरणस्य कात्स्र्न्यं

निरुक्तस्य एकं मुख्यप्रयोजनमिति श्रुयते- **तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम्** इति। अस्य शास्त्रस्याध्ययनं विना वेदमन्त्राणाम् अर्थज्ञानं न सम्भवति । वेदार्थपरिप्रकाशनाय एव प्राचीन निरुक्तकाराः स्व स्व निघण्टोः प्रणयनमकार्षुः – **उपदेशायग्लोयन्तोऽवरे विल्मग्रहणायेमं ग्रन्थं समाम्नासिषुःबिल्मं भिल्मं भासनमिति वा।** यतो हि अस्मिन् शास्त्रे वैदिकशब्दानां विवरणं, शब्दार्थविज्ञानं चोपदिष्टम् । अपि च वेदार्थेनैव सफला वयं भवेमेति उच्यते निरुक्ते । मन्त्रार्थज्ञानस्य प्रयोजनञ्चोक्तम् - **योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा** । - यो अर्थज्ञः स एव मङ्गलकरं प्राप्नोति नान्ये इति।

## निरुक्ते अधिकारीणः

अस्य ग्रन्थस्य अधिकारी भवति सः यः ज्ञानमपेक्षन् गुरोः समीपमागच्छति, तपस्वी, मेधावी च भवति । यः ज्ञानं नेच्छति तस्य ज्ञाने सर्वदा असूया भवति । यदि सः मन्त्रार्थविषये कार्यं करोति तर्हि अनर्थमेव भवति । तथा च यास्कोक्तिम् - **न अवैयाकरणाय, नानुपसन्नाय, अनिदंविदे वा, नित्यं हि अविज्ञातुः विज्ञाने असूया, उपसन्नाय तु निर्ब्रूयात्, यो वा अलं विज्ञातुं स्यात् मेधाविने, तपस्विने वा ।**

किञ्च उक्तं हि - **बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति** ।महा.

यास्ककृतभूमिकायां ग्रन्थस्य प्रयोजनम्, अधिकारी, निरुक्तस्य विभागाः इत्यादिविषयाः प्रस्तुताः ।

## प्राचीननिरुक्तकारा:

निरुक्तं चतुर्दशप्रभेदमिति समालोचकाः वदन्ति । महर्षियास्केन केषाञ्चन निरुक्तकाराणां नामानि उद्धृतानि स्वग्रन्थे ।। बृहस्पतिः, काश्यपः, औपमन्यवः, औदुम्बरायणः, वार्ष्यायणिः, गार्ग्यः, आग्रायणः, शाकपूणिः, और्णवाभः, तैटीकिः, गालवः, स्थौलाष्ठीविः, क्रौष्टुकिः, कात्थक्यः, कौत्सव्यः, यास्कः इत्यादयः सन्ति निरुक्तकाराः ।परन्तु इदानीमुपलभ्यते केवलं यास्कीयनिरुक्तम् ।

## निरुक्तस्य स्वरुपम् –

निरुक्तशब्दस्य व्याख्या सायणाचार्यानुसारेण –

**'अर्थावबोधे निरपेक्षतया पदजातं यत्र तन्निरुक्तम्॥'** इति। प्रसङ्गेऽस्मिन् दुर्गाचार्यस्य कथनमिदमस्ति यत् - '**प्रधानं चेदमितरेभ्यः अङ्गेभ्यश्च अर्थपरिज्ञानाभिनिवेशात्।** अर्थो हि प्रधानः तद्गुणः शब्दः, स च इतरेषु व्याकरणादिषु चिन्त्यते। यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणाद् एवं शब्दार्थनिबन्धनपरिज्ञानं निरुक्तात्।'निरुक्ते वैदिकशब्दानां निरुक्तिरस्ति। निरुक्तिशब्दस्यार्थों भवति व्युत्पतिः। निरुक्तस्य सर्वमान्यमतमिदमस्ति यत्, प्रत्येकः शब्दः केनाऽपि धातुना सहावश्यमेव

सम्बद्धो भवति । अतो निरुक्तकारः शब्दानां व्युत्पत्तिं प्रदर्शयन् धातुना सह विभिन्नप्रत्ययानां निर्देशमपि दर्शयति। निरुक्तानुसारेण सर्वे शब्दाः व्युत्पन्नाः भवन्ति। वैयाकरण-शाकटायनस्य अपीदमेव मतमासीत्। अस्योल्लेखो यास्केन पतञ्जलिना च स्व-स्वग्रन्थे कृतोऽस्ति ।

**'तत्र नाना आख्यातजानीति शाकटायनो निरुतसमयश्च।** शब्दानां व्युत्पतिः बहुविधाऽस्ति। दुहिता-शब्दस्य व्युत्पत्या विषये यास्को वदति – **दुहिता । दूरे हिता दोग्धेर्वा** इति। अर्थाद् दूरे विवाहिता दुहिता एव हितकरा भवति अथवा यत्र प्रदत्ता तत्र एव अहितकरा भवति, अथवा सा हि नित्यमेव पितुः उत दोग्धेः सकाशाद् द्रव्यं दोग्धि।

## निरुक्तस्य वैशिष्ट्यम्

निघण्ट्वाख्यस्य वैदिककोषस्य भाष्यरूपमस्ति निरुक्ताख्यं वेदाङ्गम् । निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति, परन्तु निरुक्तकारो यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं करोति । अर्थात् निरुक्तनामके ग्रन्थे वैदिकशब्दानाम् अर्थज्ञानस्य प्रक्रिया वर्णिता अस्ति । निघण्टोः पञ्चाध्यायानां विवेचनं स्वकीये निरुक्तग्रन्थे यास्केन द्वादशाध्यायेषु सम्पादितमस्ति । निरुक्तं निरूपयन् सायणाचार्यः ऋग्वेदभाष्यभूमिकायामाह- **अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्** यदि अन्यानि वेदाङ्गानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तं वेदस्य अन्तर्भूतानि तत्त्वानि व्याकुर्वंति । मुख्यतः निरुक्ते पञ्च प्रतिपाद्यविषयाः भवन्ति-

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।।**

अन्यच्च निरुक्तं गद्यशैल्यां निबद्धमस्ति, किन्तु अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्यां निबद्धाः सन्ति । इत्थं निरुक्तेन वेदार्थानामवगमे सौविध्यं भवति ।

अन्यच्च -'एकैकस्य पदस्य सम्भाविता अवयवार्थाः यत्र निःशेषेण उच्यन्ते तदपि निरुक्तम्॥'
अतोऽस्य वेदाङ्गत्वम् अङ्गीक्रियते।

## निरुक्तस्य प्रतिपादनशैलि

निरुक्तं भाषाशास्त्रदृष्ट्या एकमनुपमं रत्नमस्ति । निरुक्तस्य मान्यः सिद्धान्तोऽस्ति यन्निरुक्ते नाम धातुजमस्ति । वैयाकरणेषु शाकटायनस्य एव इदं मतमासीत् - **'सर्वधातुजमाह निरुक्ते व्याकरणे**

**शकटस्य च तोकम्'** इति। अस्य मतस्य समीक्षा युक्तिपूर्वकेण केनाऽपि गार्ग्याचार्येण कृताऽऽसीत, यस्य खण्डनं प्रबलतराभिर्युक्तिभिः कृतं यास्केन। भाषायाः मूलं धातुरेव भवति, अस्य तथ्यस्य उद्घाटनं यास्केन सहस्रत्रयवर्षं पूर्वमेव कृतम् । तथ्यमिदमाधुनिकभाषाविज्ञानस्य मेरुदण्ड एवास्ति । यास्कः स्वस्य वैज्ञानिकमतस्य प्रस्थापनं युक्तिपूर्वकं कृतवानस्ति ।

गार्ग्यस्य प्रथमा आपत्तिः असङ्गताऽस्ति - कस्याऽपि वस्तुनः क्रियानुसारेण नामकरणेन अनेकेषां वस्तुनाम् एकक्रियात्वेन अनेकानाम् एकनाम भवितुं शक्यते। तुल्यकर्मकर्तृषु जनेष्वपि तेनैव कर्मणा व्यक्तिविशेषस्य श्रेणीविशेषस्य वा नाम भवति न तु सर्वेषाम् । लोकव्यवहारस्य इयमेव शैली अस्ति । तक्षणः = कर्मकस्य, परिव्रजनम्=परितः **भ्रमणम्**, इत्यादि क्रिया बहुभिर्जनैः सम्पादिता भवति, तथापि 'तक्षा'-पदेन कर्मकारस्यैव बोधो भवति। एवञ्च परिव्राजकपदेन संन्यासिनां बोधो भवति । कस्यापि शब्दस्य स्वभाव एक एवास्ति यत्, कयाऽपि क्रियया कस्यापि एकस्यैव वस्तुनः बोधो भवति नान्यस्य। एकेन वस्तुना सह बह्वनां क्रियाणां योगे सत्यपि एकैव क्रियानुसारेण तस्य नाम भवति। शब्दस्य अयं स्वभावः, लोकप्रियव्यवहारः च अपि अस्ति। **'तक्षा'** एवं **परिव्राजकः** अन्यायाः अपि क्रियायाः सम्पादनं करोति। किञ्च क्रियायाः वैशिष्ट्येन तक्षण-परिव्रजनक्रियाऽनुसारेण तयोः नामकरणमभूत् । निष्पन्नेन नाम्ना एव कस्यापि वस्तुनः क्रियायाः परीक्षणं नासङ्गतं भवति । यतो नाम्नः निष्पन्ने सति तस्य योगार्थस्य परीक्षणं भवितुं शक्यते।नाम्नो निष्पन्नत्वाभावे कस्य परीक्षणं भविष्यति? **'प्रथनात् पृथिवी'** विस्तृतत्वेनेदं नाम पृथिव्या भवति। शाकटायनस्य अस्यां व्याख्यायां गार्ग्यस्य इदं कथनं नितान्तम् अयुक्तिकरमस्ति यदियं केन विस्तारिता ? इति। तर्कहीनमिदं कथनमस्ति, यतः पृथिव्याः पृथुत्वं प्रत्यक्षदृष्टमस्ति । अस्याः कथनस्य विषये प्रश्न एव निरर्थकोऽस्ति । अतो गार्ग्यस्य इयमप्यापत्तिरसङ्गतैवास्ति ।

शाकटायनेन पदानां निरुक्त्यै एकस्य अभिन्नपदस्य व्याख्या अनेकेषां धातूनां योगेन निष्पादिता । **सत्य**-शब्दः **शाकटायनेन** भागद्वये विभाजितः, यथा सत -- य = सत्यम्, यस्मिन् प्रथमांशः 'अस्ति'-शब्दान्निष्पन्नो भवति तथा द्वितीयांशः '**इण्**'-धातोः **'आयाति'**-शब्दात् निष्पन्नोऽस्ति । **'सन्तमेव अर्थम् आयाति गमयतीति सत्यम्** ॥' अर्थाद् यत् विद्यमानार्थस्य (यथार्थस्य) ज्ञानं कारयति, तत् सत्यम् । अस्योपरि **गार्ग्यस्य** आपत्तिरस्ति महती । यास्कस्य प्रतिवचनमस्ति - शब्दान् स्वपक्षप्रतिपादनं विद्यासम्पादयन्नपि शाकटायनस्य निरुक्तिः अनुगतार्थाऽस्ति, अतो नाम अन्यमस्ति। अनन्वितार्थे शब्दस्य संस्कर्त्ता पुरुषो निन्दनीयो भवति, शास्त्रगर्हा तु नास्त्येव — **'सैषा पुरुषगर्हा'** निरुक्त्याः पदस्य

चान्वयो न्याय्योऽस्ति । तदर्थं पदविभाजनं नानुचितमस्ति । ब्राह्मणग्रन्थेषु निरुक्तिक्रमोऽयं ग्राह्योऽस्ति, न गर्हणीयः ।

**शतपथब्राह्मणं** हृदयशब्दं भागत्रयेषु विभज्य तस्य निरुक्तिः हृ, दा, इण् (आययति रूपात्) धातोः निष्पन्नमकरोत् । फलतः शाकटायनस्य मतं यथार्थमस्ति ।

परभाविन्यया क्रियया पूर्वजातस्य वस्तुनो नामकरणं नोचितमित्यपि गार्ग्यस्य आपत्तिरकिञ्चित्करैवास्ति । लोके परभाविन्यया क्रियया पूर्वजातस्य वस्तुनः संज्ञा वा व्यपदेशो बहुषु स्थलेषु परिलक्षितो भवति । भविष्यद्योगेन, सम्बन्धसाहाय्येन च कस्यापि जनस्य **विल्वादः** अथवा **लम्बचूडको** नामकरणं लोके भवति ।

**मीमांसादर्शनस्य** अप्ययमेव सिद्धान्तोऽस्ति । रूढशब्दानामपि व्युत्पतिः अनावश्यका एवास्ति। इदं कथनमपि नोचितमस्ति। वेदे रूढशब्दानां व्युत्पत्तिरनेकत्र दृग्गोचरा भवति - **'यदसर्पत तत् सर्पिः'**॥ सर्पिषो व्युत्पत्तिर्गमनार्थकस्य **सृप्धातोः** निष्पन्नो भवति । अनेन प्रकारेण यास्केन युक्तिव्यूहैः स्पष्टतः प्रतिपादितस्य समस्तं नाम धातुजं भवति तथा वर्त्तमानभाषाशास्त्रस्य अयमेव मान्यः सिद्धान्तः अस्ति।

## निरुक्ते प्रतिपाद्यमानविषया:

वेदानां षडङ्गेषु अन्यतमस्य निरुक्तस्य प्रतिधिनित्वं सम्प्रति यास्करचितनिरुक्तमेव करोति। यास्कः स्वस्य निरुक्ते अपि अन्येषां निरुक्ताचार्याणाम् उल्लेखं कृतवान्।

वस्तुतः निघण्टोः त्रीणिकाण्डानि सन्ति। यानि पञ्चस्वध्यायेषु यास्केन विभज्यन्ते । प्रथमेकाण्डे त्रयोऽध्यायाः विद्यन्ते । तत्र विभिन्नानां वैदिकशव्दानां पर्यायवाचिनः प्रोच्यन्ते यथा- **पृथिव्याः** 21, **मेघस्य** 30, **स्वर्णस्य** 15, **वायोः** 16, **जलस्य** 100, **वेदस्य** 26 इत्यादि पर्यायवाचिनः शव्दाः वर्तन्ते । निरुक्ते एतेषां शव्दानां व्याख्यानमुपलभ्यते ।अतः एतदध्यायत्रयं **नैघण्टुककाण्डम्** इत्युच्यते । निघण्टोश्चतुर्थाध्याये वेदस्थकठिनास्पष्टशव्दाः स्पष्टीक्रियन्ते ।निरुक्ते 4-6 अध्यायेष्वेतेषां शव्दानां व्याख्यानं क्रियते ।अत एते **नैगमिककाण्डे** अन्तर्भवन्ति। नैघण्टुककाण्डे एकार्थकानामनेकशब्दानां निर्वचनं कृतम् । ते सर्वे पर्यायशब्दाः ।तदुत्तरं नैगमकाण्डे अनेकार्थकशब्दानां सङ्ग्रहः वर्तते । एते शब्दाः अनवगतसंस्काराः । अर्थात् एतेषां शब्दानां प्रकृतिप्रत्ययभावः अस्पष्टः । तेषां नाम ऐकपदिकाः अथवा नैगमाः । अतैव अस्य काण्डस्य नाम नैगम इति । अत्र **279** शब्दाः सङ्गृहीताः।

निघण्टोः पञ्चमाध्याये देवतावाचकशव्दाःविद्यन्ते । निरुक्ते 7-12 अध्यायेषु एतेषां व्याख्यानं क्रियते । अतः एते **दैवतकाण्डे** अन्तर्भवन्ति । दैवतकाण्डे वेदमन्त्राणां देवतानां (मन्त्रप्रतिपाद्यविषयो देवता)

विवरणं वर्तते । देवताविज्ञानं मन्त्रार्थसहायकं कथमित्यस्मिन् काण्डे उच्यते । अस्मिन् १५१ शब्दाः सन्ति ।एवं सम्पूर्णनिरुक्तग्रन्थः द्वादशाध्यायैरथवात्रिभिर्काण्डैर्विभज्यते । अन्ते द्वावध्यायौ 13-14 परिशिष्टरूपेण स्तः । तत्र देवानां अतिस्तुतयः विविच्यन्ते। अस्मिन्निघण्टौ 1767 वैदिकाः शब्दाः संगृहिताः सन्ति।

अनेन प्रकारेण समग्रग्रन्थोऽयं चतुर्दशाऽध्यायेषु विभक्तोऽस्ति । परिशिष्टभागम् अपि अर्वाचीनमिति वक्तुं न शक्यते । यतो हि यास्क इव उव्वटोऽपि परिशिष्टभागात्परिचितः आसीत् । उव्वटः स्वकीये यजुर्वेदभाष्ये निरुक्ते समुपलब्धं वाक्यं निर्दिष्टवान्। अतो अस्यांशस्य भोजराजात्प्राचीनत्वं मन्यते।ग्रन्थस्यारम्भे यास्को निरुक्तस्य सिद्धान्तस्य वैज्ञानिकं प्रदर्शनमकरोत् । वेदार्थानुशीलनाय तदाऽनेकपक्षाः आसन् । येषां नामानि अनेन प्रकारेण प्रदत्तानि सन्ति -

**(१) अधिदैवतः, (२) अध्यात्मः, (३) आख्यातसमयः (४) ऐतिहासिकाः, (५) नैदानाः, (६) नैरुक्ताः, (७) परिव्राजकाः, (८) याज्ञिकाश्च ।**

अनेन मतनिर्देशेन वेदार्थानुशीलनस्य इतिहासोपरि विशिष्टरूपेण प्रकाशः प्रसरति । यास्कस्य प्रभावः अवान्तरकालिकभाष्योपरि अस्ति । सायणस्तु अस्याः पद्धत्याः अनुसरणं कृत्वा वेदभाष्यरचनायां कृतकार्योऽभवत् । यास्कस्य प्रक्रिया आधुनिकभाषावेत्तॄणां प्रधानतया मान्याऽस्ति । निरुक्तस्य एकमात्रप्रतिनिधित्वेन निरुक्तग्रन्थस्य सर्वातिशायि महत्त्वमस्ति ।निरुक्तं तु स्वयं भाष्यरूपमेवास्ति। तथाऽपि यत्र तत्रैतादृशं दुरूहमस्ति, यत्तस्य अर्थावबोधने विद्वान् टीकाकारः अपि काठिन्यम् अनुभवति। निरुक्तं व्याख्यातुं विक्रमाब्दात् पूर्वमेव विदुषां ध्यानाकृष्टोऽभवत्। पतञ्जलेः महाभाष्यम् अस्ति प्रमाणं यत् -

**'शब्दग्रन्थेषु चैषा प्रभूततरागतिः भवति । निरुक्तं व्याख्यायते । न कश्चिदाह पाटलिपुत्र ! व्याख्यायत इति**।'अत्र पतञ्जलेः सङ्केतः कस्यां दिशि वर्त्तते? इति तु ज्ञातुं न कोऽपि शक्नोति। परन्तु निरुक्तस्य उल्लेखो लभते।

## निरुक्ते निर्वचनप्रकारा:

निरुक्ते यास्काचार्येण बहवः शब्दाः निर्वाचिताः । तत्र निर्वचनप्रक्रिया कथमिति ज्ञेया । तस्य ज्ञानेन निरुक्ताध्ययनं, वेदाध्ययनं च सुकरं भविष्यति । अपार्थाश्च अपसरन्ति ।त्रिविधाः शब्दाः भवन्ति । ते **रूढशब्दाः, योगरूढशब्दाः, यौगिकशब्दाः** इति ।

**रूढशब्दाः**-येषां शब्दानां व्याकरणप्रक्रिया वा धातुः वा न भवति, केवलया परम्परया एव प्रयोगः भवति तेषां नाम रूढशब्दाः ।

**योगरूढः**- यस्य प्रकृतिप्रत्ययभावः धातुर्वा भवति तथापि रूढ एव अर्थः प्रसिद्धः भवति तस्य नाम योगरूढः इति ।

**यौगिकाः**- ये शब्दाः धातुजाः तथा धातुजार्थप्रतिपादकाः ते यौगिकाः ।

निरुक्ते यौगिकप्रक्रिया एव प्रयुक्ता निर्वचनसमये । यतः सर्वे शब्दाः आख्यातजाः एव इति नैरुक्तानामाशयः । निर्वचनप्रकाराः आचार्यशौनकेन स्वकृत **बृहद्देवतायां** उक्तम् –

**धातूपसर्गावयव-गुणशब्दं द्विधातुजं ।**

**बह्वेकधातुजं वाऽपि पदं निर्वाच्यलक्षणम्।।**

**धातुजं धातुजाज्जातं समस्तार्थजमेव वा।**

**वाक्यजं व्युतिकीर्णं च निर्वाच्यं पञ्चधा पदम् ।।** बृहद्देवता -2 . 103-104

तत्र नामानि आख्यातजानि इति **शाकटायनो** नैरुक्तसमयश्च । (निरु.१.१२.) **गार्ग्यः सर्वे आख्यातजानि** न इति वदति । अस्मिन् प्रकरणे आचार्याः पूर्वपक्षस्य खण्डनं कृत्वा यौगिकवादमुत्तमतया प्रतिपादयन्ति । तथैव अग्रे सर्वत्र निर्वाचिताः शब्दाः यौगिकविधानेनैव । दैवतकाण्डे शब्दानामाधिदैविकार्थं प्रदर्श्यापि यौगिकनिर्वचनमेव कुर्वन्ति । केषाञ्चन विदुषाम् अभिप्रायः अयं यद् यास्काचार्याणां निर्वचनप्रक्रिया आधाररहिता, स्वकल्पिता चेति । किन्तु एषः यौगिकवादः न केवलं यास्कानां वादः अपि तु वेदे ब्राह्मणग्रन्थेषु च यौगिकार्थे एव शब्दाः प्रयुक्ताः ।

यथा - **अग्निमीळे पुरोहितं** .......। (ऋक्.१.१.१.)

इत्यस्मिन् मन्त्रे अग्निः देवता । अतः पुरोहिताद्यन्यशब्दाः अग्निशब्दस्य विशेषणानि भवन्ति । यौगिकार्थं विना **पुरोहितं, देवं, ऋत्विजं, होतारं, रत्नधातमम्** एते शब्दाः विशेषणानि भवितुं नार्हन्ति । तथैव मन्त्रस्य आध्यात्मिकेऽर्थे अग्नि शब्दः परमात्मवाची भविष्यति । माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते । (निरु.७.१४.) इत्युक्तत्वात् । यौगिकार्थप्रतिपादनेनैव अग्निशब्दस्य परमात्मवाची अर्थः सिध्यति ।

अपि च वेदमन्त्रे एव यौगिकनिर्वचनं पश्यामः -

**आ वहेथे पराकात् पूर्वीरश्नन्तावश्विनौ** (ऋक्.८.५.३१.) - अत्र अश्विनौ इत्यस्य निर्वचनम् अश्नन्तौ इति शब्देनैव कृतम् । वेदस्य यौगिकप्रक्रियायाः दर्शनेनैव यास्काचार्याः निरुक्ते यौगिकवादं स्पष्टतया प्रतिपादितवन्तः ।

**अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः** । (निरु.१२.१.)

अश्विनौ शब्दस्य निर्वचनं शतपथब्राह्मणे च एवं कृतम् –

**अश्विनाविमे हीदं सर्वमश्नुवाताम्** । (श.ब्रा -४.१.५.१६.)

तथैव निरुक्तकाराणां यौगिकवादं पुष्टीकुर्वन्ति आचार्य वररुचिः -

ब्रह्मनामानि सर्वाणि सामान्येन आख्यातजानि हि नैरुक्तसमयत्वात् क्रियायोगमङ्गीकृत्य प्रयोगः । सर्वतः परिवृद्धत्वात् ब्रह्मशब्देन आदित्यमण्डल उच्यते । (निरुक्तसमुच्चयः) एवं वेदे यौगिकार्था एव प्रतिपाद्याः न तु रूढार्थाः इति निरुक्तकाराणां दृढ आशयः ।

## निघण्टुनिरुक्तयोः व्याख्याकाराः

निघण्टुनिरुक्तयोः सम्प्रति प्रसिद्धानि त्रिणि व्याख्यानानि दरीदृश्यन्ते। देवराजयज्वाकृत **निघण्टूनिर्वचनम्**, दुर्गाचार्यकृत **ऋज्वर्थवृत्ति** स्कन्दस्वामिकृत **स्कन्दमहेस्वरवृत्ति** इति । ग्रन्थविस्तारभयात् संक्षेपरुपेण उपरिष्टाद्विवक्षते -

### क .देवराजयज्वाकृत निघण्टूनिर्वचनम्

सम्प्रति निघण्टुग्रन्थस्यैका एव व्याख्या समुपलब्धा भवति । अस्याः व्याख्यायाः रचयिता देवराजयज्वा अस्ति । अस्य पितामहस्यापि नाम देवराजयज्वा एवासीत् । अस्य पितुर्नाम यज्ञेश्वरोऽस्ति । अयं हि विद्वान् 'रंगेशपुरी' इत्याख्यस्य नगरस्य पार्श्ववर्त्तिनः कस्याऽपि ग्रामस्य निवासी आसीत् । नाम्ना अयं विद्वान् सुदूरदक्षिणभारतस्यैव निवासी मन्यते। अस्य समयस्य विषये मतद्वयं प्रचलितमस्ति। केषाञ्चिद्विदुषां मते विद्वानयं सायणात्परवर्त्ती आसीत्, किञ्च यथार्थतः सायणात्पूर्ववर्त्ती एवायमासीत् । आचार्यसायणेन ऋग्वेदीयमन्त्रस्य स्वकीये भाष्ये निघण्टुभाष्यवचनस्य उल्लेखः कृतः । उल्लेखोऽयं देवराजयज्वनः भाष्येऽपि किञ्चित्पाठान्तरेण समुपलब्धो भवति । अस्य भाष्यस्य नाम-**निघण्टूनिर्वचनम**स्ति । अस्माद्भाष्याद् अतिरिक्तं न किमप्यन्यं निघण्टुभाष्यं विद्यमानमस्ति । देवराजयज्वा स्वभाष्यस्य उपोद्घाते क्षीरस्वामिनः, अनन्ताचार्यस्य च निघण्टुव्याख्यायाः उल्लेखं कृतवानस्ति । यथा -**'इदं च क्षीरस्वामी अनन्ताचार्यकृतां निघण्टुव्याख्यां'..... निरीक्ष्य क्रियते।'** अनन्ताचार्यस्योल्लेखोऽत्र प्राथम्येन एव प्राप्यते। क्षीरस्वामिनो मतस्योल्लेखोऽत्र बहुलतया कृतोऽस्ति । क्षीरस्वामी अमरकोशस्य प्रसिद्धः टीकाकारोऽस्ति ।

स्वप्रतिज्ञानुसारेण देवराजयज्वा नैघण्टुककाण्डस्यैव निर्वचनमधिकेन विस्तरेण कृतवान्। अन्यकाण्डानां व्याख्या अत्यल्पाऽऽकारा अस्ति । अस्य भाष्यस्य उपोद्घातो वैदिकभाष्यकर्त्तृणाम् इति वृत्तावबोधनाय नितान्तं प्रयोजनीयोऽस्ति । अस्मिन्नुपोद्घाते स्कन्दस्वामिनः ऋग्भाष्यटीकातः,

महेश्वरस्य निरुक्तभाष्यटीकातश्च साहाय्यं गृहीतमस्ति । प्राचीनप्रामाण्यादपि सुष्ठूद्धरणानि सन्त्यनेकानि च । सायणात्पूर्ववर्त्तित्वेन अस्य व्याख्यायाः, निरुक्तेश्च विशेषं महत्त्वमस्ति ।

**ख. दुर्गाचार्यकृत ऋज्वर्थवृत्ति**

दुर्गाचार्यस्य निरुक्तस्य **ऋज्वर्थवृत्ति** नाम्नी व्याख्या सर्वप्राचीनाऽस्ति । अस्य रचयिता दुर्गसिंह अथवा दुर्गाचार्यः वर्तते ।इयं अत्यन्त विस्तृत तथा वैदुष्यपूर्णा व्याख्या भवति ।निरुक्तस्य पाठनिर्धारणेऽपि अस्याः अप्रतिमं योगदानमस्ति ।असौ जम्बुमार्गनिवासी इति पुष्पिकासु ज्ञायते ।यथा- **ऋज्वर्थायां निरुक्तबृत्तौ जम्बुमार्गाश्रमनिवासिनः आचार्यभगवद्दुर्गसिंहस्य कृतौ** इति ।दुर्गाचार्यः वशिष्टगोत्रीयः तथा कपिष्ठलशाखाध्यायी वैदिकः आसीत् ।अतः मुक्तकण्ठेन जुघोष-

**अहञ्च कापिष्ठलो वासिष्टः इति । ऋ.सं.3.53.22 व्याख्याने**

एवं रुपेण निरुक्यस्य सम्यगवबोधनाय ऋज्वर्थवृत्तेः महति आवश्यकता वर्तते।

**ग. स्कन्दस्वामिकृत स्कन्दमहेस्वरवृत्ति**

स्कन्दस्वामी निरुक्तस्योपरि **स्कन्दमाहेश्वरवृत्ति** नाम्नी काचित्प्रसिद्धाव्याख्या लिलेख। दुर्गाचार्यस्य ऋज्वर्थवृत्यपेक्षया इयं सरला सुस्पष्टा च वर्तते ।अयं च स्कन्दस्वामी शतपथब्राह्मणस्य भाष्यकार हरिस्वामिनः गुर्वासीत् ।स्कन्दस्वामी ऋग्वेदस्य प्रथमभाष्यकार इति विदितोऽस्ति। एवंरुपेणनिघण्टुनिरुक्तयोः प्रसिद्धव्याख्याकाराः समुपलभ्यन्ते ।

## उपसंहार:

वस्तुतः यदि निष्कर्षरुपेणविचार्यते तर्हि निरुक्तं यस्मिन्नाधारे प्रवृत्तं भवति — अर्थात् प्रत्येकं संज्ञापदं धातुना व्युत्पन्नोऽभवत् इत्याधारस्तु नितान्तं वैज्ञानिकमस्ति अस्यैव सम्प्रति नामास्ति **'भाषाविज्ञानम्'** । अस्योन्नतिः पाश्चात्यजगति शतवर्षाभ्यन्तरे अभवत् । त्रिसहस्रवर्षं प्राग् वैदिकाः ऋषयः अस्य शास्त्रस्य सिद्धान्तानां वैज्ञानिकरीत्या निरूपणं कृतवन्तः । भाषाशास्त्रस्य इतिहासे भारतवर्षमेव अस्य मूलोद्गमस्थानमस्ति । निरुक्तस्य आरम्भेऽस्य विषयस्य येषां नियमानां प्रतिपादनं समुपलब्धं भवति, तत्तु विशेषरूपेण महनीयमस्ति। यास्ककृतं निरुक्तन्तु निघण्टुग्रन्थस्य व्याख्याऽस्ति । निघण्ट्वाख्यस्य वैदिककोषस्य भाष्यरूपमस्ति निरुक्ताख्यं वेदाङ्गम् ।

एवंरुपेण निरुक्तस्यार्थः, प्रयोजनम्, अधिकारि, वर्णितविषयाः, सप्रमाणं विवेचितम्। निरुक्तस्याध्यनेन ज्ञायत् यत् वैदिकशव्दानां निर्वचनानि तथा निघण्टोरध्ययनेन वेदिककोशगतज्ञानानि संभवन्ति। किञ्च चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः

अवबुध्यन्ते।प्रकृति प्रत्ययानां ज्ञानं भवति । वेदे वर्णितनिगूढार्थानां परिप्रकाशनं भवति । अनेकपर्यायवाचिशब्दानां ज्ञानं भवति। तथा च देवतास्वरुपमपि ज्ञायत् ।तत्र पृथिव्यन्तरिक्षद्युस्थानीयदेवाश्च सम्यग्विवेचिताः सन्ति । अर्थज्ञानपुरस्सरं वेदाधयनं कर्तव्यमित्यस्मान्नवबोधयति।तथा हि -

**इत् सकलं भद्रमश्नुते नाक मेति ज्ञान विधूत पाप्मा ।। नि.1.6**

अनेन ज्ञायते यत् निघण्टुनिरुक्तयोरध्ययनमवश्यं कर्तव्यमित्युक्त्वा विरमामि विस्तरात् ।

।।इतिशम् ।।

## परिशीलितग्रन्थसूची


अमरकोशः, सुधाकरमालवियः,चौखम्बा अमरभारती प्रकाशन, दिल्ली, 2000

वाचस्पत्यम्,तारानाथतर्कवाचस्पति,चौखम्बासंस्कृतसिरिज्,वाराणसी,1962

महाभारत,श्रिपाददामोदरसातवलेकर,स्वाध्यायमण्डल,पारडि,1982

बृहद्-संस्कृत-निबन्ध-कलिका,शिवदत्तद्विवेदि,भारतीयविद्याप्रकाशन,वाराणसी,1995

ऋक्संहिता विद्यारण्यभाष्यम् – चौखम्बाविद्याभवनम्,वाराणासी,1983

शतपथब्राह्मणम्, चौखम्बाविद्याभवनम्,वाराणासी,2000

निरुक्तम् , मुकुन्दझा शर्मा,चौखम्बाविद्याभवनम्,वाराणासी,2012

वेदार्थदीपक-निरुक्तभाष्य,चन्द्रमणिविद्यालंकार,वैदिकसंशोधनमण्डलपूणे,1985

निरुक्तम्, उमाशंकरशर्मा, चौखम्बाविद्याभवनम्,वाराणासी 1961

वेदभाष्यभुमिकासंग्रहः,वलदेवउपाध्यायः, चौखम्वाविद्याभवनम्, वाराणसी, 1985

वैदिक साहित्य का इतिहास , चौखम्वा विद्याभवनम्,वाराणसी, 20002

संस्कृतवाङ्मय का वृहद् इतिहास, बलदेव उपाध्याय,उत्तरप्रदेश संस्कृतसंस्थान,1995

पाणिनीयशिक्षा, शिवराज आचार्यः कौण्डिन्यायनः,चौखम्बासंस्कृतसिरिज,वाराणसी,2006

बृहद्देवता,रामकुमार राय,चौखम्बा संस्कृत संस्थान,वाराणसी,2001

महाभाष्यम्, काशिनाथ वासुदेव अभ्यङ्कर,भण्डारकरप्राच्यविद्यासंशोधन,पुणे,2019

*अद्वैतवेदान्तदर्शने सृष्टिप्रक्रियायाः महत्त्वम्*

**श्यामसुन्दरसाधुखाँ, शोधच्छात्रः**

**अद्वैतवेदान्तविभागः ,**

**श्रीसदाशिवपरिसरः**

**उपोद्घातः-**

**'वेदान्त'** शब्दस्तु उपनिषद्-शब्देन पराविद्याशब्देन वा अभिधीयते। वेदान्तसारकारः सदानन्दः आह, "**वेदान्तो नामोपनिषत्प्रमाणम्**"। अर्थात् उपनिषदेव प्रमाणम् उपनिषत्प्रमाणम्। उपोनिषदो यत्र प्रमाणमिति वा। उपनिषद् शब्दस्य अर्थसामान्यं निरुपयन् शङ्कराचार्यः आह, **'उप'** शब्दो हि सामी-प्यमाह। **'नि'** शब्दश्च निश्चयार्थः। तस्मादैकात्म्यं निश्चितम्। सा विद्या सहेतुं संसारं सादयति इत्युपनिषदुच्यते।

वेदान्तदर्शनं तु वेदानामन्तिमं भागमुपनिषदमाधारीकृत्य प्रणीतत्वाद् वेदान्तसंज्ञां लभते। भगवता कृष्णद्वैपायनेन उपनिषदां परस्परविरुद्धप्रतीयमानानां वचसां समाधानाय ब्रह्मसूत्राणि प्रणीतानि। एताषां वेदान्तसूत्राणां प्रपञ्चमाधारीकृत्य एव विविधमतानि प्रार्दुभूतानि। तत्र भगवता शंकराचार्येण शारीर-कभाष्यमिदं प्राचीनतमत्वाद् तर्कसहत्वाच्च विशिष्टं स्थानं भजते। अत्रैव वेदान्तदर्शनं सम्यक् प्रपञ्चितम् इति महर्षिणः स्वीकुर्वन्ति। वस्तुतः शङ्कराचार्येण प्रतिपादितम् अद्वैतमार्गमेव वेदान्ते स्वीकृतम्। एवं वेदान्ते उपनिषद्-ब्रह्मसूत्र-गीतानाम् अनन्तरं शङ्कराचार्यकृतभाष्याणि स्तोत्राणि वैशिष्ट्यं भजन्ते।

शंकरप्रणीतः शारीरकभाष्ये प्रयुक्ताः शास्त्रीयसिद्धान्ताः यथा – मायासिद्धान्तः, ईश्वरसिद्धान्तः, जीवसिद्धान्तः, ब्रह्मसिद्धान्तः, आत्मसिद्धान्तः, सृष्टिप्रक्रिया, जगत्सिद्धान्तः अध्याससिद्धान्तः, आभासवादः, विम्वप्रतिविम्ववादः, मोक्षसिद्धान्तः पञ्चीकरणप्रक्रिया इत्यादयः। उपर्युक्तसिद्धान्तेषु सृष्टिप्रक्रिया अन्यतमा। जगत्सृष्टिप्रक्रिया व्याख्या प्रसङ्गे पञ्चीकरणप्रक्रिया-विषयेऽपि आलोचना अत्रैव परिस्फुटते।

**सृष्टिप्रक्रिया-**

जगतः उत्पत्तौ प्रलये च एका सुव्यवस्था परिदृश्यते अस्माभिः। प्रलयः सृष्टेः विपरीतक्रिया वर्तते। जगत् मायायाः उत्पद्यते मायायाश्च विलीयते। माया ईश्वरस्य शक्तिः अस्ति। अतः वक्तुं शक्यते यत् जगत् ईश्वरात् उत्पद्यते ईश्वरे च विलीयते। ईश्वरः जगतः कर्ता धर्ता संहर्ता च अस्ति। मायां नामरूपयोः आश्रयभूता वर्तते। नामरूपे ईश्वरस्य अधीने भवतः। यदा सृष्टिः जायते तदा ईश्वरात् उभावपि अभिन्नौ भवतः। नामरूपयोः बीजरूपेण अव्यक्ता सती विराजते। जगत् ईश्वरात् अभिन्नं वर्तते। सृष्टेः अनन्तरं तत् कार्यावस्थायां तिष्ठति प्रलयानन्तरं कारणावस्थाम् आप्नोति। ईश्वरः जीवानां भोगाय लौकिकवस्तुनां निर्माणं करोति। तानि क्षेत्राणि क्षेत्रज्ञानां पुण्यपापानुसारं विचारयति। जगत् कर्मफलानाम् अधिष्ठानं वर्तते। जगत् नैतिकव्यवस्था वर्तते। ईश्वरः नैतिकः व्यवस्थापकः वर्तते।

"**भूतानामुत्पत्तिप्रलयावनुलोमप्रतिलोमाभ्यां भवत इत्युक्तम्, आत्मादिरुत्पत्तिः प्रलयश्चात्मान्त इत्यप्युक्तम्।**"[1]

ईश्वरः आकाशं वायुम् अग्निं जलं पृथ्वीं च क्रमशः निरमात्। आकाशः एकः जडः वर्तते। शङ्कराचार्यः आकाशं प्रतिबन्धस्य भावरूपं नैव मन्यते। शब्दगुणेन एव आकाशस्य भावपदार्थत्वेन चिन्तनम्। आकाशः अनित्यः अस्ति। आकाशस्योत्पत्तिः मायातः एवास्ति। आकाशात् वायुरूत्पन्नः, वायोः अग्निः बभूव, अग्नेः जलं बभूव, जलात् पृथ्वी सञ्जाता। आदिशङ्करः सूक्ष्मं महाभूतं च स्वीचकार। उपनिषत्सु पञ्चतन्मात्राणाम् उल्लेखः लभ्यते। सृष्टेः क्रमः इत्थं विविच्यते अव्याकृतनामरूपयोः अधिष्ठात्रीमायातः शब्दतन्मात्रं जायते। शब्दतन्मात्रम् आकाशस्य सूक्ष्मतत्त्वं वर्तते। अस्मिन् केवलं शब्दगुणो भवति। अस्मात् सूक्ष्मवायुः स्पर्शतन्मात्रं जायते। अस्मात् सूक्ष्माग्निः रूपतन्मात्रमभिजायते। तस्मात् सूक्ष्मजलं नाम रसतन्मात्रं सञ्जातम्। ततः सूक्ष्मपृथ्वी तन्नाम गन्धतन्मात्रं सञ्जायते। आकाशस्य गुणः शब्दः एवः। वायोः द्वौ गुणौ शब्दः स्पर्शश्च वर्तते। अग्निः शब्दस्पर्शरूपगुणयुक्तः। जलस्य शब्दः स्पर्शः रूपः सरञ्चेति चत्वारो गुणाः सन्ति। पृथ्वी शब्द-स्पर्श-रूप-रस-गन्धेति पञ्चगुणविशिष्टा वर्तते। महाभूतस्य उत्पत्तिः एषां सूक्ष्मभूतानां पञ्चीकरणप्रक्रियया भवति। प्रत्येकं सूक्ष्मभूतं भागद्वये विभक्तं भवति। प्रत्येकार्धभागोऽपि चतुर्षु भागेषु विभक्तः भवति। एकस्य सूक्ष्मभूतं भागद्वये विभक्तं भवति। एकस्य सूक्ष्मभूतस्य अर्धांशभागः अवशिष्टसूक्ष्मभूतस्य प्रत्येकम् अष्टमांशेन संयुक्तं सत् महाभूतम् उत्पद्यते।

शङ्कराचार्यस्य मतानुसारं महाभूतं सूक्ष्मभूतानां संयोगेन सञ्जायते। वेदान्तम् अणुम् अविभाज्य-तत्त्वरूपेण न स्वीकरोति। अपि तु जडद्रव्यस्य अल्पतमं रूपमेव अणुः वर्तते। ईश्वरः स्वयं स्वसङ्कल्पेन स्थूलसूक्ष्मभूतानां निर्माणं स्वीयमायया अकारि। प्रलयसमये पृथिव्याः जले, जलस्य अग्नौ, अग्नेः वायौ, वायोः आकाशे, आकाशस्य ईश्वरस्य मायायां लयः भवति।

स एव परमेश्वरस्तेन तेनात्मवशिष्टमानोऽभिध्यायस्तं तं विकारं सृजतीति। कुतः? तल्लिङ्गात्। तथाहि शास्त्रम् - "**यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति,**"[2] "**इत्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति।**"[3]

भूतानामुत्पत्तिक्रमश्चिन्तितः। अथेदानीमप्ययक्रमश्चिन्त्यते। किमनियतेन क्रमेणाप्यय उतोत्पक्रमेणा-थवा तद्विपरीतेनेति। त्रयोऽपि चोत्पत्तिस्थितप्रलयाः भूतानां ब्रह्मायताः श्रूयन्ते – "**यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति,**"[4] इति। "**तत्रानियमोऽविशेषादिति प्राप्तम्। अथवो-त्पतेः क्रमस्य श्रुतत्वात् प्रलयस्यापि क्रमाकाङ्क्षिणोः स एव क्रमः स्यादिति।**"[5]

स्थूलं शरीरं पञ्चमहाभूतैः निर्मितं वर्तते। महाप्राणाः ईश्वरेण सृष्टाः। प्राणाः स्थूलशरीरस्य शक्तयः वर्तन्ते स्थीलशरीरवर्णनाप्रसङ्गे अधुना पञ्चीकरणप्रक्रियायाः वर्णना कुर्मः।

**पञ्चीकरणशब्दस्य व्युत्पत्तिः-**

**'पञ्चीकरणम्'** इति शब्दः पञ्चशब्दात् अभूत तद्भावे **'च्वि'** प्रत्ययो तथा **'कृ'** धातोः **'ल्युट्'** प्रत्यययुक्ते निष्पन्नोऽस्ति। अस्यार्थः **'न पञ्चीकृतानीति अपञ्चीकृतानि'** तेषाम् अपञ्चीकृतानां समूह पञ्चीकरणमिति पञ्ची-करणम्। अर्थात् यत् तु पञ्च नास्ति तस्मै पञ्च इति समुह रूपप्रदानस्य नाम **'पञ्चीकरणम्'**। पञ्चभूतेषु पञ्चभूतानां मेलनं पञ्चीकरम् इत्युच्यते। तदित्थं निम्निलिखितेषु रूपेषु

विशद ीक्रियते। वस्तुतः पञ्चीकरणस्य अर्थः भवति आकाशादिपञ्चसूक्ष्मभूतानां प्रत्येकं समानतया भागद्वयं कृत्वा तेषां दशधा विभजीकरणम्, पुनः तस्मिन् दशभागे प्रथमस्य पञ्चभागस्य प्रत्येकं चत्वारभागं विभज्य पुनः तस्मिन् चतुर्षु भागेषु एकं एकं भागं स्वस्य भागार्धं परित्याज्य अन्येषां चतुर्णां भागानाम् अपरि अर्धभागे मेलनस्य नाम एव पञ्चीकरणम्। अर्थात् प्रत्येकं भूते अन्येषां चतुर्णां भूतानां मिश्रणं नाम पञ्चीकरणम्।

**पञ्चीकरणप्रक्रिया**-

वेदान्तसार कर्ता सदानन्दः यति पञ्चीकरणस्य स्वरूपं स्पष्टयितुं विद्यारण्यविरचितपञ्चदशीग्रन्थतः श्लोकमिदमुधृतवान् -

**"द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।**
**स्वस्वेतरद्वितीया ंशैर्य ोजनात् पञ्च पञ्च ते।।"**[6]

अस्याभिप्रायः यत् प्रत्येकं भूतं भागद्वये विभज्य प्रथमभागद्वयं चतुर्षु भागेषु विभज्य अपरेऽस्मिन् चतुर्णां भूतानां द्वितीयभागे संयोगे कृते एतानि पञ्च आकाशादिभूतानि पञ्चात्मकानि भवन्ति। एतदेव पञ्चीकरणम्।

अर्थात् पञ्चीकृताकाशे आकाशस्य एकार्धभागः वायोः एकाष्टमांशभागः अग्नेः एकाष्टमांशभागः, जलस्य एकाष्टमांशभागः, पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते। पञ्चीकृतवायौ वायोः एकार्धभागः आकाशस्य एकाष्ट-मांशभागः अग्नेः एकाष्टमांशभागः जलस्य एकाष्टमांशभागः पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते। पञ्चीकृत अग्न्याम् अग्नेः एकार्धभागः आकाशस्य एकाष्टमांशभागः वायोः एकाष्टमांशभागः जलस्य एकाष्टमांशभागः पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते। पुनः पञ्चीकृतजले जलस्य एकार्धभागः आकाशस्य एकाष्टमांशभागः वायोः एकाष्टमांशभागः अग्नेः एकाष्टमांशभागः पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते। पञ्चकृतपृथिव्यां पृथिव्याः एकार्धभागः आकाशस्य एकाष्टमांशभागः वायोः एकाष्टमांशभागः अग्नेः एकाष्टमांशभागः जलस्य एकाष्टमांशभागश्च विद्यन्ते।

रेखाचित्रमाध्यमेन पञ्चीकरणप्रक्रिया तथा सृष्टिप्रक्रिया स्पष्टीक्रियते –

| **पञ्चीकृतस ्थूलभूतानि** | **अपञ्चीकृतसूक्ष ्मभूतानि** | **स्थूलभूतेषु उपलब्धाः गुणाः** |
|---|---|---|
| आकाशः - | ½ आकाशः+ 1/8 तेजः+ 1/8 वायुः+1/8जलम्+1/8पृथिवी - | शब्दः |
| वायुः - | ½ वायुः + 1/8 तेजः+1/8आकाश +1/8जलम्+1/8पृथिवी - | शब्दः स्पर्शश्च |
| तेजः - | ½ तेजः + 1/8 आकाशः+ 1/8 वायुः+1/8जलम्+1/8पृथिवी - | शब्दः स्पर्शः रूपञ्च |
| जलम् - | ½ जलम् + 1/8 तेजः+1/8 वायुः+1/8आकाशः+1/8पृथिवी - | शब्दः स्पर्शः रूपं रसश्च |
| पृथिवी - | ½ पृथिवी+1/8 तेजः+1/8वायु+1/8जलम्+1/8तेजः - | शब्दः स्पर्शः रूपं रसः गन्धश्च |

पञ्चीकरणप्रक्रियायां प्रत्येकं सूक्ष्मभूतानाम् एकम् एव रूपं भवति। वस्तुतः एतत्प्रक्रियायानुसारं आकाशः न केवलम् आकाशः अपि तु तत्र अर्धभाग आकाशस्य तथा अन्येषां चतुर्णां भूतानाम् एकाष्टमांशभागं संयोगेन स्थुलः आकाशः उत्पद्यते। अनेन प्रकारेण अन्येषां चतुर्णां भूतानामोतपत्तिः भवति। अस्याः पञ्चीकर-णप्रक्रियायाः

एतद् अपि एकः परिणामो भवति यत् पूर्वभूतस्य गुण उत्तरेषु भूतेषु समागच्छति। परन्तु यस्मिन् भूते यस्य अंशस्य अधिकं वा प्राधान्यं भवति तस्याधारेण तस्यैव नामकरणं भवति। वेदान्तसारकर्ता सदानन्दयतिः पञ्चीकरणसम्बन्धे एकां शङ्का प्रस्तुतवान्। सा शङ्का अप्रामाणिकी एव। इदं पञ्चीकरणं कथम् इति चेत् श्रुतौ अस्य किमपि प्रत्यक्षरूपेण उल्लेखो नास्ति। वेदान्तानाम् इयं कल्पना अतः अग्राह्या। अस्मिन् प्रसङ्गे एतदपि उक्तं यत् त्रिवृतकरणप्रक्रियायाः तु उल्लेखः अस्ति परन्तु पञ्चीकरणस्य न कुत्रापि कोऽपि उल्लेखः विद्यते। अतः पञ्चीकरणं यदि स्वीक्रियते तर्हि श्रुतेः विरोधो जायते एतदपि वक्तुं न शक्यते कारणं यत् पञ्चीकरणप्रक्रिया त्रिवृतकरणप्रक्रियायाः परिपूरक बृहत् रूपमस्ति। त्रिवृतकरणप्रक्रियायां अग्नि-जल-पृथिवी पदार्थत्रयम् विद्यते। तत्र अग्न्यामेकार्धभागः अग्निः एकचतुर्थांशभागः जलः एकचतुर्थांशभागः पृथिवी च विद्यन्ते। जले एकार्धभागः जलम् एकचतुर्थांशभागः वायुः एकचतुर्थांशभागः पृथिवी च विद्यन्ते। पृथिव्यां एकार्धभागः पृथिवी एकचतुर्थांशभागः जलः एकचतुर्थांशभागः वायुः च विद्यन्ते। एषा प्रक्रिया त्रिवृतकरणप्रक्रिया रूपे विख्यातः। यत्किमपि भवतु प्रकृतपक्षे वेदान्तदर्शनस्य प्रतिकुलोऽयं सिद्धान्तः। यतो हि वेदान्ते श्रुति एव गरीयसी। अस्याः शङ्कायाः समाधानं कृत्वा सदानन्दः कथमपि यत्- पञ्चीकरणस्य सम्बन्धेऽस्मिन् न कापि अप्रामणिकता वर्तते। यतो हि श्रुतौ प्रतिपादिता त्रिवृत्करणप्रक्रिया पञ्चीकरणमेव उपलक्षयति। छान्दग्योपनिषदि वर्तते यत् - "**सेयं देवतैक्षत हन्ताहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति। तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति, सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्।**"[7] अस्य भावोऽयं यत् – सृष्टेः प्रारम्भे तन्नामधेयं देवतैक्षत यत् अहम् इदानीं जीवात्मारूपे तेजोसि, जले तथा च अन्ये अनुप्रविष्टस्सन् नामरूपे व्याकरवाणि तथा तासां त्रिवृतं त्रिवृतम् एकैकां करवाणि इति। तदा सेयं देवता इमा तिसृ देवता अनेन एव जीवेनात्मनानि प्रविश्य नामरूपे व्याकरोत्। अयमेव पञ्चीकरणसिद्धान्तः श्रुत्युपलक्षितः।

**उपसंहारः -**

पञ्चीकरणप्रक्रियायाः महत्त्वं आधुनिककाले तथा वर्तमानसमाजे विद्यते। एतद् महत्त्वं तु पञ्चीकरणप्रक्रियामन्तर्गता पञ्चभूतेषु विद्यते। पञ्चभूतानि यथा आकाशः, वायुः, तेजः, जलम्, पृथिवी। प्रत्यकस्मिन् भूते भिन्न भिन्न अवदानमस्ति। यथा आकाशे शब्दगुणः विद्यते, शब्दं विना अस्माकं वार्तालापं कदापि न भविष्यति, तदर्थं तस्य अवदानं अपरिसीम्। वायौ शब्दस्पर्शौ द्वौ गुणौ विद्येते। वयं जानीमः वायुं चक्षुषा द्रष्टुं न शक्यते, तत्तु स्पर्शेन शब्देन वा उपलब्धुं शक्यते। अग्न्यां शब्दः स्पर्शः रूपञ्च विद्यते। वस्तुतः यदा अग्नि वेगेन प्रज्जलति तदा तस्य शब्दगुणः एवं साधारणावस्थायां तस्य स्पर्शः रूपञ्च उपलभ्यते। प्रवाहमानजले शब्दगुणः एवञ्च पानसमये तस्य रस-स्पर्श-रूपाणि उपलब्धुं शक्यते।

इतोऽपि वक्तुं शक्यते यत् आधुनिककाले नूतनतथ्यानि आविष्करणावसरे एषा प्रक्रिया उपयोगी भवति। वस्तुतः पञ्चीकरणप्रक्रियया सह वर्तमानसमाजस्य तथा आधुनिकवैज्ञानिकसिद्धान्तस्य किञ्चित् सादृश्योपलभ्यते। पञ्चीकरणप्रक्रियया वायोः अग्नि भवति, आधुनिकवैज्ञानिकमते वायोः विना तथा $O_2$ विना अग्निः न प्रज्जलति। अस्मिन् प्रक्रियायाम् आकाशात् वायोरोत्पत्तिः भवति। आधुनिकमते वायुस्तरः आकाशात् तथा मेसोस्फियारात् उर्ध्वे न गन्तुं शक्यते। पञ्चीकरणप्रक्रियायाम् अग्नितः जलस्योत्पत्तिः भवति। आधुनिकदृष्ट्वा अग्निप्रभवात्

जलीयवास्पः भवति। इतोऽपि अस्ति यत् जलात् पृथिवी भवति, आधुनिकमते पृथिवी सृष्टिकाले जलेनैव शीतलं भवति पृथिवी, तदर्थं प्राणिनां आश्रयस्थलमपि च भवति। वैज्ञानिकमते जले द्वे अणु हाइड्रजेन एकानु अक्सिजेन स्तः। पञ्चीकरणप्रक्रियायां जले एकचतुर्थांशः वायुः विद्यते। एवमरूपेण आधुनिकवैज्ञानिकतथ्याविष्करणाय एषा प्रक्रिया अनस्वीकार्या।

**पादटीका**

[1] ब्रह्मसूत्रशाङ्करभाष्यम् 2.3.15

[2] बृहदारण्यकोपनिषद् - 3.7.3

[3]. ब्रह्मसूत्रशाङ्करभाष्यम् - 2.3.13

4. तैत्तिरीयोपनिषद् - 3.1.1

5. ब्रह्मसूत्रशाङ्करभाष्यम् - 2.3.14

6. पञ्चदशी (तत्त्वविवेकप्रकरणम्) - 27

7. छान्दग्योपनिषद् – 6.3.2-3

**सहायकग्रन्थसूची**


1. ईशादिनौ उपनिषद्- शंकराचार्यभाष्यार्थः, गीताप्रेस, गोरक्षपुर - 1930
2. कठोपनिषद्- गीताप्रेस, गोरक्षपुर - 1930
3. छान्दग्योपनिषद्- गीताप्रेस, गोरक्षपुर - 1930
4. दर्शनसंग्रहः- दीवानन्दचन्दः , चौखम्वा,वाराणसी - 1980
5. अद्वैतवेदान्तसिहत्यकोशः- माद्रासविद्यालयविभागः , माद्रास - 1980
6. आत्मनात्मविवेकः- श्रीशंकराचार्यः, वसुमतीसाहित्यम्, कलिकाता - 1994
7. बृहदारण्यकोपनिषद्- सुरेश्वराचार्यः, चौखम्वासंस्कृतसिरीज, वाराणसी - 1994
8. ब्रह्मसूत्रशंकरभाष्यम्- श्रीमच्छङ्कराचार्यः, चौखम्वासुरभारती प्रकाशन, वाराणसी - 2012
9. वेदान्तपरिभाषा - धर्मराजाध्वरिन्द्रः , चौखम्वाविद्याभवनम, वाराणसी - 2005
10. पञ्चदशी- श्रीविद्यारण्यमुनि, चौखम्वासंस्कृतसिरीज आफीस्, वाराणसी - 1998
11. शंकराचार्यग्रन्थमाला- श्रीमच्छङ्कराचार्यः, वसुमतीसाहित्यम्, कलकाता - 1994
12. वेदान्तमञ्जुषा- दामोदरशास्त्री, कलिकाता, संस्कृतसिरीज - 2002
13. वेदान्तसिद्धान्तः- प्रकाशानन्दः, अच्युतग्रन्थमालाकार्यालयः, काशी-1936
14. पञ्चपादिकाविवरणम्- श्रीप्रकाशात्मप्रणीतम्, केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपतिः - 1984
15. वेदान्तविवेकः- स्वामी निगमानन्दः, सारस्वतपाठागार, पुरी - 2009
16. वेदान्तविनर्शः- डाँ अभिमुन्यु, परिमलपब्लिकेशन्स, दिल्ली - 2006

 ISSN 2320-2025

# स्वामी विवेकानन्दः किम् अद्वैती ?

**Nepal Das**

**सारः** – स्वामी विवेकानन्दः मूलतः अद्वैती न वा इत्यस्मिन्विषये विद्यते बहूनां संशयः। गुरुपरम्परायां पश्यामश्चेत् अवश्यमेव अद्वैती किन्तु तस्य जीवनि अपि च भाषणं श्रुत्वा नव्यवेदान्तस्य विषये आलोचना क्रियते। उभयोः तौलनेन सामान्यतः ज्ञायते अद्वैतमूलत्वेनैव नव्यवेदान्तस्य उत्पत्तिरिति।

Key word: नव्यवेदान्तः।

उपद्धातः - मानवजातेः कल्याणाय ज्ञान-भक्ति-कर्म-ध्यानादीनामेकः परिपूर्णादर्शरूपेण स्मामिविवेकानन्दः आविर्भूतः। विश्ववन्दितः विश्वजयी युवनायकः आगतः स्वामी विवेकानन्दः। समग्रविश्वे आध्यात्मिकतायाः प्रचारं-प्रसारं च कृतवान्। तथा समग्रविश्वम् आध्यात्मिकशिक्षया शिक्षितवान्। अयं महामानवः भारतवर्षस्य सनातनधर्मं तथा उपनिषन्मूलकं वेदान्ततत्त्वं समग्रे विश्वे प्रसारितवान्। सः युवसमाजं -

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया॥**
**दुर्गं पथस्तत्कवयो वदन्ति ॥**[1]

इति श्रुत्या उद्बोधितवान्।तदर्थं तस्य जन्मदिवसानुसारं जनवरीमासस्य द्वादशदिनाङ्कं युवदिवसरूपेण परिगण्यते।

स्वामीविवेकानन्दमहाभागाः हिन्दुधर्मस्य अध्यात्मवादस्य पुनर्जन्म प्रदत्तवान्। सः एकवारं हिन्दुधर्मस्य श्रेष्ठत्वं स्थापयित्वा ख्रीस्त- इसलामधर्माक्रमणेभ्यः रक्षितवान्। स्वामीविवेकानन्दः न केवलं हिन्दुधर्मस्य कृते एव प्रेरणां ददौ, अपि तु सम्पूर्णे संसारे धर्म-अध्यात्मवादयोर्महत्वं प्रवर्धितवान्।

### शिक्षा-

स्वमिविवेकानन्दः अतीवमेधावी आसीत्। क्षणमात्रस्य अध्ययनेन सर्वं विषयं तस्य बुद्धौ आगच्छति स्म। सः स्वयमुक्तवान् आदौ समग्रपुस्तकस्य एकवारं पठनेन स्मृतौ भवति स्म, अनन्तरं पुस्तकस्य शीर्षकानन्तरं किञ्चत् पठनेन, पश्चात् केवलं भूमिकायाः पठनेन पुस्तकस्थितविषयस्य ज्ञानं भवति स्म। सः तत्काले प्रचलितोच्चशिक्षायाम् इतिहासदर्शनादिविषयाणामध्ययने प्रवृत्तः आसीत्। विद्यालये सर्वासु स्पर्धासु तर्क-ज्ञान-ईश्वरसम्बन्धिविचारेषु अधिकतया तस्य प्रतिभायाः प्रकाशः दृष्टः। बाल्ये एव तस्य भाषणे भावीवक्तुः सर्वविधगुणाः परिदृष्टाः। सः गभीराध्ययनेन साहित्य-व्याकरणादिशास्त्रेषु कुशलतां प्राप्तवान्। विद्यालये प्रथमश्रेण्यामुत्तीर्णतानन्तरं १८७९ संवत्सरे प्रेसिडेन्सिकालेजमध्ये प्रविष्टः। १८८४ तमे वर्षे बी.ए परीक्षायाम् उत्तीर्णःजातः। सः पठनेन सह गीतगायनं क्रीडादिषु च दक्षं आसीत्। **शिक्षा नाम बालकानामन्तर्निहितशक्तीनां बहिः प्रकाशनमिति** शिक्षायाः निर्वचनं तेन दत्तम्। पाश्चात्यदर्शन-प्रतीच्यदर्शनानां तुलनात्मकालोचनानन्तरं स्वामिभिरुक्तमासीत्– **हिन्दुदर्शनानि प्रागैतिहासिकयुगे एव यस्य परमसत्यस्योपलब्ध्ये यत् स्थिरं सिद्धान्तं प्रत्यपादयन् तस्य क्षीणाभासमात्रं पाश्चात्यदर्शनानि प्रापुः। पाश्चात्यदार्शनिकैः पूर्णस्योपलब्धिर्न कृता** इति।

---

[1]**क.उ.१.३.१४**

**गुरोः साक्षात्कारः-**

बाल्यादेव स्वामिनः मनसि ईश्वरविषये बहु सन्देहः आसीत्। तद् विषये तेन बहवः पृष्टाश्च। परन्तु समीचीनोत्तरं न प्राप्तम्। १८८१ तमे संवत्सरे यदा श्रीरामकृष्णेन सह तस्य साक्षात्कारः जातः तदानीं तस्य समस्त सन्देहानाम् समाधानं लब्धम्। सः श्रीरामकृष्णम् अपृच्छत्- **भवन्तः ईश्वरं दृष्टवन्तो वा?श्रीरामकृष्णः उक्तवान् यथा त्वां स्पष्टरूपेण पश्यामि तवापि स्पष्टरूपेण दृष्टः। न केवलं पश्यामि तवापि दर्शयिष्यामि** इति। **दृढमनोनिग्रहपूर्वकं व्याकुलेन अन्तःकरणेन प्रतीक्ष्यते चेत् निश्चयेन परमेश्वरः दृश्यते।** विवेकानन्दस्य आध्यात्मिकजीवनस्योपरि तस्य गुरोः योगदानं सर्वापेक्षया महत्वपूर्णम् आसीत्। श्रीरामकृष्णदेवस्य चिन्तनधारायाः व्यावहारिकसिद्धान्तस्य मूर्तरूपः विवेकानन्दे दृश्यते। गुरोः उपदेशेन सः समग्रविश्वे परिव्रजेनन भारतीयाध्यात्मिकपरम्परां तथा वेदान्ततत्त्वं च समग्रविश्वे प्रसारितवान्।

**परिव्राजकरूपेण विवेकानन्दः-**

विवेकानन्दः १८८७ तमे संवत्सरे सन्न्यासं स्वीकृतवन्तः। तदनन्तरम् आभारतं परिव्रजनेन तथा समग्रविश्वे पर्यटनेन वेदान्ततत्त्वं प्रचारितवन्तः। अमेरिकादेशस्य शिकागो धर्ममहासम्मेलनेसर्वप्रथमं हिन्दुधर्मं तथा वेदान्ततत्त्वं च अधिकृत्य भाषितम्।

**विशेषकार्यम्-**

शिकागो विश्वधर्ममहासम्मेलने प्रमुखवक्तृरूपेण भारतस्य पक्षतः भागं गृहीतवान्। न्यूयार्क मध्ये वुकलिन् नैतिकसभायाः तथा वेदान्त सोसाइटी संस्थायाः स्थापनम्, कल्कत्तायाः निकटवर्ती वेलुडमठे १९९७ संवत्सरे रामकृष्णमिशनस्य स्थापनम् इयं संस्था वर्तमाने भारतवर्षस्य विभिन्नप्रान्ते दृश्यते। तथा इयं संस्था श्रीरामकृष्णविवेकानन्दादीनां वाणीं प्रचारयति तथा विविधप्रकाराः सामाजिकक्रिया अपि करोति। १८९९ संवत्सरे मायावत्याम् अद्वैताश्रमस्य स्थापनादिकार्यम् अकरोत्।

**महाप्रस्थानम्-**

अयं महामानवः अन्तिमदिने स्वामिप्रेमानन्देन साकं क्रोशं यावत् मठसमीपवर्तिमार्गे गच्छन् वेदविद्यालयस्य विषये कथितवान्। सायंकाले एकाकी निजकुटीरे प्रविष्टः। तथा १८०२ तमे वर्षे जुलाईमासस्य चतुर्थदिवसे भृगुवासरे सायं ध्यनमग्नः करधृताक्षमालः पार्थिवशरीरं त्यक्त्वा गुरुवचनानुसारं **यस्मिन्नेव दिने नरेन्द्रः कोऽहमिति ज्ञास्यति तस्मिन्नेव दिवसे सः अस्मिन् संसारे न स्थास्यति** इति वचनानुसारं योगनिद्रां प्रविष्टः। स्वमिनः वेदविद्यालयनिर्माणरूपः स्वप्नः १९९३ तमे संवत्सरे अगस्टमासे रामकृष्णमठपक्षतः विवेकानन्दवेदविद्यालयः नाम्ना साकारितः।

**विवेकानन्दस्य कृतयः -**

दार्शनिकानां मनस्थितचिन्ताराशयः वचनरूपेण मुखात् वहिरागत्य लेखन्या पुस्तकाकारेण प्रकटिता भवति। विवेकानन्दः अनेकासु सभा-समितिषु, शिक्षाप्रतिष्ठानेषु, विशिष्टव्यक्तीनां भवनेषु च शतशो भाषणेन तथा

विभिन्नपुस्तकानि विरच्य, तथा विभिन्नकवितास्तोत्रादि विरच्य, पत्राणां माध्यमेन च वेदान्ततत्त्वं प्रचारितवान्। शास्त्रं गुरु एवं मातृभूमिरिति त्रिषु विषयेषु गायनयोग्यरचनाः रचिताः।

१.Karma Yoga(कर्मयोगः)

१८९६ तमे संवत्सरे रचितमिदं पुस्तकं कर्मयोगमधिकृत्य वर्तते। स्वामिना कथितः कर्मयोगः गीतोक्तकर्मयोगाधारेण वर्णित अस्ति। निष्कामकर्मणः प्राधान्यमत्र दृश्यते। आङ्गलभाषायां रचितम् एतद् मूलपुस्तकं परवर्तिकाले रामकृष्णमठेन विभिन्नभाषासु अनूदितम्।

२.Bhakti Yoga(भक्तियोगः)

भक्तियोगविषये विवेकानन्दभाषणानि संगृह्य इदं पुस्तकं रचितम्।१८९६ तमे वर्षे इदं संस्करणं Edward Study इति नाम्ना कश्चन पाश्चात्तीयशिष्येण प्रकाशितम्।

३.Raja Yoga, Bhakti Yoga and Para-Bhakti or Supreme Devotion (राजयोगः, भक्तियोगः,पराभक्तिश्च)

विवेकानन्देन रचितमिदं पुस्तकं राजभक्तियोगयोर्विशेषविश्लेषणरूपम्। १८९६ तमे संवत्सरे इदं पुस्तकं प्रकाशितम्।

४.Vedanta Philosophy: An Address Before the Graduate Philosophical Society (वेदान्तदर्शनम्)-इतिविवेकानन्दस्य इदं पुस्तकमपि १८९६ ईसवीये प्रकाशितम्।

५.Lectures from Colombo to Almora-पाश्चात्यदेशेषु प्रदत्तानां भाषणानां सङ्कलनरूपमिदं पुस्तकं १८९७ तमे संवत्सरे प्रकाशितमासीत्।

६.Bhakti Yoga(भक्तियोगः)-इति भक्तियोगविषयकयालोचनया समृद्धं किञ्चित् पुस्तकं पृथक् रूपेण स्वामिना लिखितमासीत्।

७.My Master- १९०१ तमे वर्षे स्वगुरोः श्रीरामकृष्णपरमहंससदेवस्य माहात्म्यं तेषामादर्शः, दर्शनचिन्ता च संकलय्य इदं पुस्तकं स्वामिना लिखितमासीत्।

८.Vedanta Philosophy: Eight Lecture on Karma Yogaपूर्वकृतस्य कर्मयोगस्य द्वितीयसंस्करणरूपमिदं पुस्तकं स्वामिना १९०१ तमे वर्षे प्रकाशितम्।

९.वर्तमानभारत

१०.प्राच्य ओ प्राश्चात्य

११.Vedanta Philosophy: Lectures on Jnana Yoga १९०१ तमे ईसवीये संवत्सरे रचितम् इदं पुस्तकं स्वामीविवेकानन्दस्य अन्तिमपुस्तकम्। अनन्तरं स्वामिनः सर्वकृतयः अद्वैताश्रम इति संस्थया The Complete Works of Swami Vivekananda इति नाम्ना आङ्गलभाषायाम्, आञ्चलिकभाषासु च प्रकाशितम्।

न केवलं ग्रन्थेषु अपि तु स्वामीविवेकानन्दस्य विभिन्नासु पत्रेषु, विभिन्नकवितासु अपि अद्वैतभावना परिलक्ष्यते। स्वामीविवेकानन्दविरचितः कविताः निम्नरूपाः-

१. सन्न्यासी गीतिका
२. जागो मा कुण्डलिनी
३. शिवस्तोत्रम्

४. अम्बास्तोत्रम्
५. श्रीरामकृष्णस्तोत्रम्
६. श्रीरामकृष्ण आरात्रिकम्
७. The Living God
८. The Hymn of Samadhi
९. The Cup

स्वामीविवेकानन्दस्य समग्रमपि दर्शनम् अद्वैतभावनया प्रेरितमासीत् इति तस्य जीवनदर्शनस्य अध्ययनेन सम्यक् अवगन्तुं शक्यते। आधुनिकभारतस्य दार्शनिकेषु उदारदार्शनिकत्वेन लब्धख्यातिरयं महापुरुषः अद्वैतदर्शनस्य महान् उपदेष्टा आसीत्। अस्य मतानुसारेण निम्नतरकीटात् आरभ्य उच्चतर प्राणिपर्यन्तमाध्यात्मिकतत्त्वम् एकमेव भवति इति। कीटाः निम्नयोनयः सन्ति। यतः तेषु तामसगुणाधिक्येन अज्ञानाधिक्यं भवति। यत्र तादृशाज्ञानस्य न्यूनता वर्तते सः उच्चकोटौ जीवनं प्राप्नोति, यथा- मनुष्याः। सम्पूर्णेषु पदार्थेषु तस्यैव देवस्य अस्तित्वं वर्तते। स्वस्य उत्कर्षेन अन्येषाम् अपहेलनं न करणीयमिति तेषा मतम्। अद्वैतवादीनां मते पूर्णत्वप्राप्तिरेव जीवनस्य लक्ष्यमस्ति। नरः यदा आत्मान् जानाति तदा तस्य अज्ञानस्यावरणम् अपकर्षति। तेन सह स्वमेव जानत्यपि। स्वकीयजीवनकाले एव तस्य स्वानुभवं भवति यत् जगतः भेदः स्वस्मिन् नास्ति इति।**"अहं ब्रह्मास्मि"**[2]इत्यस्य महावाक्यस्य ज्ञानं स्वयमेव कर्तुं शक्नोति। एतादृशानां पुरुषाणां कृते अचिरं जगत् मिथ्यैव प्रतीयते। परन्तु स्वकीयाध्यात्मिकाशक्तिवशात् सः वास्तविकं स्वरूपं ज्ञातुं समर्थो भवति।

**विवेकानन्दस्य नव्यवेदान्तः-**

विवेकानन्दस्य दार्शनिकविचारः मूलत उपनिषद् तथा वेदान्तर्शनस्योपरि-आधारितमासीत्। विवेकानन्दस्य नव्यवेदान्तस्य लक्ष्यरूपेण प्राप्यते- धार्मिकचेतनया देशोद्धारः, धर्मे सर्वेषामधिकारप्रतिस्थापनम्, धर्मीयतत्त्वानां प्रात्यहिकजीवने प्रयोगः, गीतोक्तनिष्कामकर्मयोगस्य नूतनतया उपस्थापनम्, धर्मस्य सामान्यीकरणम्, सार्वभौमत्वप्रचारश्च। नव्यवेदान्तस्य प्रभावेन अखिलब्रह्माण्डस्य एक धर्मरूपेण वेदान्तस्य प्रतिस्थापनं नैकेषु स्थलेषु अभूत्। स्वामिविवेकानन्दस्य नव्यवेदान्तधर्मः एकोनविंशशताब्देः धार्मिकनवजागरणे मुख्यहेतुभूतः आसीत्।

**नव्यवेदान्तोद्भवहेतुः**

आध्यात्मिकज्ञानप्राप्त्यार्थं विवेकानन्द आभारतं परिव्राजकरूपेण भ्रमितवान्। तदा स अनुभूतवान् जनाः तिमिरान्धाकारे निमज्जिताः वर्तन्ते। तत्र कारणभूतं स्त्रीषु अत्याचारः जातिभेदेन निर्धनानां शोषणं च।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः अक्रियाः॥**[3]

इति मनुवचनानुसारेण नारीणां सम्मानविषये उक्तम्। सः जातिभेदप्रथायाः स्थितिं दृष्ट्वा उक्तवान्- **एषः कीदृशः धर्मः अस्ति यः निर्धनानां दुःखं दूरीकर्तुं न शक्यते**। पुनः स उच्चस्वरेण उक्तवान्- **जातिप्रथानाम्ना**

---

[2]बृ.उ-२.४.२०

[3]मनु.स्मृ.

**शोषणचक्रं चालयन्तः जनाः धर्मं कलुषितं मा कुर्युः**। एतत् दृष्ट्वा तेन दरिद्रसेवा धर्मरूपेण स्वीकृता। श्रीरामकृष्णदेवः विवेकानन्दम् उपदिष्टवान्–**त्वया तु संसारे महति कार्याणि सम्पादनीयानि। त्वया मानवतायाम् आध्यात्मिकचेतना उत्पादनीया, दीनहीनमानवानां कष्टं निवारणीयञ्च** इत्यादयः विवेकानन्दस्य नव्यवेदान्तोद्भवे कारणानि।

**नव्यवेदान्तदर्शनम्**

स्मामिविवेकानन्दानुसारं भगवत्पादशङ्कराचार्यप्रणीतस्य अद्वैतवेदान्तस्य किञ्चिदाधुनिकतया उपस्थापनमयं नव्यवेदान्तः।

नव्यवेदान्तोऽपि अद्वैतवेदान्तवत् ब्रह्म एकमेवाद्वितीयमिति कथयति। परन्तु अत्र नव्यवेदान्त अद्वैतम् द्वैतं तथा अपरान् दर्शनसम्प्रदायान् स्वीकृत्य नूतनतया व्यावहारिकरूपेण उपस्थापितः। नव्यवेदान्तः ब्रह्मणः सगुणनिर्गुणौ उभे स्वरूपे स्वीकरोति।

रामकृष्णदेवस्य व्यावहारिकजीवने शिक्षणे च नव्यवेदान्तस्य व्यावहारिकप्रयोगः दृश्यते। श्रीरामकृष्णेन सर्वत्र सार्वभौमवेदान्तधर्म एवानुष्ठितः। वेदेषु उपनिषत्सु समुपलभ्यमानानां भावानां विवेकानन्दः प्रचारं प्रसारं च कृतवान्।

पारम्पारिकवेदान्ते नेति नेति मार्गेण ब्रह्मणः विचारः प्रस्तुतः। विवेकानन्दोऽपि तन्मार्गं स्वीकृतवान्। स उक्तवान् आदौ नेतिमार्गेण गन्तव्यमनन्तरं सत्सत्ता प्रकाशयिष्यति। अविद्यायाः तथा मिथ्या वस्तूनां त्यागे सति सत्यदर्शनं भविष्यति। स्वामिना उक्तम्- "We have to go through the negation, and the positive side will begin. We have to give up ignorance and all that is false, and then truth will begin to reveal itself to us."

विवेकानन्दमते ईश्वर-ब्रह्मणोः भेदः नास्तीति। भक्तेनोपासितः सगुणब्रह्म सच्चिदानन्दरूपनिर्गुणब्रह्मणः अभिन्नता विद्यते। सगुणब्रह्मणः धारणा प्रापञ्चिकी। भक्त-ईश्वरयोः सम्बन्धः प्रपञ्चे अस्मिन् दृग्गोचरीभूतः भवति। जगतः कारणभूता पारमार्थिकब्रह्मणः धारणा असम्पूर्णा। कारणं तस्य सम्पूर्णतायाम् अवयवी-अवयवभाव आगच्छति। विवेकानन्दमते असीम अविभाज्यः तस्य अवयवः नास्ति। पारमार्थिकसत् विभाजितं न भवति।

शङ्कराद्वैते जगतः मिथ्यात्वं वर्तते। परन्तु अत्र विवेकनन्देन काचित् नवीनावधारणा दर्शिता। तस्य मते व्यावहारिकजगत् सम्पूर्णतया मिथ्या न भवति। जगदपि सत्यम्। जगतः अस्तित्वस्वीकारानन्तरं जगति स्थितस्य जागतिकवस्तुनः आसक्तित्यागपूर्वकं सत्यान्वेषणं कर्तव्यम्। जागतिके अस्मिन् प्रपञ्चे यत् किमपि दृश्यते तत्सर्वं परमात्मनः प्रतिबिम्बरूपम्। यथा श्रुतौ- "**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**[4]"इति। "**न हि पत्युः कामाय पतिः प्रियो भवति**"इत्यारभ्य "**आत्मनस्तु कामाय सर्वं प्रियं भवति**"[5] इति बृहदारण्यकश्रुति आधुनिकरूपेण स्वामिपादैः कथितम्-"You can have your wife, it does not mean that you are to abandon her but that you are to see God in the wife. So also, you are to see God in your

---

[4]ई.उ.१

[5]बृ.उ,२.४.५

children. So in everything. In life and in death, in happiness and in misery the Lord in equally present. The whole world is full of the lord. Open your eyes and see him this is what Vedanta teaches." अयमेव विचारआधुनिकवेदान्तविचारः। अविद्याच्छन्न अयं प्रपञ्चे निरासक्तरूपेण **"सर्वं खल्विदं ब्रह्म"**[6] इति मनसि निधाय अस्माभिः कार्यं करणीयम्। अयमेव पन्थाः। विवेकानन्दः परमात्मनः उपासनार्थं प्राथम्येन समाजस्य दुर्वल-निरक्षर-दुःस्थजनानां सेवाकार्यं कर्तव्यमिति उद्घोषितवान्। तत् अस्मिन् वाक्ये दृश्यते –"The only God I belive in, and above all my God the wicket, my God the miserable, my God the pure of all races."

ते मन्यन्ते ये अज्ञानवशात् प्रापञ्चिक भोगविलासे आसक्ताः भवन्ति ते मूर्खाः लक्ष्यभ्रष्टाश्च। तद्वत् ये संसारं पापमयमिति मत्वा उपवासादिकार्येण साधनाय अरण्ये गच्छन्ति, तेऽपि लक्ष्यभ्रष्टा एव। वेदान्तमते ब्रह्मादिस्तम्बपर्यन्तं सर्वत्र ब्रह्म निवसति। अतः ब्रह्मप्राप्त्यर्थं अन्यत्र गमनस्यावश्यकता न भवति। मनसि सर्वदा परमात्मनं ध्यात्वा कार्ये प्रवृत्तः भवतु। तदेव श्रेयस्करम्। सर्वं ब्रह्ममयं स्वर्गप्राप्तेश्चिन्ता व्यर्था। अत्रैव ईश्वराराधनबुद्ध्या क्रियमाणानि कर्मणि ईश्वरप्राप्तये भवितुमर्हन्ति। एवमेव नव्यवेदान्तः व्यक्तिस्वातन्त्र्यं-सामाजिकसमता-एकात्मत्वादि-आदर्शेन साकं निष्कामकर्मणः शिक्षां प्रददाति।

नव्यवेदान्तधर्मः सर्वधर्माणां समन्वयं करोति। नव्यवेदान्तमते हिन्दु-ख्रिस्त-इसलाम्-बौद्धादि धर्माः एकेश्वरं प्राप्तुं विभिन्नाः मार्गाः। तदुक्तं श्रीरामकृष्णदेवैः- **अनन्तलाभार्थमनन्तमार्गाः** इति। सार्वभौमः पन्थाः तु सच्चिदानन्दस्वरूपः यः तस्य सेवा कार्या। ईश्वरज्ञानेन मानवमात्रस्य निःस्वार्थसेवया तदीश्वरं लभ्यते।

**अधिकारीवादः**

शास्त्रे प्रवृत्तये अधिकारि-विषय-सम्बन्ध-प्रयोजनरूपानुबन्धचतुष्टयेषु अधिकारिविचारः अन्यतमः। अत्र पारम्पारिकवेदान्तोक्तधिकारिणा साकं विवेकानन्दोक्ताधिकारिसंज्ञा किञ्चित् भिद्यते। वेदान्तसारोक्तलक्षणानुसारं-

**"अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थः अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्य-नैमित्तिक-प्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता"**[7]- इति अधिकारिलक्षणम्। अर्थात् अत्र अधिकारी भवितुं साधनचतुष्टयसम्पन्नता अपेक्ष्यते। विवेकानन्दमते तु सर्वजनाः सर्ववर्गीयाश्च अधिकारिणः भवन्ति। केवलं निःस्वार्थकर्मणा ईश्वररूपिजीवस्य सेवा अपेक्षिता, त्याग अपेक्षितः। समाजस्य निम्नस्तरीयाणामपि शास्त्राणि पाठनीयानि तेन समाजस्य उन्नतिः भविष्यति।

**"नित्यानित्यवस्तुविवेकः इहामुत्रफलभोगविरागः शमादिषट्कसम्पत्तिः मुमुक्षुत्वम्"**[8] इति साधनचतुष्टयम्। अत्र **शम-दम-उपरति-तितिक्षा-समाधान-श्रद्धारूपः** शमादयः। **"शमः तावत्-श्रवणादि-**

[6]छा.उ.३.१४.१

[7]वे.सा.

[8]वे.सा.

**व्यतिरिक्तविषयेभ्यः मनसः निग्रहः”[9]। बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यः निवर्तनं दमः[10]। निवर्तितानां एतेषां तत् व्यतिरिक्तविषयेभ्यः उपरमणम् उपरतिः। अथवा विहितानां कर्मणां विधिना परित्यागः।**[11]अत्र शम-दम-उपरति एक एव प्रतीयते। कारणं शम अर्थात् मनसः नियन्त्रणे सति दमः भवति। बाह्येन्द्रियाणि निरुध्य भवति। एवं उपरतिः इन्द्रियाणां स्व-स्वविषयपरित्यागेन पुनः मनसः विषयत्यागः। तर्हि उपरम-शमयोः भेदः कुत्र? इति चेत् अत्र स्वामिविवेकानन्दैरुच्यते- ज्ञानमार्गावलम्बिसाधकानामादौ शम-दमादिकमावश्यकम्, बाह्येन्द्रियाणि च यन्त्रमात्राणि एव। वास्तविकमन्द्रियं तु मस्तिकान्तर्गतस्नायुतन्ते अवस्थितमस्ति। बाह्येन्द्रियैस्सहान्तरिकतन्त्रस्य मनसः संयोगः न भवति चेत् स्थिरबुद्ध्या दर्शनादिकं कर्तुं न शक्यते।

तेषां दर्शने मायायाः उपरि बहु विचारितम्। विवेकानन्दस्य मते माया विश्वब्रह्माण्डस्य वर्णनमात्रम्। तैः विश्वे परिलक्षितानां विरोधाभासानाम् एवं बाधानां च व्याख्यानावसरे पारमार्थिकव्यावहारिकदृष्ट्योः भेदः प्रदर्शितः। एवं बहवः विषयाः वेदान्तरीत्या एव विचारिताः।

**ज्ञानयोगः**

ज्ञानयोगः मुख्यतः अद्वैतवेदान्तसिद्धान्तस्योपरि आधारितः। बन्धनस्य मूलम् अज्ञानम्। विवेकानन्दस्य मते अज्ञानं नाम सत्स्वरूपस्य अज्ञानम्, सत् असतोः भेदज्ञानासमर्थता। यदि सत् –असतोः ज्ञानासामर्थता ज्ञानं तद् भेदज्ञानम्। सत्-असतोः भेदज्ञानं विभिन्ननाम्ना व्यवह्रियते एतदेव आत्मज्ञानम्, एतदेव जीवात्मैक्यज्ञानम्, एतदेव ब्रह्मज्ञानम्।विवेकानन्दः कथयति तदृशं ज्ञानम् केवलं गुरोः बाक्यश्रवणेन, केवलपुस्तकपठनेन वा न सम्भवति। एतादृशस्य ज्ञानस्योपयोगिता वर्तते। किन्तु तावता सीमितः भवति चेत् तत् सामान्यज्ञानम्, सम्पूर्णज्ञानं न भवति। पूर्णज्ञानाय अध्ययनं तथा गुरुमुखात् ज्ञातस्य कथने निहितवास्तविकतायाः अनुभूतिः अनिवार्या। तदर्थं ज्ञातस्य सत्यस्य मननम् एवं ध्यानम् अनिवार्यम्। तदर्थं मनन-निदिध्यासन-ध्यानादि ज्ञानोपार्जनस्य अनिवार्याङ्गं मन्यते। बृहदारण्यकोपनिषद् एतस्मिन् विषये प्रमाणभूता–**“आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः”**।[12] एतदर्थं शमदमादिषट्कसम्पत्तिद्वारा मनसः तथा इन्दियाणां संयम आपेक्षितः। तत् तु त्यागे सति सम्भवति। त्यागः निवृत्तिमार्गः। सर्वप्रकारेच्छानां त्यागः एवं शरीरेन्द्रियमनसां पूर्णतया नियन्त्रणम्। एतद् करणे तद् वैराग्यंजायते। विवेकानन्दानुसारं यदि ज्ञानाकांक्षा त्यागस्याधारः न भवति चेत् तत् सन्न्यासः न भवति। ज्ञानाकांक्षा सामान्येच्छा न भवति। कारणं तस्य लक्ष्यं सांसारिकं भौतिकं वा न भवति, परन्तु तात्त्विकम्। मनसि यावता वैराग्यभावना नोदेति तावता ध्यानं करणीयम्। अत्र समग्रशक्तिः ज्ञानमार्गे प्रसारणीया। विवेकानन्देन ध्यानाभ्यासः विषये उक्तं प्रारम्भे किमपि रूपं विषयं वा स्वीकरणीयम्। तथा सतताभ्यासे सति ध्यानम् समाध्यवस्थायां परिणमते। समाधि अवस्थायाम् आत्माब्रह्मणोः अभेदज्ञानं भवति।

उपपसहारत्वेन वक्तुं शक्यते यत् स्वामी विवेकानन्दः अद्वैती आसीत्।

---

[9]वे.सा.

[10]तत्रैव

[11]तत्रैव

[12]बृ.उ.२.४.५

➢ **ग्रन्थसूची –**


1. श्रीमम, *श्री श्री रामकृष्णककथामृत.* कोलकाता, उद्बोधन कार्यालय.(2014)
2. अप्पय्यदीक्षितः. *सिद्धान्तलेशसंग्रहः.* (पारसनाथद्विवेदी, सं.) वाराणसी: सम्पूर्णान्द-संस्कृत-विश्वविद्यालयः.*(2005).*
3. *ईशावास्योपनिषद्.* . वाराणसी: चौखाम्बा स.प्र. (1995).
4. जगदीशशास्त्री(सं.). *उपनिषत् संग्रहः*,.देहली: मोतीलालवेनासीदाशः. (1984).
5. दीनेशशास्त्री. *पञ्चदशी.*वाराणसी: चौखाम्बा प्रकाशन्. (1970).
6. विवरणाचार्यः. *पञ्चपादिका*(संस्क. प्रथमः). तिरुपतिः: राष्ट्रियसंस्कृतविद्यापिठम्. (1985).
7. व्यानार्जी दीपकदास. *छान्दोग्योपनिषद्.*कोलकाता: देशप्रकाशन्. (1990).
8. शङ्कराचार्यः. *ब्रह्मसूत्रशाङ्करभाष्यम्(परिमलो कल्पतरु भामती टिका सहित).* (श्रीमदनन्तकृष्णशास्त्रिः, सं.) वाराणसी: कृष्णदास अकादमी. (2000).


**************<>**************


**Nepal Das**
**Asst. Professor**
**Central Sanskrit University**
**Shree Sadashiva Campus, Puri**
**Odisha**

**Postal Address:**
**Nepal Das**
**Horuse of Ajay kr. Mohanti**
**Rychudamani Coloni,**
**Gadikhana Lane,**
**Matimandap Sahi,**
**Puri, Odisha**
**Pin -752001**
**Mob. No. – 7980312707**
**E. mail. – nepalantpur@gmail.com**

# हेत्वाभासस्वरूपविचारः

डाँ. अजयकुमारकरः
blsajaykumar@gmail.com
8342047630

न्यायनये हेत्वाभासपदमिदं न्यायसूत्रकारेण गौतमेनैव प्रथमतः प्रयुक्तं दरीदृश्यते। यथा—सव्यभिचारः—विरुद्ध—प्रकरणसम—साध्यसम—कालातीताः हेत्वाभासा इति पञ्चविधान् हेत्वाभासान् स निरूपयति स्म।[1]

अनन्ता इमे हेत्वाभासाः तत्तस्थलभेदेन अथापि प्रधानविभागः पञ्चधेति प्रतिपादयितुमेव सूत्रकृता कण्ठरवैणैव पञ्चत्वमुक्तम्। यद्यपि कणादेन त्रयः हेत्वाभासाः अनपदेशपदेन वैशेषिकदर्शने प्रतिपादिताः।[2] अथापि शिष्टयोरङ्गीकारे कणादानां न विप्रतिपत्तिः इति वैशेषिकसूत्रोपस्कारात् अवगम्यते जयन्तभट्टस्तु न्यायकलिकायामेवमाह—

**"अहेतवो हेतुवदाभासमानाः हेत्वाभासाः। हेतोः पञ्चलक्षणानि पक्षधर्मत्वादीनि उक्तानि। तेषामेकैकापाये तत्र हेत्वाभासा भवन्ति। असिद्ध— विरुद्ध—अनैकान्तिक—कालात्यय—अपदिष्ट—प्रकरणसमाः"**[3] इति।

यद्यपि प्रशस्तपादाचार्यः विरुद्धासिद्धसन्दिग्धेभ्यः भिन्नतया अनध्यवसितनामानं हेत्वाभासम् अङ्गीकरोति।[4] वस्तुतस्तु सः असाधारण अनैकान्तिक एवान्तर्भवतीति विज्ञेयम्। शिवादित्येनापि षष्ठः अनध्यवसिताख्यः हेत्वाभास उररीकृतः।[5] न्यायसारकारैस्तावत् **"हेतुलक्षणरहिता हेतुवदवभासमाना हेत्वाभासाः"**[6] इति हेत्वाभासस्वरूपं स्वीक्रियते। तेषां नये शिवादित्यवद् षड्हेत्वाभासाः भवन्ति। तथाहि—**"असिद्धविरुद्धानैकान्तिकानध्यवसितकाला त्ययापदिष्टप्रकरणसमाः"।**[7]

---

1 सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः। न्या. सू. 1.2.5

2 अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः। वै. सू. 3.1.5

3 न्या. क. 98

4 अनुमेयेन सम्बन्धं प्रसिद्धं च तदन्विते।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्।।
विपरीतमतो यत्स्यात् एकेन द्वितीयेन वा।
विरुद्धासिद्धासन्दिग्धमलिङ्गं काश्यपोऽब्रवीत्।। प्र. भा.

5 तदाभासाः असिद्ध- विरुद्ध- अनैकान्तिक- अनध्ययवसित- कालात्यपदिष्ट प्रकरणसमाः। स. प. 33

6 न्या. सा. पदपञ्चिका, पृ. 34

7 न्या. सा. पदपञ्चिका, पृ. 35

स्वार्थ—परार्थभेदेन द्विधा भिन्नस्य हेतुपदवाच्यस्य लिङ्गस्य अङ्गानि पञ्च प्रतिपादितानि सप्तपदार्थ्यां शिवादित्येन तथैव तर्कामृते जगदीशेन न्यायसारे भासर्वज्ञेन च। येषां वा अङ्गानां लोपे आभासविषयाणि लिङ्गानि भवेयुः।[8] सर्वदेवसूरिणा प्रमाणमञ्जर्यां लिङ्गाभासा इति व्यवहृता इमे हेत्वाभासाः।[9] इदञ्च हेत्वाभासानां सामान्यलक्षणम्लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मावच्छिन्नविशेष्यतानिरूपितत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशालिबुद्धिं प्रति तद्धर्मावच्छिन्नविषयता-निरूपिततत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्ताप्रकारताशालिअनाहार्याप्रामाण्यज्ञानास्कन्दित निश्चयः, तादृशभावव्याप्यवत्तानिश्चयश्च प्रतिबन्धकः इति।

**सव्यभिचारः**

एकत्र नियमेन अनवस्थितिः व्यभिचार उच्यते। तया सह वर्तत इति सव्यभिचारः। अत एव गौतमेनापि सव्यभिचारः अनैकान्तिकरूपतया अभिवर्णितः।[10] अस्येदमुदाहरणम्—नित्यशब्दः अस्पर्शत्वात्। कुम्भश्च स्पर्शवान् अनित्यः दृश्यते। शब्दः न तथा स्पर्शवान् अनित्यः दृश्यते। शब्दः न तथा स्पर्शवान्। अतः अस्पर्शत्वात् नित्यः शब्दः इति।

अथ स्पर्शवत्वानित्यत्वे साध्यसाधनरूपे न भवतः। स्पर्शवान् अपि अणुः नित्य एवेति। आत्मादौ च अस्पर्शत्वादिति हेतुः नित्यत्वं व्यभिचरति। बुद्धिश्चास्पर्शा अनित्या दृष्टा। अत उभयविधदृष्टान् तयोरपि व्यभिचारात् नास्ति साध्यसाधनभावेति हेत्वाभासोऽयम्।

एकस्मिन्नन्ते नियतः ऐकान्तिकः, साध्यसाधकः। अर्थात् पक्षे सपक्षे च किन्तु विपक्षे च वर्तमानः।[11] सव्यभिचारोऽनैकान्तिकः[12] इति अन्नम्भट्टः।

सव्यभिचारोऽयं त्रिविधः — साधारणासाधारणानुपसंहारिभेदेन। उक्तञ्च - "स त्रिविधः साधारणासाधारणाऽनुपसंहारिभेदात्"[13]।

**(क) साधारणः** — तत्र सपक्षविपक्षवृत्तिः साधारणः सव्यभिचारः। यथा— **"पर्वत वह्निमान् सत्त्वात्"** इति। उक्तञ्च - "तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वादिति"[14]।

---

[8] उभयाङ्गानि पक्षधर्मत्वम्, सपक्षे सत्वम्, विपक्षाद् व्यावृत्तिः, अबाधितविषयत्वम्, असत्प्रतिपक्षं चेति। स. प. 32

[9] लिङ्गलक्षणरहिता लिङ्गाभिमानविषयाः लिङ्गाभासः। प्र. म. 10

[10] न्या. भा. 642

[11] न्या. वा. 642

[12] त. सं. पृ. 114

[13] त. सं. पृ. 114

[14] त. सं. पृ. 114

**(ख) असाधारणः** — सपक्षविपक्षव्यावृत्तिः असाधारणः। यथा— **"पृथ्वी नित्या गन्धवत्त्वात्"** इति। उक्तञ्च - "सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः। यथा शब्दो नित्यः शब्दत्वादिति"[15]।

**(ग) अनुपसंहारी** — अन्वयव्यतिरेकदृष्टान्तरहितः अनुपसंहारी। यथा— **"सर्वं तुच्छं प्रमेयत्वात्"** इति।[16] तथाहि - "अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वम् अनित्यं प्रमेयत्वादिति"[17]।

भासर्वज्ञस्तु अनैकान्तिकभेदविषये इत्थं प्रवदति—पक्षत्रयव्यापक— पक्षव्यापक—पक्षसपक्षव्यापक— पक्षविपक्षव्यापकादिभेदादनैकान्तिकः नानाविधः। तथाहि—पक्षत्रयव्यापको यथा— अनित्यः शब्दः प्रमेयत्वात्। पक्षव्यापकः सपक्षविपक्षैकदेशवृत्तिर्यथा अनित्यः शब्दः प्रत्यक्षत्वात्। पक्षसपक्षव्यापको विपक्षैकदेशवृत्तिर्यथागौरयं विषाणित्वात्। पक्षविपक्षव्यापकः सपक्षैकदेशवृत्तिर्यथानायं गौर्विषाणित्वात्। पक्षत्रयैकदेशवृत्तिर्यथा अनित्या पृथिवी प्रत्यक्षत्वात्[18] इत्यादयः अनैकान्तिकहेत्वाभासाः प्रतिपादिताः सन्ति।

**विरुद्धः**

**"स्वसिद्धान्तविरुद्धार्थसाधकः हेतुः विरुद्धः।"[19]** अभ्युपगतं सिद्धान्तमेव विरुणद्धि अयमिति विरुद्धो नाम हेत्वाभासोऽयम्। वार्तिककारः अन्यदपि लक्षणं विरुद्धस्य अभिदधौ। प्रतिज्ञाविरोधी हेतुः विरुद्ध इति।[20]

साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धत्वमिति फलितार्थः।[21] यथा शब्दो नित्यः कृतकत्वात् इति। अत्र कृतकत्वरूपहेतुः नित्यत्वाभावेन अनित्यत्वेन व्याप्तमिति साध्याभावव्याप्तत्वं हेतोः सम्भवतीति विरुद्धोऽयं हेत्वाभासः।[22] न्यायसारमते सति सपक्षे चत्वारो विरुद्धभेदाः। पक्षविपक्षव्यापको यथा— नित्यः शब्दः कार्यत्वात्। विपक्षैकदेशवृत्तिः पक्षव्यापको यथा— नित्यः शब्दः सामान्यवत्त्वे सत्यस्मदादिवाह्येन्द्रियग्राह्यत्वात्। पक्षविपक्षैकदेशवृत्तिर्यथानित्यः शब्दः प्रयत्नानन्तरीयकत्वात्। पक्षैकदेशवृत्तिः विपक्षव्यापको यथा— नित्या पृथिवी कृतकत्वात्[23] इति। विरुद्धलक्षणं प्रतिपादयति अन्नम्भट्टः - "साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वादिति"[24]।

**सत्प्रतिपक्षः**

---

[15] त. सं. पृ. 115

[16] कारि. 72-74

[17] त. सं. पृ. 115

[18] न्या. सा. पदपञ्चिका, पृ. 42

[19] (क) सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः। न्या. द. 1.2.5

(ख) अभ्युपगतार्थविरोधी विरुद्धः। न्या. वा. 647

[20] प्रतिज्ञाहेत्वोर्वा विरोधः। यो वा प्रतिज्ञाहेत्वो विरोधः, स विरुद्धः हेत्वाभासः। न्या. वा. 648

[21] यः साध्यवति नैवास्ति स विरुद्धः उदाहृतः। कारि. 14

[22] किशोरनाथ झा विरोध्यप्रतीतौ विरोधाप्रतीतिः

[23] न्या. सा. पदपञ्चिका, पृ. 40

[24] त. सं. पृ. 117

अयं गौतमेन प्रकरणसमपदेन व्यवहृतः। प्रकरणं नाम पक्षप्रतिपक्षौ विमर्शाधिष्ठाने अनिर्णीतार्थौ। तेन प्रकरणेन समः प्रकरणसमः।[25] सत्प्रतिपक्षा परपर्यायः हेत्वाभासोऽयम् यथा—

(क) शब्दः नित्यः श्रावणत्वात्। शब्दत्ववत्।

(ख) शब्दः अनित्यः कार्यत्वात्, घटवत्। इति यस्य हेतोः साध्याभावसाधकः अपरः हेतुः विद्यते स सत्प्रतिपक्षो भवति।[26] 'प्रकरणसमस्योदाहरणं यथा— अनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् सपक्षवदिति'।[27] प्रतिपादयति अन्नम्भट्टः - "यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वात् घटवत्"[28]।

बौद्धादयः अस्य पृथक् हेत्वाभासत्वं नेच्छन्ति। न चास्य विरुद्धेऽन्तर्भावो भवितुमर्हति। विरुद्धसत्प्रतिपक्षयाः भेदस्य स्पष्टत्वात्। इदं प्रथमतया तात्पर्यटीकापरिशुद्धौ उदयनाचार्येण प्रकरणसमोऽयं सत्प्रतिपक्षपदेन व्यवहारीत्। किञ्च तं सत्प्रतिपक्षं त्रिधा विभज्यापि स समुपदर्शयामासः तत्रैवम्- सिद्धोभयहेतुकम्, असिद्धोभयहेतुकं, सिद्धसाध्योभयहेतुकञ्चेति।[29]

**असिद्धः**

गौतमनेनायं साध्यसम इति लक्षितः।[30] साध्यवत् यत्र हेतुरपि साधनीय एव भवति स साध्यसम इत्युच्यते।[31] वार्तिककारेण असिद्धत्रैविध्यमेवमभ्युपगतम्। प्रज्ञापनीयधर्मसमानाश्रयासिद्धः, अन्यथासिद्धश्चेति।[32] टीकाकारः वाचस्पतिमिश्रः असिद्धिमेवं व्यभजत्। असिद्धिः प्रथमतो द्विविधा। स्वरूपतः असिद्धिः, हेतुत्वेन चासिद्धिरिति। स्वरूपतो असिद्धिः पुनः द्वेधा वक्तव्या। स्वत आश्रयासिद्धा च। वार्तिककारोक्ता अन्यथासिद्धिस्तु साध्यसमे अन्तर्भावमर्हतीति।[33] "तत्रानिश्चितपक्षवृत्तिरसिद्धः"[34] इति भासर्वज्ञः।

---

[25] यस्मात् प्रकरणचिन्ता स निर्णयार्थमुपदिष्टः प्रकरणसमः। न्या. द. 1.2.17

[26] विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता।
श्रावणत्वादितो नित्योऽनित्यस्तु कार्यतादितः।। कारि. 77

[27] न्या. सा. पदपञ्चिका, पृ. 47

[28] त. सं. पृ. 118

[29] तच्च सत्प्रतिपक्षत्वं सिद्धोभयहेतुकं, असिद्धौभयहेतुकं सिद्धसाध्यौभयहेतुकं च। न्या. परि. 685

[30] साध्यविशिष्टः साध्यत्वात् साध्यसमः। न्या. द. 1.2.8

[31] साध्येनाविशिष्टः यः साधनधर्मः साध्यवत् प्रज्ञायितव्यः स साध्यसमो हेत्वाभासः। न्या. वा. पृ. 657

[32] न्या. वा. पृ. 658

[33] ता. टी. पृ. 659

[34] न्या. सा. पदपञ्चिका, पृ. 35

नव्यनैयायिकैः तु असिद्ध आश्रयासिद्धस्वरूपसिद्धव्याप्यत्वासिद्धभेदेन त्रैविध्यमभ्युपेयते।[35] तर्कसंग्रहकारस्य वदति - "असिद्धस्त्रिविधः – आश्रयासिद्धः, स्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति"[36]।

**(क) आश्रयासिद्धः** — गगनारविन्दं सुरभिः, अरविन्दत्वात् सरोजारविन्दवत्।[37] अयमेव पक्षासिद्धिरित्युच्यते। अस्य लक्षणं तु पक्षे पक्षतावच्छेदकस्याभावः।

**(ख) स्वरूपासिद्धः** — शब्दो गुणः चाक्षुषत्वात्। स्वरूपासिद्धो यथा - "शब्दोऽनित्यश्चाक्षुषत्वात्"[38] इति। लक्षणं तु पक्षे हेत्वभावः।

**(ग) व्याप्यत्वासिद्धः** — सोपाधिकः हेतुः व्याप्यत्वासिद्ध[39] इत्युच्यते। यथा— **'पर्वतो धूमवान् वह्नेः'** इत्यत्र आर्द्रेन्धनसंयोगः उपाधिः। सोपाधिकत्वाद् वह्निरूपः हेतुः व्याप्यत्वासिद्धः इत्युच्यते। उपाधिः साध्यव्यापकत्वे सति साधनाव्यापकत्वम्। अयं हि चतुर्विधम्— केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकः, उदासीनधर्मावच्छिन्न साध्यव्यापकश्चेति।[40]

**बाधः**

सूत्रकृता गौतमेनायं कालातीत इत्यभिहितः। परिशुद्धौ उदयनाचार्येण बाधोऽयं[41] दशधा प्रदर्शितः। तत्र बाधस्यावश्यंगीकर्तव्यता तेन प्रतिपादिता। "प्रमाणबाधिते पक्षे वर्तमानो हेतुः कालात्ययापदिष्टः''[42] इति भासर्वज्ञः। अर्वाचीनैस्तु साध्यशून्यपक्षत्वं बाध इत्युक्तम्।[43] यस्य हेतोः साध्याभावः अन्येन प्रमाणेन निश्चितः स बाधितः। यथा—वह्निरनुष्णः द्रव्यत्वात्[44] इति। अत्र अनुष्णत्वस्पर्शसाध्याभाव उष्णत्वं स्पर्शान् प्रत्यक्षेण गृह्यत इति बाधोऽयम्। अयञ्च ग्राह्याभावनिश्चयरूप इति अनुमितिप्रतिबन्धको भवति। एवं सव्यभिचारः विरुद्ध—

---

[35] आश्रयसिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथा।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा।। कारि. 75

[36] त. सं. पृ. 118

[37] त. सं. पृ. 119

[38] त. सं. पृ. 119

[39] त. सं. पृ. 120

[40] शा. दी. 47

[41] कालात्ययापदिष्टः कालातीतः। न्या. द. 1.2.9

[42] न्या. सा. पदपञ्चिका, 35

[43] साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः।
उत्पत्तिकालीन धटे गन्धादिः यत्र साध्यते।। कारि. 78

[44] त. सं. पृ. 123

ते। यादृशविशिष्टविषयत्वेन यथार्थज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्वं हेत्वाभासत्वमिति गागाभट्टः,[46] ागे भाट्टेषु मतभेदो दरीदृश्यते। हेतुदोषास्त्रयः असिद्धिः, अनैकान्तिकत्वम्, बाधकत्वमिति श्रः शास्त्रदीपिकायां प्रत्यपिपदत्।[47] अत्रैव हेतुदोषा इति उक्तपूर्वाणां त्रयाणां संकीर्तनेन ्य हेतुदोषपरतया व्याख्यान एवास्य नैर्यमयमिति प्रतीयते।

भट्टस्तु व्याख्याद्वयमप्युपन्यस्य दृष्टहेतुपरतयामेव नैर्मयं वहन्निव असिद्ध—अनैकान्तिक— ्यमजत।[48] तदनु अवान्तरविभागे पुनः दोषपरतयैव हेत्वाभासान् निर्दिदेश।[49] विभागेत्वयं पार्थसारथि ारति उक्तपूर्वत्रित्वाङ्गीकारेण।

नेयोदयकारः नारायणस्तु असिद्ध—विरुद्ध—अनैकान्तिक—साधारण भेदेन ष्टयमङ्गीकरोति।[50] इयान् विशेषः यत्नामनिर्देशे अवान्तरविभागे चायमसिद्धविरुद्धादिरूपेण तान् कीर्तयतीति।

ोव्याख्याने ऋजुविमलापंचिकायां शालिकनाथेन साधारण—असाधारण— विरुद्धाख्यः त्रयः भनुमानलक्षणघटकज्ञातसम्बन्धपदसार्थक्यानिरूपण व्याजेन प्रतिपादिताः।[51] प्रकरणपञ्चिकायां तेनैव ाधारण—साधारण— बाधितविषया इति चत्वारः हेत्वाभासाः निरुपिताः।[52] एवं च द्वयोर्मेलनेन यते यत्—प्राभाकरमते असिद्ध—असाधारण—साधारण—विरुद्धा—बाधा पञ्च हेत्वाभासाः ाति। एतेषां मते सत्प्रतिपक्षस्य न हेत्वाभासत्वम्। प्रबलदुर्बलयोर्विरोधे सति प्रबलापहृतविषयः दुर्बल न लभते। न हि नाम तुल्यबलयोः कुत्रचिद्विरोधः घटते। अतः न सत्प्रतिपक्षस्य दूषणान्तरत्वम्।[53]

---

ाः, एस्. बी. दिङ्नागोवतहोत्वाभासविमर्शः पठितम् पत्रम्।

ोकान्तिकत्वम्, बाधकत्वं चेति त्रयो हेतुदोषाः। शा. दी. 64

द्वानैकान्तिकबाधकाः। भा. चि. 31

स्वरूपासिद्धिः। भा. चि. 31

गावली - उदयनाचार्यः, सम्पा. . विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृत सीरीज सं. 9, वाराणसी, 1897

संग्रहः - शान्तरक्षितः, सं.. स्वामी द्वारिकादासशास्त्री, बौद्धभारती, वाराणसी, 1968

मृतम् - जगदीशभट्टाचार्यः, सं.. रामचन्द्रमिश्रः, चौखम्बा विद्याभवन, वाराणसी, 1973

कौमुदी - लौगाक्षिभास्करः, सं..वी. एल. एस. पनसीकरः, निर्णयसागर प्रेस, बम्बई, 1928

नाषा - केशवमिश्रः, सं..बदरीनाथशुक्लः, मोतीलाल बनारसीदास, वाराणसी, 1968

तंग्रहः - अन्नंभट्टः, सं.. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. 55, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना, 1968

तंग्रहः 'दीपिका' - अन्नंभट्टः, सं.. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. 55, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना, 1968

ाकुसुमाञ्जलि - उदयनाचार्यः, सं..महाप्रभुलालगोस्वामी, मिथिला विद्यापीठ ग्रन्थमाला सं. 28, 1972

ाभाष्यम् - वात्स्यायनः, सं..नारायणमिश्रः, काशी संस्कृत ग्रन्थमाला, 48, वाराणसी, 1970

ावार्त्तिकम् - उद्योतकराचार्यः, सं. विन्ध्येश्वरीप्रसाद द्विवेदी, बिब्लोथिका इण्डिका, कलकत्ता, 1887

ासिद्धान्तमुक्तावली - विश्वनाथः, सं. श्रीकृष्णवल्लभाचार्यः, काशी संस्कृत ग्रन्थमाला, सं. 212, वाराणसी, 1972

तपादभाष्यम् - प्रशस्तपादः, सं. नारायणमिश्रः, काशी संस्कृत र्थधर्मसंग्रहः) ग्रन्थमाला सं. 173, वाराणसी, 1966

ीय दर्शन - बलदेव उपाध्याय, चौखम्भा सं. सं. दिल्ली, 1977

सहायकाचार्यः

नरेन्द्रनाथ संस्कृत महाविद्यालयः, प्रियवाग, बालेश्वरम्